सारस्वतप्रक्रिया

१३६

सा. १

ॐ स्वस्ति श्रीगणेशायनमः नमःसरस्वत्यै ॥ ॐ प्रणम्य परमात्मानं बालधीवृद्धिसिद्धये सारस्व
तीमृजुं कुर्वे प्रक्रियां नातिविस्तराम् १ इंद्रादयोपि यस्यांतं न ययुः शब्दवारिधेः प्रक्रियां तस्य
कृत्स्नस्य क्षमो वक्तुं नरः कथम् २ तत्र तावत्संज्ञा संव्यवहाराय संगृह्यते ॥ अइउऋऌ समानाः ॥
अनेन प्रत्याहारग्रहणाय वर्णाः परिगण्यंते तेषां च समानसंज्ञा च विधीयते नैतेषु सूत्रेषु सं
धिरनुसंधेयो विवक्षितत्वात् विवक्षितस्तु संधिर्भवतीति नियमात् लौकिकप्रयोगनिष्प
त्तये समयमात्रत्वाच्च ॥ ह्रस्वदीर्घप्लुतभेदाः सवर्णाः एते समाना ह्रस्वदीर्घप्लुतभेदाः परस्परं
सवर्णा भण्यंते लोकाच्छेषस्य सिद्धिरिति वक्ष्यति ततो लोकत एव ह्रस्वादिसंज्ञा ज्ञातव्याः एक
मात्रो ह्रस्वः द्विमात्रो दीर्घः त्रिमात्रः प्लुतः व्यंजनं चार्धमात्रकम् एषामन्येप्युदात्तादिभेदाः संति
उच्चैरुपलभ्य[illegible]मान उदात्तः नीचैरनुदात्तः समाहृत्या स्वरितः सानुनासिको निरनुनासिक
श्च ॥ एऐओऔ संध्यक्षराणि ॥ एषां ह्रस्वा न संति ॥ उभये स्वराः ॥ अकारादयः पंच चत्वार ए
कारादयश्चेत्युभये स्वरा उच्यंते अवर्जा नामिनः अवर्णवर्जाः स्वरा नामिन उच्यंते अनुक्रांता ला
वत्स्वराः अथ प्रत्याहारसिद्ध्यर्थं व्यंजनान्यनुक्रामति ॥ हयवरलञणनङमझढधघभ
जडदगबखफछठथचटतकपशषस ॥ आद्यंताभ्यां ॥ प्रत्याहारसिद्धिरिति आद्यंताभ्यामेते व
र्णा ग्राह्याः आदिवर्णोऽत्येन सह गृह्यमाणस्तन्नामा प्रत्याहारः तथाहि अकारो वकारेण सह गृ

द्यमाणो ञ्वप्रत्याहारः सच अइउऋऌएऐओऔहयवरलञणनङमझढधघभजडदगब इत्येतावत्सं-
ख्याकः संपद्यते चटतकप इतिचसप्रत्याहारः जडदगब इतिजबप्रत्याहाहारः जढधघभ इतिझभप्रत्या-
हारः एवं यत्र यत्र येन येन प्रत्याहारेण कार्यं स स तत्र तत्र ग्राह्यः प्रत्याहाराणां संख्यानियमस्तु नास्ति ॥ हसा
व्यंजनानि ॥ हकारादयः सकारांता वर्णा हसा व्यंजनानि भवंति स्वरहीनं व्यंजनम् तेष्वकारः स्वरोच्चार-
णार्थत्वादित्संज्ञकः कार्यायेत् प्रत्ययाद्यतिरिक्तः कस्मैचित्कार्यायोच्चार्यमाणो वर्ण इत्संज्ञको भवति
यस्यत्संज्ञा तस्य लोपः वर्णादर्शनं लोपः वर्णविरोधो लोपश्च एकवर्णेनाशयत्पत्रस्यात्मन्निप्रतिबध्नाती-
ति सवर्णविरोधः मित्रवदागमः शत्रुवदादेशः स्वरानंतरिता हसाः संयोगः उपरतकालस्य उपरतान्-
रोदात्तावान्ग्राह्यः अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा जिह्वामूलं च दंताश्च नासिकौष्ठौ च ता-
ल्व च तुल्यास्यप्रयत्नं सवर्णम् तुल्यौ स्थानप्रयत्नौ यस्य तद्वर्णं मिथः सवर्णसंज्ञं स्यात् ॥ अकुहविसर्जनी-
यानां कण्ठः इचुयशानां तालु ऋटुरषाणां मूर्धा लृतुलसानां दंताः उपूपध्मानीयानामोष्ठौ एदैतोः कण्ठ-
तालुनी ओदौतोः कण्ठोष्ठम् वकारस्य दंतोष्ठं जिह्वामूलीयस्य जिह्वामूलं नासिकानुस्वारस्य स्पृष्टं प्र-
यत्नं स्पर्शानां ईषत्स्पृष्टमंतस्थानां विवृतमूष्मणां स्वराणां च दीर्घप्लुतयोर्वर्णयोर्विवृतत्वं ह्रस्वस्य सं-
वृतत्वं सोत्र सावर्ण्यसिद्ध्यर्थं विवृतं प्रतिज्ञायते कादयो मावसानाः स्पर्शाः यरलवा अंतस्थाः शषसह ऊष्मा-
णः कइति जिह्वामूलीयः पइत्युपध्मानीयः अं इत्यनुस्वारः अः इति विसर्जनीयः कुचुटुतुपु वर्गाः

सा॰ उकारः पंचवर्णपरिग्रहणार्थः ॥ अएदोन्नामिनोगुणः नामिस्थानिका अ ए ओ एते गुणा॰
२ संज्ञकाभवंति ॥ आऐऔवृद्धिः ॥ आ आर् ऐ औ एते वृद्धिसंज्ञकाभवंति ॥ अंत्यस्वरादिष्टिः ॥ अंत्य
यः स्वरस्तदादिर्वर्णाष्टिसंज्ञकोभवति ॥ अंत्यात्पूर्वउपधा ॥ अंत्याद्वर्णमात्रात्पूर्वोयोवर्णः
स उपधासंज्ञकोभवति ॥ असंयोगादिपरोह्रस्वोलघुः ॥ विसर्गानुस्वारसंयोगादिपरोदी॰
र्घोगुरुः ॥ मुखनासिकोनुनासिकः ॥ मुखनासिकाभ्यामुच्चार्यमाणोवर्णोनुनासिकः ॥
इतिसंज्ञाप्रक्रिया ॥ अथनातःस्वरसंधिरभिधीयते ॥ इयंस्वरे इवर्णोयकारत्वमापद्यते स्वरेपरे द
ध्यानय दधिआनयेतिस्थिते इ य् य आनयेतावद्भवति हसेर्हसः स्वरात्परोरेफहकारवर्जिते
हसोहसेपरेद्विःस्यात इतिधस्यद्वित्वम् ॥ जभेजबाः ॥ जभानांजबेपरेजबाःस्युः इतिध
स्यदः सवर्णत्वात वर्गेवर्गाणांसवर्णाइतिवचनात यथासंख्यैवानुक्रमम् स्वरहीनंप
रेणसंयोज्यम् दध्यानयइतिसिद्धं गौरीअत्र गौर्यत्र अर्हइतिविशेषणात् नरेफस्यद्वित्वं
कितुराघयोर्द्विः स्वरपूर्वात् रेफात्परोयोयःसोद्विर्भवति जलतुम्बिकान्यायेनरेफस्योर्ध्वगम
नं गौर्यत्र स्वरइत्यनुवर्तते एवमन्यत्रापियत्रयत्रसूत्रादौनैकार्यसिद्धिस्तत्रसर्वत्रतत्सूत्रागा॰
त् परानुवृत्ति ज्ञातव्या ग्रन्थभूयस्त्वभयान्नलिख्यतेस्माभिः । उवम् । उवर्णोवत्वमापद्यते स्व
रेपरे मधुअत्र मध्वत्र । ऋरम् । ऋवर्णोरत्वमापद्यते स्वरेपरे लृ अनुबन्धः लनुबन्धः । एअय् । २

एकारः अय् भवति स्वरे परे ने अनं नयनम् । ओ अव् । ओकारः अव् भवति स्वरे परे लो अति
भवति । गवादेरवर्णागमो ऽक्षादौ परे वक्तव्यः गोऽक्षः गवाक्षः गोइन्द्रः गवेन्द्रः गोऽजिनं ग
वाजिनं । अक्षऊहिन्योरामिनोः अपरयोः ऊढेतोरनाम्नि नोहवृद्धिर्भवति पूर्वस्याकारस्याका
रस्य लोपः अक्षस्य ऊहिनी अक्षौहिणी प्र ऊढः प्रौढः स्व ईरं स्वैरम् स्वैरिणी स्वैरिणी
कश्चित्स्वरवयकारः यथाध्वपरिमाणे गोयूति गव्यूतिः अन्यत्र गवांमिश्रीभावो गोयूतिः पिच्य
म् । ऐ आय् । ऐकारः आय् भवति स्वरे परे नै अकः नायकः । औ आव् । औकारः आव् भवति स्वरे प
रे तौ इह ताविह । य्वोर्लोपः स्यात्पदान्ते । पदान्तेस्थितानामयादीनां यवयोः लोपस्स्याद्भवति ते
आगता तआगताः तयागताः तस्मैपतन् तस्मायपतन् तस्मायेतन् पटो इह पटइह पटवि
ह तौ इमौ ता इमौ ताविमौ । लोपशेषपुनर्नसंधिः । अन्तस्थितभवत्यव हे सखे इति हे सखये
यिति हे सखेति । एङोतः । पदान्तेस्थितादेङ्कारादेङ्गकारात्परस्याकारस्य लोपः स्यात् तेऽत्र तेत्र
पटोऽत्र पटोत्र । नावलन्त्यस्वराः संधेयाः । व्यंजनेपरेस्वराः सन्धानव्यानभवति श्रीः इह देवीम
त्रि दए इहलः । सवर्णेदीर्घः सह । सवर्णस्य सवर्णे परे सह दीर्घो भवति श्रद्धा अत्र श्रद्धात्र दधि
इह दधीह भानु उदयः भानूदयः सामान्यशास्त्रतो नूनं विशेषो बलवान्भवेत् परेण पूर्वबा
धोवाप्रायशोदृश्यतामिह बहुव्यापकः सामान्यम् । अइए । अवर्णादिवर्णे परे सह एभवति तव

सा.
२
3

इदम् तवेदम् ममइदम् ममेदम् हलादेरीषादौटेः लोपोवक्तव्यः हलईषा हलीषा लांगलई
षा लांगलीषा मनसईषा मनीषा अद्यओम् अद्योम् प्राकअन्धुः प्राकन्धुः कर्कअन्धुः क
र्कन्धुः कुलअटा कुलटा सीमनअन्तः सीमन्तः सारअङ्गः सारङ्गः पतत् अञ्जलिः पतञ्जलिः
उओ अवर्णः उवर्णेपरे सह ओ स्यात् गङ्गाउदकम् गङ्गोदकम्। ऋअर् अवर्णः ऋवर्णेपरे सह अर्
भवति तवऋद्धिः तवर्द्धिः। क्वचिदार् अवर्णः ऋवर्णेपरे सह आर् भवति ऋणऋणम् ऋणार्णं
दशऋणम् दशार्णम् वसनऋणम् वसनार्णम् प्रीतऋतः प्रीतार्तः शीतऋतः शीतार्तः। ऌ
अल् अवर्णः ऌवर्णेपरे सह अल् स्यात् तवऌकारः तवल्कारः ऋलयोः सावर्ण्यं वा वक्तव्यं प
रिअङ्कः पर्यङ्कः पल्यङ्कः होतृऌकारः होतॢकारः एऐऐ अवर्णः एकारे ऐकारे वा परे सह ऐ
कारो भवति तवएषा तवैषा तवऐश्वर्यम् तवैश्वर्यम्। ओऔऔ। अवर्णः ओकारे औकारे वा प
रे सह औकारो भवति तवओदनम् तवौदनम् तवऔवत्यम् तवौवत्यम् ओष्ठोत्वे वा अवर्णः ओष्ठो
त्वोः परयोः सह ओकारो वा भवति बिम्बओष्ठः बिम्बोष्ठः बिम्बौष्ठः स्थूलओतुः स्थूलोतुः॥ इति स
सन्धिप्रक्रिया॥ अथ प्रकृतिभावः॥ नामी अदसो मीषाद्युक्तस्सन्धिर्न भवति अमीआदित्याः अ
मीअश्वाः अमीएडकाः अदस इति किम् अस्मासौद्योद्वित्वे ईत् ऊत् एत् ईकारान्तः ऊकारान्तः ए
कारान्तः च यो द्वित्वे वर्तमानः सन्धिं न प्राप्नोति मणीवादिवर्जम् अग्नीअत्र पटूअत्र मालेअत्र व २

जेनात्तु मणीवादीनां संधिर्भवति मणीइव मणीव रोदसीइव रोदसीव दम्पतीइव दम्पती
व जायापतीइव जायापतीव माध्यापतीव गौनिगौपानः अकारो ओकारश्च निपातः एकस्वरश्च
सन्धिं न प्राप्नोति अपेवमन्यसे नो अत्र स्यात् व्यम् उ उमिए अप्रपेहि इइन्द्रं पश्य प्लुतः प्लुतः
सन्धिं न प्राप्नोति हे देवदत्त ३ एहि हाहाहा कानेटे प्लुतः हाहाहाने गाने वदने रोदने विचारे च टेः
प्लुतो भवति विशेषस्य अन्यस्य ॥ इति प्रकृतिभावः ॥ अथ व्यञ्जनकार्यमुच्यते ॥ चपा अबेजबाः
पदान्ते वर्तमानाश्चपाः जबाः स्युः अबेपरे षडत्र षडत्र वाक् यथा वाग्यथा अच् अजन्तम् अज
न्तम् तत् पतत् तदेतत् वाक् ऐन्द्री वागैन्द्री ञमे ञमा वा पदान्ते वर्तमानाश्चपा ञमा वा स्युः ञ
मे परे वाक् मात्रे वाङ्मात्रे षड् मम षण्मम वा षड्मम चपाच्छः शः चपात्परस्य शकारस्य छो वा
स्यात् वाक्शूरः वाक्छूरः वा वाक्शूरः, होऽझभाः ॥ चपाउपरस्य हकारस्य वा झभास्युः षड्ढगाःचपः
तड्ढगाः चतुर्थो भवन्ति तत्हविः तद्धविः वाक्हविः वाक्हरिः वाग्घरिः वा वाग्हरिः षड्
हलानि षड्ढलानि वा षड्हलानि श्चोः श्चुभिः श्चुः षकारस्य तवर्गस्य च शकारेण चवर्गेण च योगे
शकारश्चवर्गो यथासंख्येन स्तः सस्य शकारः तवर्गस्य चवर्गः कश्चरति कश्चरति कस्शे
ते: कश्शेतः तत् चित्रं तच्चित्रम् तत् शास्त्रं तच्छास्त्रम् तत् श्रवणं तच्छ्रवणम्। न शात्। शा
कारात्परस्य तवर्गस्य चुत्वं न स्यात् विश्नः प्रश्नः प्रश्नः। ष्टो। ष्टुभिः ष्टुः षकारटवर्गाभ्यां यो

सा॰ ४

गलोः ष्टुर्भवति कश्चषष्ठः कष्षष्ठः कास्टीकते काष्टीकते तत्टीकते तट्टीकते चक्रिन् ढौ
कसे चक्रिण्ढौकसे ॥ तो लि लः ५ तवर्गस्य लकारे परे लकारो भवति तत्लुनाति तल्लुनाति
भवान्लिखति भवाल्लिखति । अन्त्यस्याद्विप्रभेदाः । रेफवर्जिता यवलाः सानुनासिका निरनुनासि
काश्चेति तत्र सानुनासिक एव नकारे लकारः स्यात् न षि द्वे परतः तवस्य ष्टुत्वं न स्यात् भवान्
षष्ठः भवान्षष्ठः । टोन्त्यात् । पदान्ते वर्तमानात् टवर्गात्परस्य तोः ष्टुर्न स्यात् षट्नयाः ष
ड्नयाः षण्णयाः षट्सीदन्ति षड्सीदन्ति । नश्छत्ते । नान्तस्य पदस्य छते परे समागमो भवति टि
टित्कितावाद्यन्तयोर्वक्तव्यौ टकारेत्यस्य सटित् ककारेत्यस्य सकित् ककारः कित्कार्यो॰
र्थः अकारः उच्चारणार्थः तौ टित्कितौ आद्यन्तयोर्भवतः भवान्छात्रः भवांश्छात्रः राजन्विद्व
राजंश्चिद्वम् भवान्टीकते भवांष्टीकते भवान्तनोति भवांस्तनोति । शे चवा । नान्तस्य पदस्य शे
परे च चागमो भवति भवान्शूरः भवांश्शूरः भवान्स्मरः भवाञ्छूरः । ङणनाः ह्रस्वाद्द्विः स्वरे । ङ
कारणकारनकारा ह्रस्वादुत्तराः द्विर्भवन्ति स्वरे परे पदान्ते च प्रत्यङ्ङिदं प्रत्यङ्ङिदं सुगण्णिह ।
सुगण्णिह राजन्निव राजन्निह । छः । ह्रस्वादुत्तरः छो द्विर्भवति तवच्छत्रम् । विसेवयाजसानाम्
विसमानां विसे परे चभा भवति तवच्छत्रम् । आङ्माङ्दीर्घात्पिवक्तव्यम् । ह्रीच्छः स्लेच्छः । मोनु॰
स्वारः । मकारस्यानुस्वारः स्यात् हसे परे पदान्ते च त्वम्हससि त्वंहससि पटुम्हृष्या पटुंहृष्या ४

क्विबन्ते राजतौ परे समः ॥ समो मकारस्य क्विबन्ते राजतौ परे मकार एव भवति सम्राट्
सम्राजौ । नश्चापदान्ते झसे । नकारस्य मकारस्य चापदान्ते स्थितस्यानुस्वारो भवति झसे परे य-
शान्सि यशांसि पुम्भ्याम् पुंभ्याम् । यमा यमे स्वा वा । अनुस्वारस्य यमा वा स्युः यमे परे अस्य य-
मस्य सवर्णाः सय्यँन्ता संय्यन्ता वा संयन्ता सव्वँत्सरः संवत्सरः वा संवत्सरः तल्लोकं तं
ल्लोकम् वा तंलोकम् त्वमकरोमि त्वङ्करोमि त्वमतनोषि त्वन्तनोषि त्वंतनोषि त्वमचरसि
त्वञ्चरसि वा त्वंचरसि । स्वरे मः । अनुस्वारस्य मकारो भवति स्वरे परे पुंअस्ति पुमस्ति कथमनी
यताम् कथमानीयताम् । ङं छन्दसि । अनुस्वारस्य ङं संपद्यते छन्दसि शषसहरेफेषु परतः संहि
तः सङ्ँहितः हंसः हङ्सः तंरविः तङ्रविः अनेनानुस्वारस्य ङं भवति ॥ इति व्यञ्जनसन्धिः ॥ अथ
सर्गसन्धिर्निगद्यते ॥ विसर्जनीयस्य सः । विसर्जनीयस्य सकारः स्यात् खसे परे कः तनोति कस्तनोति
शषसे वा । विसर्जनीयस्य शषसे परे वा सकारो भवति कः शेते कश्शेते कः षण्डः कष्षण्डः कः
साधुः कस्साधुः । कुप्वोः कःपौ वा । विसर्जनीयस्य कवर्गपवर्गसंबन्धिनि खफे परे कपौ वा स्तः
कपावुच्चारणार्थौ कः करोति कङ्करोति कः खनति कख्खनति कः पचति कप्पचति कः फल-
ति कफ्फलति वृक्षाः फलम् वृक्षाफ्फलम् पक्षे कः करोति कस्करोति इत्यादि ॥ वाचस्पत्यादयः
संज्ञायां ह्रानिपातनात् साधवः नहिहतयोः कारपत्योः परयोश्चोरस्त्ववतयोरर्थयोः नुडागमः तल्लोपश्च ।

सा.
५
5

वाचःपतिः वाचस्पतिः तत्करः तस्करः बृहत्पतिः बृहस्पति भाःकरः भास्करः । अहोरा
त्रविशुः । अहोविसर्जनीयस्यपदान्ते रोभवति रूप्यादिगणवर्जितेषुपरतः अहःपतिः अहर्पतिः अहःग
णः अहर्गणः अरात्रिशुप्तिविषेधात् अहोरात्रम् अहोरथन्तरम् । अतोत्युः । अकारात्परस्यविसनी
यस्यउकारःस्यात् अतिपरे कःअर्थः कोर्थः देवाअत्र देवोत्र सःअयम् सोयम् । हवे । अ[illegible]त्पः
रस्यविसर्जनीयस्यउकारःस्यात् हवेपरे कःगतः कोगतः देवायाति देवोयाति मनःरथः मनोरथः
आदवेलोपश्च अवर्णात्परस्यविसर्जनीयस्यलोपश्चस्यात् अवेपरे देवाःअत्र देवात्र वाताःवाति वा
तावाति अवेकिं बालाःखेलन्ति विप्राःपठन्ति । स्वरेयत्वंवा । अवर्णात्परस्यस्वरेपरेयत्वंवास्यात् ॥ देवाः
इह देवाइह देवायिह । भोसः । भोस् भगोस् अघोस् एतस्मात्परस्यविसर्जनीयस्यलोपश्चभवति
अवेपरे भोःएहि भोएहि भोःयाहि भोयाहि भगोःएहि भगोएहि भगोःनमस्ते भगोनमस्ते अघोःया
हि अघोयाहि । उभसोरोबुधे । उभसःविसर्जनीयस्यरोभवति बुधेपरे उभर्बुधः । नामिनोरः । नामिनः
परस्यविसर्गस्यरेफःस्यात् अवेपरे अग्निःअत्र अग्निरत्र पटुःजयति पटुर्जयति । रेफप्रकृतिः । कस्य
खपेवा रेफाज्जातस्यविसर्गस्यरेफोवास्यात् खपेपरे गीःपति गीर्प्पतिः गीपतिः धूःपतिः धूर्प्प
तिः धूपतिः । रः । रेफसम्बन्धिनो विसर्गस्यरेफःस्यात् अवेपरे प्रातःगतः प्रातर्गतः प्रातःअत्र प्रा
तरत्र अन्तःगतः अन्तर्गतः अन्तःअत्र अन्तरत्र । क्वचिन्नामिनोवेलोपश्च ॥ क्वचिन्नामिनःपरस्य विस ५

जेनोयस्य लोपश्च भवति अवे परे। रिलोपो दीर्घश्च॥ रेफस्य रेफे परे लोपः स्यात् पूर्वस्य दीर्घः
पुनः रमते पुना रमते अग्निः रूप्यात्मना भाति अग्नी रूप्यात्मना भाति। सैषाड्हसे। षाह्लादेशा
षाह्लाश्च परस्य विसर्गस्य लोपश्च स्यात् हसे परे सः चरति स चरति एषः चरति एष चरति एषः
हसति एष हसति सैषा रितिसंहिता॥ सैष दाशरथी रामः सैष राजा युधिष्ठिरः सैष कर्णो महा
त्यागी सैष भीमो महाबलः॥ इत्यादौ तु पादस्य पूरणार्थं सन्धिः॥ यद्वा लौकिकार्ये हन्त देवाङ्गल
भवेत् सेमां भूम्याददे सोषामित्यादीनाम् अनुष्टुप्ता सः इमां सेमाम् भूमिः आददे भूम्याददे। क्वचित्प्रवृ
त्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव विधेः विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं व
दन्ति वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ धातोस्तदर्थातिशयेन योगः तदुच्यते
पञ्चविधं निरुक्तम् वर्णागमो गवेन्द्रादौ सिंहे वर्णविपर्ययः षोडशादौ विकारः स्याद्वर्णनाशः पृषो
दरे वर्णविकारनाशाभ्यां धातोरतिशयेन यः योगस्तदुच्यते प्राज्ञैः मयूरभ्रमरादिषु मह्यां रौति म
यूरः भ्रमन् रौति भ्रमरः सेमामित्यत्र संधिनिषेधेपि क्वचित्प्रवृत्तिः भूमिराददे बीजमित्यत्रार्थे रेफस्य
प्रवृत्तौ विसर्गलोपः कार्य इति पर्यायः॥ इति विसर्गसंधिप्रक्रिया समाप्ता॥ अथ विभक्तिः निगद्य
ते॥ स्याद्विधा॥ स्यादिः त्यादिश्च विभक्त्यन्तं पदम् तत्र स्यादिविभक्तिर्नाम्नो यज्यते अविभक्तिना
म विभक्तिरहितं धातुवर्जं चार्थवन्नरूपं नामोच्यते कृत्तद्धितसमासाश्च प्रातिपदिकसंज्ञका इति के

सा. ६

6

चित॥ तस्मात् सिऔजसमौट्शस्टाभ्याम्भिस् ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङस्ओसाम्ङिओ
स्सुप् तस्मान्नाम्नः परास्स्युरेतेः सप्तविभक्तयोभवंति तत्राप्यर्थमात्रैकत्वविवक्षायांप्रथमैकवचने
सिदेवसिइतिस्थितेइकारउच्चारणार्थः सोविसर्गः सकाररेफयोर्विसर्गादेशःस्यात् अधातोः रसेपरेप
दांतेच देवः द्वित्वविवक्षायां औ औऔ देवौ बहुत्वविवक्षायांबहुवचनेजस् जकारस्येत्संज्ञात्वाल्लो
पः प्रयोजनंजसीतिविशेषणं देवाअस्इतिस्थितेदीर्घविसर्गौ देवाः अकाराज्जसोसुक् क्वचिद्भता
वः देवासः ब्राह्मणासः द्वितीयवचने देवअस्इतिस्थिते असासोरस्य समानाद्वयोरस्यासोर
कारस्यलोपःस्यात् अथैनत्देवम्देवौ बहुत्वविवक्षायांबहुवचनेदेवशस् इतिस्थितेशकारःश
शीतिविशेषणार्थः। सोनःपुंसः। पुंलिंगात्समानादुत्तरस्यशसः सकारस्यनकारादेशोभवति शसिपरे
पूर्वपदंशसिपरेपूर्वस्यदीर्घःस्यात् यदादेशः तद्वद्भवतिदेवान् तृतीयैकवचनेदेवटाइतिस्थितेट
कारोनुबंधः टनेतिविशेषणार्थः। टेन। अकारात्परःटाइनादेशःस्यात् अइएदेवेनआद्वे अकारस्य
आभवतिभकारेपरेद्विवेवर्तमानेसतिदेवाभ्याम्। भ्यः। अकारात्परस्यभिसोभकारस्यअकारादेशो
भवति अइएसइतिस्थिते इंडविसर्जनीयोदेवैः यकारस्यभिस्सिछंदस्येकारोवक्तव्यः भद्रंकर्णेभिः
चतुर्थ्येकवचनेदेवङेइतिस्थितेजकारोङित्कार्यार्थः सर्वत्र। ङेयक्। अकारात्परस्यङेप्रत्ययस्ययआ ६
गमःस्यात्। यस्मिः। बहुत्वेसति देवेभ्यः पंचम्येकवचनेदेवङसिइतिस्थिते। ङसिरत्। अकारात्परे

ङसिवत्तस्मात् सवर्णे दीर्घः देवात् देवाभ्याम् देवेभ्यः षष्ठ्येकवचने देवङस् इति स्थिते । ङस् स्य ।
अकारात्परः ङस् स्य भवति देवस्य । ओसि । अकारस्य ओसि परे एत्वं भवति एअय् देवयो नुडागमः ।
समाद्यन्तस्यामो नुडागमः स्यात् । टित्वादादौ । टकारः स्थाननियमार्थः उकार उच्चारणार्थः । नामि
नामिपरे पूर्वस्य दीर्घः स्यात् देवानाम् सप्तम्येकवचने देवङि इति स्थिते अइए देवे देवयोः सप्तमबहु
वचने देवसु इति स्थिते षकारः पित्कार्यार्थः पश्चिवक्रत्वे । किलात्यः सः कृतस्य कवर्गादिलप्रत्या
हारेणचेतान्तस्य केनचित्सूत्रेण कृतस्य सकारस्य षः स्यात् देवेषु । आमंत्रणे सिर्धिः । आमंत्रणमभिमुखी
करणं तस्मिन्नर्थे विहितः सिः धिः संज्ञो भवति । समानाद्धेर्लोपो धातोः समानादुत्तरस्य धेः लोपः स्या
न्न धातोः आभिमुख्याभिव्यक्तये हेशब्दस्य प्राक्प्रयोगः हे देव हे देवौ हे देवाः एवं घटपटकुम्भ
स्तम्भादयोप्यकारान्ताः पुंलिंगाः अकारान्तानामपि सर्वादीनां विशेषः सर्वविश्वउभउभयअन्यअन्य
तरइतरडतरडतमकतरकतमसमसिमनेकमपकपूर्वपरअवरदक्षिणउत्तरअपरअधरस्वअन्त
त्यद् तद् यद् एतद् अदस् इदम् द्विकिम् युष्मद् अस्मद् भवत् एते सर्वादयः त्रिलिंगाः तत्र पुंलि
गे रूपं तेषाम् सः सर्वौ । जसी । सर्वप्रभृतेरकारान्तात्परः जस्प्रत्ययः ईत्वं भवति अइए सर्वे सर्वम्
सर्वौ सर्वान् पूर्ववत्प्रक्रिया । एनौ णो नन्त्रे । चतुष्टरे षकाररेफऋवर्णेभ्यः परस्य नस्य णः स्यात् अन्ते
स्थितस्य न भवति सर्वानित्यादौ । अवकृस्यान्तरेपि । अवप्रत्याहारेण च कवर्गेण च पवर्गेण च मध्ये

सा. व्यवधानेपिभवति नान्येन सर्वेणसर्वाभ्यांसर्वैः चतुर्थ्येकवचने सर्वङेइतिस्थिते। सर्वादेःस्मट्
७ सर्वादेरकारान्तात्परस्यचतुर्थ्येकवचनस्यस्मडागमःस्यात् एएऐ सर्वस्मै सर्वाभ्याम् सर्वेभ्यः पं
7 चम्येकवचने सर्वअत्इतिस्थिते ङसेः सर्वादेरकारात्परस्यातःस्मट् आगमःदीर्घःस्यात् दीर्घः
सर्वस्मात् सर्वाभ्याम् सर्वेभ्यः सर्वस्य सर्वयोः। सुडागमः। सर्वादेरवर्णान्तात्परस्य आमःसुडा
गमःस्यात् एस्भिबङ्गत्वे इत्येत्वम् क्विलादित्विषत्वं सर्वेषाम् ङिःस्मिन् सर्वादेरकारान्तात्प
रोङिःस्मिन्स्यात् सर्वस्मिन् सर्वयोः सर्वेषु हेसर्व हेसर्वौ हेसर्वे एवंविश्वादीनामेकशब्दपर्य
न्तानांरूपाणेयम् उनरउनमौविहाय नौप्रत्ययौ नतश्चतदन्ताः प्राशूयायशा। पूर्वादीनांगतवानां
जसृङीकालेवावक्तव्यः जसीकाराकारोवक्तव्यः पूर्वौपूर्वैः पूर्वे पूर्वे पूर्वौ पूर्वानां पूर्वे पूर्वाः।
परेपराः इत्यादि। ङसिङ्योःस्मात् स्मिनौवावक्तव्यौ पूर्वस्मात्पूर्वात् पूर्वस्मिन्पूर्वे परस्मात्परा
त् परस्मिन्परे इत्यादि प्रथमचरमतयायडल्पार्धकतिपयनेमानाम् जसीवा प्रथमेप्रथमाः
चरमेचरमाः शेषंदेववत् तयायडौप्रत्ययौ। द्वितीयस्यसर्वशब्दवद्रूपं ङित्सुवावक्तव्यम् द्विती
यस्मै द्वितीयाय द्वितीयस्मात् द्वितीयात् द्वितीयस्मिन् द्वितीये एवंतृतीयः। उभशब्दोनित्यं
द्विवचनान्तः उभौ उभौ उभाभ्याम् ३ उभयोः २ उभयशब्दस्यद्विवचनाभावात् एकवचनबहु
वचनेभवतः उभयः उभये उभयम् उभयान् उभयेन उभयैः उभयस्मै उभयेभ्यः उभायस्य उभा ७

येषाम् उभायस्मिन् उभयेषु । मासस्यालोपो वा । मासशब्दस्याकारस्यलोपेवावक्तव्यः स
र्वविभक्तिषुपरतः असेपः सेः लोपः हसंतादीबन्ताश्चपरस्य सेर्लोपः स्यात् स्त्रोर्विसर्गः माः मा
सौ मासः मासौ मासौ मासः मासा स्त्रोर्विसर्गः अदन्ते लोपश्च माभ्यां माभिरित्यादि प
ले मासः मासौ मासइत्यादि देववत् । आकारान्तः पुंलिंगः सोमपाः शब्दः सोमपाः सोमपौ सो
मपाः अधातोरिति विशेषणात् धेर्लोपो नास्ति हे सोमपाः हे सोमपौ हे सोमपाः सोमपां सोमपौ
द्वितीयाबहुवचने सोमपा अमिति स्थिते । आतो धातोर्लोपः । धातुसंबन्धिन आकारस्य लोपः स्या
त् पासादौ स्वरेपरे सोमपः सोमपा सोमपाभ्याम् सोमपाभिः सोमपे सोमपाभ्यामसिसमाभ्यः ।
सोमपः सोमपाभ्याम् सोमपाभ्यः सोमपः सोमपोः सोमपाम् सोमपि सोमपोः सोमपासु । ए
वं कीलालपाशब्दधाविशब्दापप्रभृतयः । इकारान्तः पुंलिंगो हरिशब्दः । प्रथमैकवचने हरिसि इतिस्थि
ते स्त्रोर्विसर्गः हरिः । औङ् । इकारान्तादुकारान्ताच्च परऔकारः पूर्वमापद्यते ईङ्भवतः हरी । एङोज
सि । इकारान्तस्य उकारान्तस्य च जसि परे एकार ओकारश्च स्यात् हरयः । धौ । इकारान्तस्य उकारान्तस्य धौ
विषये एकार ओकारश्च स्यात् प्रत्ययलोपे प्रत्ययलक्षणम् हे हरे हे हरी हे हरयः हरिम् हरी हरीन् । टाना
स्त्रियाम् । इकारान्तादुकारान्ताच्च परः टाप्रत्ययः ना भवति अस्त्रियां हरिणा हरिभ्याम् हरिभिः ।
ङिति । इकारान्तस्य उकारान्तस्य च ङिति परे एकार ओकारश्च भवति हरये हरिभ्याम् हरिभ्यः । ङसि

सा. ८

ङसोरसः। एदोद्भ्यांपरस्यङसिङसोरकारस्य लोपः स्यात् हरेः हरिभ्याम् हरिभ्यः हरेः हर्योः हरी
णाम्। ङिरौदित। ङितिपरे ङेः लोपः स्यात् हरौ हर्योः हरिषु एवमग्निरविगिरिकविप्रभृतयः।
एतेरेवमन्यैः सिद्ध्यति भानुः भानू भानवः। हे भानो हे भानू हे भानवः भानुम् भानू भानून्। भानु
ना भानुभ्याम् भानुभिः भानवे भानुभ्या भानुभ्यः भानोः भानुभ्याम् भानुभ्यः भानोः भान्वोः भा
नूनाम् भानौ भान्वोः भानुषु सखिशब्दस्यभेदः। सेर्धिः। सखिशब्दस्यसेर्धिर्भवति डित्वात्टि
लोपः सखा अधेरितिविशेषणादेकारोधिविषयेऽस्त्यामन्त्रणे। हे सखे ऐसख्युः। सखिशब्दस्यऐकारः
स्यात् पंचस्वपरेषु षष्ठीनिर्दिष्टस्यादेशाः तदन्तस्येत्यर्थः आयादेशः सखायौ सखायः द्विवचनस्या
वाच्छन्दसि सखाया सखायौ सखायः सखायं सखायौ सखीन्। सखिपत्योरीङ्। सखिपतिइत्ये
तयोरीङागमः स्यात् टाङेङसिङस्सुपरेषु दीर्घत्वान्नानभवति सख्यापत्या अगमजमनित्यमितिन्याया
त् वेटे सखिनापतिना सखिभ्याम् सखिभिः सख्ये सखिभ्याम् सखिभ्यः। टङ्कू। सखिपतिशब्दयोः
टगागमः स्यात् ङसिङसोः नकारेपरे सख्यु ध्वस्तइतिस्थिते। ऋतोङसः। ऋकारात्परस्य ङस अ
कारस्योत्कारः स्यात् सचडित् सख्युः सखिभ्याम् सखिभ्यः सख्युः सख्योः सखीनाम् सप्तम्येक
वचने ङिरौदिति त्यौत्वेकृते सखिपत्योरीङागमः सख्यौ सख्योः सखिषु पतिशब्दस्यप्रथमद्विती
योः हरिशब्दवत्प्रक्रिया तृतीयादौ सखिशब्दवद्वक्तव्या पतेः पती पतयः पतिं पती पतीन्। प ८

त्या पतिभ्याम् पतिभिरित्यादि पतिरसमास एव सखिवद्वक्तव्यः ततः समासान्तस्य नाद्यो भवति
प्रजापतिना प्रजापतये नरपतिना नरपतये द्विशब्दो नित्यं द्विवचनान्तः द्विगौ इति स्थिते । त्यदा॰
दे । एरः स्यादौ स्यादौ परे त्यदादेः एरेकारस्य अत् द्वौ २ द्वाभ्याम् ३ द्वयोः २ त्रिशब्दो नित्यं द्विवचना
न्तः त्रिजस् इति स्थिते प्रागे जसि । इति पकारे हृते त्रयादेशः त्रयः त्रीन् त्रिभिः त्रिभ्यः २ त्रिग्राम् इ
ति स्थिते नुडाम । त्रेस्त्रय । नामि त्रिशब्दस्य त्रयादेशः स्यात् नामि परे ङितोन्त्यस्य वक्तव्यः त्रयाणां त्रि
षु कतिशब्दो नित्यं बहुवचनान्तः । कतिशब्दात् जिस्प्रत्ययोः लुग्वक्तव्यः लुकि न तन्निमित्तं कार्यं
कति २ कतिभिः २ कतिभ्यः २ कतीनां कतिषु त्रिषु लिंगेषु समरूपः ईकारान्तः सुश्रीशब्दः पुंलिं॰
गः । य्वोलातोरियुवौ स्वरे । धातोरीकारोकारयोः इयुवौ स्तः स्वरे परे सुश्रीः सुश्रियौ सुश्रि
यः सुश्रियं सुश्रियं सुश्रियौ सुश्रियः सुश्रिया सुश्रीभ्याम् सुश्रीभिः सुश्रिये सुश्रीभ्यां
सुश्रीभ्यः सुश्रियः सुश्रीभ्याम् सुश्रीभ्यः सुश्रियोः सुश्रीषु हे सुश्री हे सुश्रियौ हे सुश्रियः
एवमेव सुधीशब्दः ऊकारान्तः पुंलिंगः स्वयंभूशब्दः स्वयंभूः स्वयंभुवौ स्वयंभुवः स्वयंभुवं स्वयं॰
भुवौ स्वयंभुव इत्यादि सेनानीशब्दस्य विशेषो ह्रस्वादौ स्वरादौ विशेषः । स्वौवा । धातोरवयवसं॰
योगः पूर्वो यस्मात् ईकारात् ऊकाराद्वा अस्ति तदन्तस्य अनेकस्वरस्य ईकारस्य ऊकारस्य च यवौ भवतः स्व
रे परे वर्षाभूपुनर्भूव्यतिरिक्तभूशब्दस्य सुधीशब्दौ वर्जयित्वा वा ग्रहणादिदिग्विविक्ता सेनानीः सेना॰

सा. ९

९

न्यौ. सेनान्यः हेसेनानी हेसेनान्यौ हेसेनान्यः सेनान्यम् सेनान्यौ सेनान्यः सेनान्या सेनानीभ्या
म् सेनानीभिः सेनान्ये सेनानीभ्याम् सेनानीभ्यः सेनान्यः सेनानीभ्याम् सेनानीभ्यः सेनान्यः।
सेनानीभ्याम् सेनानीभ्यः सेनान्यः सेनान्योः सेनानीनां सेनान्यामीनां वामोन्नद्वाक्याः सेना।
न्याम् सेनानीनाम् ॥ अमेः ॥ नियस्य ग्रार्थान्नाशीर्धन्नान्तीशब्दाख्य[illegible]स्यडेराम्भवति सेनान्या
म् सेनान्योः सेनानीषु एवंग्रामणीशब्दप्रभृतयः प कस्ववात नीः नियौ नियः इत्यादि लूः लू
वौ लूवधात्ववयवसंयोगपूर्वत्वात् यवक्रीः यवक्रियौ यवक्रियः धात्ववयवसंयोगाभावात् उन्नीः
उन्न्यौ उन्न्यः इत्यादि एवंयवल्लावलपूशब्दप्रभृतयः सेनानीशब्दवदन्नेयाः कटप्रूशब्दस्यधात्ववयव।
संयोगपूर्वत्वात् उव् कटप्रूः कटप्रुवौ कटप्रुवः इत्यादि ऋकारांतः पुंलिंगः पितृशब्दः। सेरा।
धकारांतात्परस्य सेर्डा भवति सचडित् डित्वाट्टिलोपः पिता। पंचस्वृ ऋकारः अर् भवति पंचस्वसा
दिषु परेषु पितरौ पितरः। धेरर्। ऋकारांतात्परस्य धेरर् भवति सचडित्। डित्वात्टिलोपः हेपितः हेपित
रौ हेपितरः पितरं पितरौ पितॄन् पित्रा पितृभ्याम् पितृभिः पित्रे पितृभ्यां पितृभ्यः ऋतोङसः उ
नकक्रम् पितुः पितृभ्याम् पितृभ्यः पितुः पित्रोः पितॄणाम्। ङौ। ऋकारस्यार्स्यात्ङाववे पित
रि पित्रोः पितृषु एवंजामात्रादयः एवंनृशब्दः ना नरौ नरः नृर्वानामिदीर्घोवक्तव्यः नृणां
नृणां कार्तृशब्दस्यपंचस्वविशेषः। स्वरात्। सकारात्प्रत्ययस्वेबाधिनऋकारस्य आर् भवति पं ९

चसुपरेषुकर्तारमहूनिस्थितेयद्वादेशः नडङ्गवतिसेगादित्वात्दिलोपः कर्ता कर्तारौ कर्तारः
हेकर्त हेकर्तारौ हेकर्तारः कर्तारं कर्तारौ कर्तॄन् कर्त्रा कर्तृभ्यां कर्तृभि इति इतिशेषं
प्राग्वत् एवंनप्तृप्रशास्तृप्रभृतयः ।उकारान्तस्यापिक्रोष्टुशब्दस्यपंचस्वधिष्टुत्प्रत्ययान्तस्य
तृज्वद्भावः स्मृतः तुम् सेरा क्रोष्टा क्रोष्टारौ क्रोष्टारौ अपिरितिविशेषणात् हेक्रोष्टो हेक्रोष्टा
रौ हेक्रोष्टारः क्रोष्टारं क्रोष्टारौक्रोष्टारं पसित्प्रत्ययवद्भावाभावात् क्रोष्टून् ॥ तृतीया
दौतृज्वद्भावोतत्प्रत्ययान्तावावक्तव्या ॥ क्रोष्ट्रावाक्रोष्टुनाक्रोष्टुभ्याम् क्रोष्टुभिः क्रोष्ट्रेवा क्रोष्ट
वे क्रोष्टुभ्यां क्रोष्टुभ्यः क्रोष्टुः क्रोष्टोः क्रोष्टुभ्याम् क्रोष्टुभ्यः क्रोष्टुः क्रोष्ट्रोः क्रोष्ट्रोः क्रो
ष्ट्रा क्रोष्टूनाम् इडागमेकृतेहसादित्वात्तृज्वद्भावोनास्तिकृताकृतप्रसंगीयेविधिः सनित्यः नि
त्या नित्ययोन्निपात्यविधिबलकानिवचनात् क्रोष्टूनामितिस्थितेक्रोष्टरि क्रोष्टौ क्रोष्ट्रोः
क्रोष्टुषु क्रोष्टुषः ऋकारान्तालृवर्णान्तापकारान्ताश्चप्रसिद्धा ऐकारान्तःपुंलिंगः रैश
ह्ला । रैसि । रैशब्दस्याकारादेशोभवति सकारभकारादौविभक्तौपरतः राः रायौ २ रा
यः सर्वेयायःदेशाः हेराः हेरायौ हेरायः रायं रायः रायाः राभ्यां २ रा
भिः राये राभ्यः २ रायाः रायोः २ रायां राशि रासु । गौरौ । गोकारस्यौका
रादेशोभवति पंचसुपरेषुयोः गावौ २ गावः हेगौः हेगावौ हेगावः । आस्थाति । गोकारस्या

सा.
१०

10

त्वंभवति अमिपृशिचपरे गां, गाः, गवा, गोभ्यां ३ गोभिः गवे गोभ्यः ३ ङसिङसोरम्मेत्यकार
लोपः गोः २ गवोः २ गवां ॥ औतोगोरामोनुट् ॥ गोनां गवि गोषु एवं सयोशब्दः ओकारान्तः
पुंलिंगो ग्लौशब्दः तस्यहसादावविशेषः सर्वस्वरादावावादेशः ग्लौः ग्लावौ २ ग्लावः ग्ला
वं ग्लावः ग्लावा ग्लौभ्याम् ३ ग्लौभिः ग्लावे ग्लौभ्यः ३ ग्लावः २ ग्लावोः २ ग्लावां ग्लावि
ग्लौषु ॥ इतिस्वरांतः पुंलिंगाः समाप्ताः ॥ अथस्वरांताः स्त्रीलिंगाः ॥ प्रहृष्यंते तत्राकारान्तो
गंगाशब्दस्तस्यनामसंज्ञायां स्यादिविभक्तिः प्रथमैकवचने सि आबतः स्त्रियाम् आकारान्तान्नाम्नः
स्त्रियांवर्तमानादाप्प्रत्ययोभवति । आमः । आबंतात्परस्यसेर्लोपोभवति गंगा गौरी आबंतात्पर
स्यौकार ईकारमाप्नोति गंगे २ गंगाः । अम्बादीनांधौ ह्रस्वः ॥ हेअम्ब हेअक्क हेअत्त हेअल्ल ।
गंगां गंगाः । टौसोरे । आबंतस्य टौसोः परयोरेत्वंभवति अयादेशः गंगया गंगाभ्यां ३ गंगाभिः ॥
ङितांयट् । आबंतात्परेषांङितांवचनानां ङे ङसि ङस् ङि इत्येतेषां यडागमोभवति टकारः स्था
ननियमार्थः गंगायै गंगाभ्यः २ गंगायाः गंगयोः २ गंगानां आम्ङेः गंगायां गंगासु एवंश्र
द्धामेधाविद्याशालामालाहेलादोलाप्रभृतयः आबतः स्त्रियामित्याकारः सर्वादीनांतु ङित्सु वि
शेषः आबतः स्त्रियामित्याकारः सर्वादीनांतु ङित्सु विशेषः आबतः स्त्रियाम् सर्वा सर्वे २ सर्वाः
सर्वां सर्वाः सर्वया सर्वाभ्यां सर्वाभिः । यटोच्च । आबन्तात्सर्वादेः परस्ययटः स्सडागमोभवति पूर्वं १०

स्याचापोकारोभवति सर्वस्यै सर्वाभ्यः २ सर्वस्याः २ सर्वयोः २ सर्वासां सर्वस्यां सर्वास्व पूर्वे
पंगङ्गावत् एवंविश्वादयः जरा जरायाः स्वरादौजरस्त्वावक्तव्यः जरसौ २ जरे २ जरसः जराः हे
जरे हेजरसौ हेजरे हेजरसः हेजराः जरसं जरां जरसः जराः जरसा जरया जराभ्यां ३ जराभिः ज
रसे जरायै जराभ्यः जरसः २ जरायाः २ जरसोः २ जरयोः २ जरसां जराणां जरसि जरायां जरासु
इकारान्तः स्त्रीलिंगो बुद्धिशब्दः तस्य प्रथमाद्वितीययोर्हरिशब्दवत्प्रक्रिया बुद्धिः हेबुद्धे बुद्धी २
बुद्धयः बुद्धिं बुद्धीः स्त्रीलिंगात्वान्नाभावोविशेषः बुद्ध्या बुद्धिभ्यां ३ बुद्धिभिः । इदुद्भ्याम् ।
स्त्रियांवर्तमानाभ्यामिकारोकाराभ्यांपरेषांङितांवचनानांवा अडागमोभवति बुद्ध्यै । बुद्धये बुद्धि
भ्यः २ बुद्ध्याः २ बुद्धेः २ बुद्ध्योः २ बुद्धीनाम् । स्त्रियांश्च । इश्च उश्च युश्च स्त्यादिवर्णौतादुवर्णौता
श्च स्त्रियांवर्तमानात्परस्यङेराम् आदेशोभवति बुद्ध्यां अडागमाभावे आमोप्यभावः बुद्धौ बुद्धिषु
एवं मतिभूतिविभूतिरुचिकांतिगतिप्रभृतयः एवंधेनुरज्जुः प्रभृतयोप्युकारान्ताः स्त्रीलिंगाः तैरेव
सूत्रैः सिद्ध्यंति धेनुः धेनू २ धेनवः धेनुं धेनूः धेन्वा धेनुभ्यां ३ धेनुभिः धेन्वै धेनवे धेनुभ्यः २ धेन्वाः
२ धेन्वो २ धेन्वो २ धेनूनां धेन्वां धेनौ धेनुषु ईकारान्तः स्त्रीलिंगो नदीशब्दः । हसेपः सेर्लोपः । हसेना
दीबंतात्परस्यसेर्लोपोभवति नदी नद्यौ २ नद्यः । धौरुरत्वः । इवर्णोवर्णयोरधात्वोः स्त्रियांधौपरेह्र
स्वोभवति हेनदि हेनद्यौ हेनद्यः नदीं नदीः नद्या नदीभ्यां ३ नदीभिः । ङितामट् । स्त्रियामीका

सा. ईतादूकारांताच्चपरेषांङितांवचनानामडागमोभवति नद्यै नदीभ्यां ३ नदीभ्यः २ नद्याः २ नद्योः २
११ नदीनां नद्यां नदीषु एवंगौरीसरस्वतीब्राह्मणीकुमारीनारीप्रभृतयः लक्ष्मीशब्दस्यैवंतत्वाभावा
त्सेर्लोपोनास्ति लक्ष्मीः लक्ष्म्यौ २ लक्ष्म्यः आमंत्रणेधौह्रस्वः समानादेर्लोपोधातोः हेलक्ष्मि हे
लक्ष्म्यौ हेलक्ष्म्यः अवीलक्ष्मीतरीतंत्रीह्रीश्रीधीभ्रूणामुणादितः उमादीनाममीषांतुसेर्लोपोनविधीयते
लक्ष्मीं लक्ष्म्यौ लक्ष्मीः लक्ष्म्या लक्ष्मीभ्यां ३ लक्ष्मीभिः लक्ष्म्यै लक्ष्मीभ्यः इत्यादि शेषंनदीवत् १
स्त्रीशब्दस्यैवंतत्वात्सेर्लोपोस्ति। स्त्रीभ्रुवोः। स्त्रीशब्दस्यभ्रूशब्दस्यचस्वरेपरे इयुवौभवतः स्त्री स्त्रि
यौ २ स्त्रियः धौह्रस्वः हेस्त्रि। वाम्शसि। अमिशसिचपरेस्त्रीशब्दस्यवाइयभवति स्त्रियं स्त्रीं स्त्रियः स्त्रीः
स्त्रिया स्त्रीभ्यां ३ स्त्रीभिः स्त्रियै स्त्रीभ्यः २ स्त्रियाः २ स्त्रियोः २ स्त्रीणां स्त्रियांस्त्रीषु श्रीशब्दस्यभेदः
श्रीः श्रीधातोरियङ्वौभवतः स्वरेश्रियौ २ श्रियः हेश्रीः हेश्रियौ हेश्रियः श्रियम् श्रिया श्रीभ्यां ३ श्री
भिः। वेयुवः। इयुङ्वंतान्नित्यस्त्रीवर्तमानात्परेषांङितांवचनानांवाडागमःस्यात् श्रियै श्रिये श्रियाः
२ श्रियः २ श्रियोः २ आदीनांवामोनुड्वक्तव्यः श्रीणां श्रियां श्रियि श्रियां श्रीषु अत्राडागमाभावे
आमोप्यभावः श्रीषु एवं धीह्रीप्रभृतयोपि एवंभ्रूशब्दोपि वधूजम्ब्वादीनांतुनदीशब्दवद्रूपंज्ञेयं व
धूः वध्वौ २ वध्वः हेवधु इत्यादि ऋकारांतेमातृशब्दस्यपितृशब्दवत्प्रक्रिया सेरा माता मातरौ २
मातरः धेरर् हेमातः मातरं मातॄः मात्रा मातृभ्यां ३ मातृभिः मात्रे मातृभ्यः २ ऋतोङतुमातुः ११

मात्रोः । मातृणां ङौ मातरि मातृषु स्वसृशब्दस्य कर्तृशब्दवत् स्त्रीलिंगत्वान्नत्वाभावो वि
शेषः रैशब्दस्य रैशब्दवत्प्रक्रिया रैसिद्धिर्निरूप्यते रैस्त्रियाः स्वरादौ सर्वत्रायादेशः रायौ रायः
गोशब्दस्य पूर्ववत् नौशब्दस्य ग्लौशब्दवत् । इति स्वरान्ताः स्त्रीलिंगाः ॥ अथ स्वरान्ता नपुंस
कलिंगाः प्रदर्श्यन्ते तत्राकारान्तः कुलशब्दस्तस्य प्रथमाद्वितीयैकवचने । अतोम् । अकारान्
तान्नपुंसकलिंगात्परयोः स्यमोरम्भवति अधौ अमा सोरम्येन्नकारलोपः अमोमग्रहणं लघ्वा
हृत्यर्थम् । कुलम् । ईमौ । नपुंसकलिंगात्परयोर्जस्शसोः शिर्भवति शकारः सर्वादेशार्थः ॥
ग्रहः शिश्च सर्वसंज्ञकः ॥ नुमयमः नपुंसकस्य नुमागमो भवति शौ परे यमप्रत्याहारान्तस्य न भ
वति मिदंत्यात्स्वरात्परो वक्तव्यः उकार उच्चारणार्थः । नोपधायाः । नान्तस्योपधाया दीर्घो भव
ति शौ धिवर्जिते पुंसि पंचसु नाम्नि च कुलानि हे कुल हे कुले हे कुलानि पुनरपि कुले कुले
कुलानि शेषं देववत् एवं मूलफलपत्रपुष्पकुटुम्बादयः सर्वादीनां प्रथमाद्वितीययोः कुलश
ब्दवत् तृतीयादौ तु पुंलिंगवत् अन्यादीनां पंचानां विशेषमाह । शान्यादेः । अन्यादेर्गणात्परयोः
स्यमोः शात् भवति शकारः सर्वादेशार्थः उकार उच्चारणार्थः अन्यत् अन्ये अन्यानि एवं पुनरपि अ
न्यत् अन्ये अन्यानि शेषं पुंवत् एवमन्यतरत् इतरत् कतरत् कतमत् इत्यादि अथ इका
रान्त अस्थिशब्दः नपुंसकात्स्यमोर्लुक् नपुंसकलिंगात्परयोः स्यमोर्लुग्भवति अस्थि अस्थिनी अस्थी

सा. ११ ति । वृत्रहणाम् । वृत्रहणां नपुंसके पूर्वो वा गुणो वक्तव्यः हे अस्थि हे अस्थे हे दधि हे दधे इत्यादि उक्तं हि मा-
ध्यंदिनिर्वष्टि गुणं त्विगन्ते नपुंसके व्याघ्रपदां वरिष्ठः संबोधने चोशनसः त्रिरूपं नांतं सांतं तथाप्यदं-
तम् । नामिनः स्वरे । नाम्यंतस्य नपुंसकस्य नुरागमो भवति स्वरे परे । ईमौ । नपुंसकलिंगात्परः औ-
कारः ईमापद्यते अस्थिनी अस्थीनि । अस्थ्यास्थ्यांशटादौ । अस्थ्यादीनां अनागमो भवति इकारस्य चा-
कारो भवति टादौ स्वरे परे । अल्लोपः स्वरे म्वयुक्ताच्छ्वसटौ । नांतस्योपधाया अकारस्य लोपो भवति
घुमादौ स्वरे परे मकारवकारसंयोगात्परस्य न भवति अस्थ्ना अस्थिभ्यां अस्थिभिः अस्थ्ने इत्यादि । वेङ्योः
नांतस्योपधाया ईङ्योः परयोः अकारलोपो वा भवति अस्थ्नि अस्थनि एवं दधि सक्थि अक्षि शब्दाः इकारां-
तो वारिशब्दः वारि वारिणी वारीणि २ अथ ईकारांता ग्रामणीशब्दः नपुंसकस्य नपुंसकस्य ह्रस्वो
भवति सर्वासु विभक्तिषु परतः ग्रामणि कुलम् स्वरादौ सर्वत्र नामिनः स्वरे इति नुरागमः ग्रामणि-
नी ग्रामणीनि । टादावुक्तपुंस्कं पुंवद्वा ॥ एक एव हि यः शब्दः त्रिषु लिंगेषु वर्तते एकमेवार्थमा-
ख्याति भाषितपुंस्कमुच्यते उक्तः पुमान् येनेति उक्तपुंस्कं नाम्यंतं नपुंसकं टादौ स्वरे पुंवद्भवति वा ग्रा-
मण्या ग्रामणिना ग्रामणिभ्यां ग्रामणिभिः ग्रामण्ये ग्रामणिने ग्रामणीभ्यां ग्रामणीभ्यः ग्रामण्यः ।
ग्रामणिनः ग्रामणीभ्यां ग्रामणीभ्यः ग्रामण्यः ग्रामणिनः ग्रामण्योः ग्रामणिनोः नुमंतस्यामिदीर्घः
ग्रामणीनाम् ग्रामण्यां ग्रामणिनि ग्रामण्योः ग्रामणिनोः ग्रामणीषु हे ग्रामणि हे ग्रामणिनी हे ग्रा १

मणीनि आकारांतः सोमपाशब्दः सोमपं सोमपे सोमपानि २ सोमपेन सोमपाभ्यां सोम
पैरित्यादि उकारांतो मधुशब्दः तस्यापि स्वरे परे नागमः स्यात् मधु मधुनी मधूनि २ मधुभ्यां
मधुनेत्यादि ऊकारांतः खलपूशब्दो फवल्लूशब्दवत् खलपु खलपुनी खलपूनि २ ऋकारांतः
कर्तृशब्दः कर्तृ कर्तृणी कर्तॄणि २ हे कर्तृ हे कर्तः कर्तृणा कर्त्रा कर्तृभिरित्यादि ऐकारांतश्च ।
तिरैशब्दः रायमतिक्रांतं कुलमिति विग्रहः संध्यक्षराणामिस्तौ ह्रस्वादेशः इति ह्रस्वत्वम् अतिरि
अतिरिणी अतिरीणि २ वारिवत् उपगु उपगुणी उपगूनि तृतीयादौ स्वरादौ वा उपगवा उपगुना इ१
त्यादि मधुवत् ॥ इति स्वरांताः नपुंसकलिंगाः ॥ अथ हसंताः पुंलिंगाः ॥ तत्र हकारांतः अनडुह्शब्दः
नामसंज्ञायां स्यादयः पंचस्वनडुहः आगागमो वक्तव्यः सावनडुहः अनड्वाहस्य सौ परे नमागमो भ
वति अनड्वान्ह् संयोगांतस्य लोपः रसे पदांते च संयोगांतस्य लोपः स्यात् हसेपः सेर्लोपः अनड्वान्
अनड्वाहौ अनड्वाहः । धावम् । अनड्वाह्शब्दस्य चत्वार्शब्दस्य च धौ परे अमागमः स्यात् हे अनड्वन् अथा।
विति विशेषणान्न दीर्घः अनड्वाहं अनड्वाहौ अनडुहः अनडुहा । वासांतस्सेदः । वस्तु स्रंस्तु ध्वंस्तु अनडु।
हां रसे पदांते च दत्वं भवति अनडुद्भ्यां अनडुद्भिः अनडुहे अनडुद्भ्यामित्यादि अनडुह् इति सिध्यते वसां
रसे इति दः खसे चपा झसानामिति तत्वम् । दादेर्घः । दादेर्धातोः हस्य घत्वं भवति धातोः झसे परे नाम्न
अरसे पदांते च गोदुग्घसि इति सिध्यते । आदिजबानां झभांतस्य झभाः स्वोः धातोः झभांतस्य वर्तमानानां जु

सा॰ झभावंति सकारेस्थपाह्वेचपरे नाम्नःचरसेपदांतेच। ववसाने। अवसानेवर्तमानानांझसानांज
१९ बाश्चपाश्चकाभवंति गोधक्। गोधग् गोदुहौ गोदुहः हेगोधुक् हेगोधुग् हेगोदुहौ हेगोदुहः गोदु
13 हं गोदुहौ गोदुहः गोदुहा भकारौहादेर्घेइतिचत्वेकृते श्चादिजबस्यटकारस्यधकारेकृते जभाज॰
भे गोधुग्भ्याम् गोधुग्भिः गोदु हेगोदुग्भ्यां गोधुग्भ्यः गोधुक्षुसुइतिस्थिते खसेचपाझसानामिइ
तिधस्यककारेकृते किलात्सक्षइतिषत्वम् कषसंयोगेक्षः गोधुक्षु मधुलिह् शब्दस्यभेदः। होढः।
धातोर्हकारस्यढकारोभवतिझसेपरे नाम्नश्च रसेपदांतेचवावसानेइतिढकारस्यडकारटकारौ मधु
लिट् मधुलिड् मधुलिहौ मधुलिहः हेमधुलिट् हेमधुलिड् मधुलिहं मधुलिहौ मधुलिहः मधुलि
ह्रा मधुलिड्भ्यां खसेचपाझसानामितिटः मधुलिट्सुइत्यादि। द्रुहादीनांढत्वघत्वेवा। द्रुहादीनां।
धातूनांहकारस्यढत्वघत्वेवाभवतः धातोर्वसेपदांतेच नाम्नःचरसेपदांतेचमित्रध्रुक् मित्रध्रुग्
मित्रध्रुट् मित्रध्रुड् मित्रध्रुहौ मित्रध्रुग्भ्यां मित्रध्रुड्भ्याम् मित्रध्रुग्भिः मित्रध्रुड्भिरित्यादि द्रुह् मुह् ष्णुह्
ष्णिह् चतेद्रुहादयः। नशोकद्रुहः रेफांताःचतुर्शब्दोनित्यंबहुवचनांतः त्रिलिंगः। चतुरासो
वे। चतुर्शब्दस्यामागमोभवति पंचसुघौट्सुसौचेपंचस्विति स्त्रीलिंगवर्जलिंगयोः समासे प्रियःचत्वा
रोयस्य यस्यावासौप्रियचत्वाः प्रियचत्वारौ प्रियचत्वारः सौचेति चकारादोविधिर्यनभवति धावम
हेप्रियचत्वः हेप्रियचत्वारौ। हेप्रियचत्वारः चतुरः चतुर्भिः चतुर्भ्यः २। रसंख्यायाः। रेफांत १९

स्य सर्वां व्यायाः परस्मान्मोऽनुर्भवति एत्वं च हित्वं च चतुर्ष्वपि नकारान्तो राजन्शब्दः नोपधा-
याश्चेति पंचसु दीर्घः । नाम्नो नो लोपशधौ । नाम्नो नकारस्यानागमजस्य लोपः स्यादन्ते पदे
तेच अधौ राजा राजानौ राजानः अधाविति विशेषणात् हेराजन् हेराजानौ हेराजानः अल्लोपः
स्वरे अवमसंयोगादनोऽस्वरे इत्यकारलोपः ल्लोः श्रुभिः श्रुरिति श्रुत्वेन नस्य जकारे कृते जञोर्ज्ञः
नकारजकारयोगे ज्ञो भवति राज्ञः राज्ञा लोपपिशाचवन्न संधिरिति नियमात् अदीर्घत्वं नास्ति
राजभ्यां राजभिः राज्ञे राजाभ्यां राजभ्यः राज्ञाम् इत्यादौ लोपशि जाते संधिर्भवति राज्ञः राज-
भ्यां राजभ्यः राज्ञः राज्ञो राज्ञां वेज्योरिति वकारलोपः राज्ञि राजनि राज्ञोः राजसु एवं यज्वन्
आत्मन् अर्मन् प्रभृतयः अवमसंयोगादिति विशेषणादल्लोपो नास्ति यज्वनः यज्वनेत्यादि श्वन् युवन्
मघवन् शब्दानां पंचस्व राजन्नाहूवत्प्रक्रिया शसादौ तु विशेषः । श्वादेर्वेनः । श्वादेर्वकारस्योत्वं
प्राप्नोति शसादौ स्वरे परे तद्धितप्रत्ययेपि ईकारे च शुनः शुना श्वभ्यां श्वभिरित्यादि युवन्शब्दस्य तु
वत्वस्योत्वे कृते सवर्णे दीर्घः सह यूनः यूना युवभ्यामित्यादि मघवन्शब्दस्य तु वस्योत्वे कृते उ ओ
मघोनः मघोना मघवभ्यामित्यादि + धुट्परे पथ्यादीनामिकारस्याकारादेशो भवति । थोन्थ् । प-
थ्यादीनां थिकारस्य न्थ आदेशो भवति पंचस्वरपरे पन्थान् सिद्धस्तिष्ठति । आ सौ । पन्थ्यादीनां टेरा-
त्वं स्यात् सौ परे पन्थाः पन्थानौ पन्थानः हे पन्थाः हे पन्थानौ । पथां टेः । पथिमथ्यादीनां लोपो भ-

२+ पथिमथ्यादेस्सभेदः । इनोऽन्तं चस्व । पंचस्वसादि +

सा॰ १४

14

वति घुमादौ स्वरे परे पथः पथा पथिभ्यां पथिभिरित्यादि एवं मथिन् ऋभुक्षिन्शब्दौ दंडिना
स्यभेदः। इन्हांपूषोमो। इन् हन् पूषन् अर्यमन् एषांशौसौश्चधौपरेउपधायादीर्घःस्यात् दंडी, दं
डिनौ दंडिनः हे दंडिन् दंडिना दंडिभ्यां नाम्नोनोलोपश्चाधौ एवं अर्यमन्शब्दः अर्यमा अर्य
मनौ अर्यमाणः अर्यमणः अर्यमणा अर्यमणो अर्यम्णाइत्यादि पूषा पूषणौ पूषणः पूषणं
पूषणौ पूषन्शब्दस्यघुमादौस्वरेपरे टेलोपोवावक्तव्यः पूषः वा पूष्णः पूषा वा पूष्णः पूषा
भ्यां पूषभिरित्यादि एवं ब्रह्महा ब्रह्महणौ ब्रह्महणः हे ब्रह्महन् ब्रह्महणं ब्रह्महणौ घुमा
दौत्वलोपः। हनोघ्न। हन्तेर्धातोर्हस्य घत्वं स्यात् नकारेणिति च परे घसंयोगे णत्वनिषेधार्थः।
ब्रह्मघ्नः ब्रह्मघ्ना ब्रह्महभ्यामित्यादि। स्नः। षकाराणकाराभ्यांसंयोगेस्नइत्यत्वंभवति सुस्नट्
निसिद्धंभवति अर्वन्शब्दस्यसौपरेउपधादीर्घः हसेपः सेर्लोपः नाम्नोननोपश्चाधौ अर्वा द्विवच
नादावर्वन्शब्दस्यतृआदेशः ऋकारोनुबंधः पंचमन्नुमागमः नश्चापदांतेजसे अर्वंतो नञ्स
मासेऽर्वन्शब्दस्यनतृआदेशः ततोराजवत् संख्याशब्दाः पंचन्प्रभृतयोबहुवचनान्ताः त्रिषुलिं
गेषुसदृशाः पंचन्जसइतिस्थिते ॥ जस्शसोर्लुक् ॥ षकारनकारांतायाः संख्यायाः परयोः जं
श्शसोर्लुग्भवति लुकिनतन्निमित्तम् लुकिलोपेसति तन्निमित्तकार्यंनभवति। पंच २ पंचभिः
पंचभ्यः २। स्नः। षकारनकारांतायासंख्यायाः परस्यामोनुडागमोभवति नोपधायाइतिदीर्घःना। १४

ष्णोर्लोपश्चाष्टौ पंचानाम् पञ्चसु पंचसमन् नवन् दशान् प्रभृतयः । अष्टनो वाडौ । अष्टन्शब्दात्प
रयोः जश्शसोर्वा औत्स्यात् डित्वात् टिलोपः अष्टौ अष्ट । वाम् । अष्टन आत्वविभक्तिषु परासु ।
आत्वं वा स्यात् अष्टाभिः अष्टभ्यः अष्टानां अष्टसु मकारान्त इदंशब्दः । इदमो यं पुंसि । इदंशब्द
स्य पुंसि सिविषये अयं भवति सिसहितस्य अयं द्विवचनादौ । त्यदादेः सर्वत्र टेरः स्यादित्यकार इद
अ औ इति स्थिते । दश्च मः । त्यदादीनां दस्य मत्वं भवति स्यादौ परे । इमौ इमान् । अन टौसोः । इदमना
देशः स्यात् टौसोः परयोः अनेन अनयोः । स्पः । इदमः सकारे भकारे च परे अकारः स्यात् हलस्त्व
स्य अद्वीत्यात्वम् । आभ्यां भिस्त भिस्त । इदमदसोः भिस भिस एव स्यात् न तु भकारः स्यात् एस्मि
बहुत्वे एभिः अस्मै आभ्यां एभ्यः अस्मात् आभ्यां एभ्यः अस्य अनयोः एषां अस्मिन् अनयोः एषु किं
शब्दस्य त्यदादत्वे स्यादाविति सर्वत्राकारे कृते सर्वशब्दवद्रूपं नेयम् कः कौ के कं कौ कान् केन ।
काभ्यां कैः कस्मै काभ्यां केभ्यः कस्मादित्यादि प्रशान्शब्दस्य भेदः । मो नो धातोः । धातोर्मकारस्य
नकारादेशो भवति हसे पदान्ते च प्रशान् प्रशामौ प्रशामः प्रशामं प्रशामौ प्रशामः प्रशामा प्रशा ।
न्भ्यां प्रशान्भिरिति । अथ टकारान्तः तत्त्वबुध्शब्दः तस्य हसे पदान्ते च आदिजबानामिति बकारस्य ।
चावसाने इति तकारटकारौ तत्त्वभुत् तत्त्वभुद् तत्त्वबुधौ तत्त्वबुधः हे तत्त्वभुत् हे तत्त्वभुद् तत्त्वबु ।
धा तत्त्वभुद्भ्यां तत्त्वभुद्भिरित्यादि जकारान्तः सम्राजशब्दः । छशषराजादेः षः । छकारान्त सकारान्तस्य

सा. षकारांतस्य राजन्यज मृज सृज भ्राजादेश्च षकारः स्यात् धातोर्झसेपरेनाम्नश्चरसेपरांतेच षस्य ष-
१५ त्वेडत्वनिषेधार्थम् आख्यातोदोडत्वंनास्तितेन द्वेष्टीत्यादौडत्वंनास्ति। षोडः। षकारस्यडकारः स्या
15 त् धातोर्झसेपरेनाम्नश्चरसेपरांतेच वावसाने इतिटकारडकारौ सम्राट् सम्राड् सम्राजौ सम्रा-
जः सम्राजा सम्राड्भ्यामित्यादि एवंविराजादयः टकारांताः स्पृट् तृट् पट् शब्दाः तेषांत्यादेष्वेरइति
सर्वत्राकारेकृते सर्वशब्दवद्रूपंनेयं। त्यः। त्यदादेस्तकारस्यसोपरे सत्वंभवति स्यः त्यौ त्ये त्यम् त्यौ
त्यान् त्येन त्याभ्यां त्यैः त्यस्मै त्याभ्याम् तेभ्यः इत्यादि सः तौ ते यः यौ ये षत्वं एषः एतौ एते। एतदोन्वादे
शे। द्वितीयाटौस्स्वेनोवावक्तव्यः उक्तस्यपुनःकथिरन्वादेशः एनं एनौ एनान् एतेन एनेन एनयोः
एनयोरित्यादि छकारांतः तत्त्वप्राच्छ्शब्दः षत्वेन्तत्वेच वावसाने तत्त्वप्राट् तत्त्वप्राड् तत्त्वप्राच्छौ
तत्त्वप्राच्छः इत्यादि। थकारांतः अग्निमथ्शब्दः वावसानेइतिविपाजबाश्च अग्निमथ् अग्निमद् अ
ग्निमथौ अग्निमथः इत्यादि चकारांतः प्रतिअञ्च्शब्दः। अचेः। पंचमसंदवक्तव्यः प्रतिअञ्च् इति स्थि
ते स्तोः श्चुभिः श्चुरितिञः संयोगांतस्यलोपः। चोः कुः। चवर्गस्यकवर्गादेशोभवति। धातोर्झसे-
नाम्नश्चरसेपरांतेच यथासंख्येनप्रत्यङ् प्रत्यञ्चौ प्रत्यंचः हे प्रत्यङ् प्रत्यंचं प्रत्यंचौ। अचेर्लो-
पोदीर्घश्च। अचेतोलोपोभवति पूर्वस्यचदीर्घः शसादौस्वरेपरेतद्धितप्रत्यये ईपिईकारेचपरे
प्रतीचः प्रतीचा प्रत्यग्भ्यां प्रत्यग्भिरित्यादि तिर्यञ्च्शब्दः तिर्यङ् तिर्यंचौ तिर्यंचः तिर्यंचं तिर्य १९

चौ । निरश्चादयः । निरश्चादयो निपात्यंते प्रागासादौ स्वरे परे तद्धितप्रत्ययेऽपि ईपिईकारेच निरश्चः
निरश्चा निरश्चभ्यां निरश्चत्सु । तद्वदुदीचः । तद्वदुदङ्शब्दस्य उदीच् निपात्यते समासादौ स्वरे परे तद्धित
तप्रत्ययेऽपि ईकारे च उदीचः उदीचा उदग्भ्यां उदक्षु उकारांतो महच्छब्दः वावसाने महान् महत्
महांतौ महांत इत्यादि एवमग्निचित्प्रभृतयः महच्छब्दः उकारांतः उकारानुबंधः । नुंतोनुम् । उ
कारानुबंधस्य ऋकारानुबंधस्य च नुमागमो भवति घुटि पंचस्वपरेषु परेषु । सान्महतो धौ दीर्घः शौ
च । सान्तस्य शब्दस्य अप्शब्दस्य महच्छब्दस्य च दीर्घो भवति पंचस्वपि वर्जितेषु शौ च परे संयोगा
तस्य लोपः महान् महांतौ महांतः हे महन् महांतं महांतौ महतः महता महद्भ्यां महद्भिरित्यादि
तकारांतः उकारानुबंधो भवच्छब्दः । अत्वसोः सौ । अत्वंतस्य असंतस्य च उपधाया दीर्घः स्यात् धि
वर्जिते सौ परे भवान् भवंतौ भवंतः हे भवन् भवंतम् भवंतौ भवतः भवता भवद्भ्यां भवद्भिरित्या
दि ऋकारानुबंधस्य भवतः शब्दस्य नुमागम एव न तु दीर्घः भवान् भवंतौ भवंत इत्यादि एवं पचच्छ
ब्दः पचन् पचंतौ पचंतः हे पचन् पचंतम् पचंतौ पचतः पचता पचद्भ्यामित्यादि ॥
तथा पठच्छब्दः पठन् पठंतौ पठंत इत्यादि शकारांतो विश्शब्दः छशषराजादीनां ष इति षत्वम् डत्वं
च वावसाने विट् विड् विशौ विशः विशा विड्भ्यां विट्सु षष्शब्दो नित्यं बहुवचनांतः त्रिषु लिंगेषु
समरूपः । जस्शसोर्लुक् षोडः षट् षड् षड्भिः षड्भ्यः स्वरतो नुमागमः षोडः षट् षड् णां इति स्थिते हलः ।

सा॰
१९
16

संख्यासम्बंधिनोडस्यणः स्यात् नामिपरे षुभि षुः षसाम् षस्सु दोर्दत्यात् आविदस्परांतेपिप॰

दांतताश्रयणीया। दोषांतः। दोष् सजुष् आशिष् हविष् प्रभृतीनां षस्य रेफः स्यात् रसेपदांतेच

दोः दोषौ दोषः हे दोः दोषं दोषौ पदंसादौ स्वरेपरे अनेनतावावक्तव्या अल्लोपइति अकारलोपः दोषः

दोष्णः दोषा दोष्णा दोर्भ्यां दोर्भिः दोषि दोष्णि दोषणि दोषोः दोःसु देःषु। सजुषाशिषोदीर्घोवक्त

व्यः॥ रसेपदांतेच सजूः सजुषौ सजुषः सजुषा सजुषाशिषोरः रसेपदांतेच दीर्घोवक्तव्यः सका॰

रांतः पुम्स्शब्दः। पुंसोसुट्। पुमस्शब्दस्यपंचस्वसुटागमोभवति उकारोन्त्यादेशार्थः उकारोनुम्वि

धानार्थः पुमम्स्सिइतिस्थिते उगितोनुम् इतिनुम् न्सम्हन्इतिदीर्घः संयोगांतस्यलोपः सस्य पुमान्

पुमांसौ पुमांसः हे पुमन् पुमांसं पुमांसौ पुंसः पुंसा पुंभ्यां पुंभिः पुमांसौ पुमांसः हे पुमन् पुमांसं पुमांसौ पुंसः

पुंसा पुंभ्यां पुंभिः॥ असम्भवेपुंसः ककारो। असम्भवेर्थे वेदांतैकवेद्यस्यात्मनो बहुत्वसम्भवेवा

च्येसति पुंस्शब्दस्यककारागमोभवतिसोपरे अकारउच्चारणार्थः पुंस्कः। स्कोराद्यो। संयोगाद्योः

सकारककारयोः लोपोभवति कषसंयोगेलः तेनपुंवत् एवंविद्वस्शब्दः विद्वान् विद्वांसौ विद्वां॰

सः हे विद्वन् विद्वांसं विद्वांसौ। वसोर्वःनमः। वस्प्रत्ययस्ववकारउत्वंप्राप्नोति समासेस्वरेपरे उद्धितेईपि

ईकारेच विदुषः विदुषा। वसांरसेदः। विद्वद्भ्यां विद्वद्भिः विद्वत्सुइत्यादि स्ववचस्शब्दः सकारांतः अ॰

त्वसोस्वाविनिदीर्घः स्ववचाः स्ववचसौ स्ववचसः हे स्ववचः स्ववचसारिसोविसर्गःहवेइतिनत्वम् स्ववचोभ्यां १९

न्द्वचोभिः एवं चंद्रमस्शब्दाः उपानह्शब्दस्य भेदः। उपानसं। उपानसत् पुरुदंसम् अनेहस
एवं सेरधेर्डोभवति डित्वात् टिलोपः उपाना उपानसौ उपानसः। उपानसोधावनंतता। सांतता। अ
दन्तनावावन्तर्या हेउपानन् हेउपानः हेउपान हेउपानसौ हेउपानसः। यथामाधवनितिनिर्वहेत्र
णांत्विगांतेन पुंसके व्यंजनपदावरिष्णः संबोधनेवोपानसः विनूपनांतेतथासांतमथाप्यदंतम् अ
दस्शब्दस्य भेदः त्यादेष्वेरदृतिटेसर्वेव्याकारेकृते अदस् इति स्थिते। सौसः। सोकारे परे अदसः द
कारस्य सः स्यात्। सैरौ। अदसः सैरौकारादेशः स्यात् असौ द्विवचने अद औ इति स्थिते। दास्यमः अ
दसः दकारस्य मत्वं भवति माद् उच ऊच ऊ इति विग्रहः अदसो सकारात्परस्य ऋस्य उका
रो भवति दीर्घस्य दीर्घ ऊकारः स्यात् अमू बहुवचने सर्वादित्वात् जसी अद ए अमे इति स्थिते
एरी। बहुत्वे। बहुवचने सति अदसः एकारस्य ईकारः स्यात् अमी अमुम् अमू अमून् मत्वे उत्वे
च कृते टाना स्त्रियाम् अमुना द्विवचने अङ्गीत्वात्वम् पश्चाद् ऊकारः अमूभ्याम् अमीभिः अमुष्मै अ
मूभ्यां अमीभ्यः अमुष्मात् अमूभ्यां अमीभ्यः अमुष्य ङसि एत्वयादेशे च कृते पश्चाद् उकारः अमु
योः अमीषां अमुष्मिन् अमुयोः अमीषु समानान्ये अदसः कस्मादि वक्तुं अमुकः अमुकौ अमुकार्
त्यादि॥ इति हसंताः पुंलिंगाः॥ अथ हसंताः स्त्रीलिंगाः॥ नचहकारात् उपानह्शब्दः। नहोधः। नहो
हस्य धादेशः स्यात् असेपदांतेच वावसाने दस्य उत्वंच उपानत् उपानद् उपानहौ उपानहः हे उपान न।

सा.
१७
17

हे उपानत् उपानहौ उपानहः उपानहा उपानद्भ्यामित्यादि वकारान्तो दिव्शब्दः। दिव औत् सौ
पदे दिवो वस्य औः स्यात् द्यौः दिवौ दिवः हे द्यौः। वाम्। दिवो वस्य आ वा स्यात् अमि परे द्याम् दिवम्
दिवौ दिवः उत् से दिवो वस्य रसे परे उः स्यात् द्युभ्यां द्युभिः रेफान्तश्चत्वारशब्दो नित्यं बहुवचनान्तः। त्रिच
तुरोः स्त्रियां तिसृ चतसृ वत्। स्त्रियां वर्तमानयोः त्रिचतुरशब्दयोः तिसृ चतसृ इत्येतावादेशौ भवतः
ऋकारस्य ऋकारवत् उत त्वरात् ह्रस्वात् न भवति तिस्रः २ चतस्रः तिसृभिः चतसृभिः। न तिसृ चत
सृ दीर्घो नामि स्यात् छन्दसि वा तिसृ चतसृ इत्येतयोः दीर्घो न भवति नामि परे छन्दसि वा भवति तिसृ
णाम् तिसृणाम् चतसृणाम् चतसृणाम् तिसृषु चतसृषु अथ रेफान्तो गिर्शब्दः। वोर्वि ह्रसे।
धातोर्विकारे वकारयोः दीर्घः स्यात् रेफवकारयोः ह्रस्परयोः गीः गिरौ गिरः हे गीरित्यादि एवं पुर्
धुरादयः धकारान्तः समिध्शब्दोवावसाने समित् समिद् समिधौ समिधः हे समित्यादि। अथ भ
कारान्तः ककुभ्शब्दः ककुप् ककुब् ककुभौ ककुभः हे ककुबित्यादि दकारान्ताः त्यदादयः तेषां
त्यदादेष्टेरिति अकारान्तानीमानि स्त्रियां वर्तमानात् आप्प्रत्ययो भवति। पकारः पिल्लोपार्थः। सव
र्णे दीर्घः सहेति दीर्घत्वे कृते स्त्रीलिंगे सर्वशब्दवद्रूपं नेयम् स्या त्ये त्याः त्यां त्ये त्याः त्यया त्याभ्यां त्या
भिः त्यस्यै इति। सा ते ताः तां ते ताः तया ताभ्यां ताभिः तस्यै ताभ्यां ताभ्यः तस्याः ताभ्यां ताभ्यः तस्याः तयोः
तासां तस्यां तयोः यायेयाः यां ये याः एषा एते एताः एतां एनां एते एने एताः एनाः एतया एनया एताभ्यां १७

एताभिः एतस्यै एतयोः एतयोः एवं किंशब्दः का के काः अथ मकारांतस्य इदंशब्दस्य भेदः ॥
इयं स्त्रियाम् । इदम्शब्दस्य स्त्रियामियंभवति सौ परे इयं इमे इमाः अनया आभ्याम् आभिः
अस्यै आभ्यामित्यादि । अथ चकारांतः त्वच्शब्दः चोकुः वावसाने त्वक् त्वग् त्वचौ त्वचः ए
वं स्रच् वाच् प्रभृतयः पकारांत अप्शब्दो नित्यं बहुवचनांतः अप्भ्यामितिस्थिते न्सम्महतोरि
ति दीर्घः आपः द्वितीयबहुवचनेतु न दीर्घः अपः । भिरोपाम् । अबादीनां भे परे दस्स्यात् अद्भिः अद्भ्यः
अपां अप्सु शकारांतो दिश्शब्दः स्त्रीलिंगः । दिशादेः दिश् दृश् स्पृश् इत्यादौ रसे पदांते च कत्वं
स्यात् दिक् दिग् दिशौ दिशः दिशं दिशौ दिशः दिशा दिग्भ्याम् षकारांतो द्विविष्शब्दः षोडइति
डः वावसाने इतिटः त्विट् त्विड् त्विषौ त्विषौ त्विषौ त्विषः त्विड्भ्यां त्विड्भिः आशिष्शब्दः सज्जुषत् ।
आशीः आशिषौ आशिषइत्यादि स्त्रीलिंगस्यादस्शब्दस्य सौ न विशेषः अतो द्विवचनादौ त्यादेरत्व
इति टेरत्वे कृते नेत्वं आवतः स्त्रियामिति आप् दीर्घत्वं विभक्तिकार्यं च पश्चान्मादूदीति ह्रस्वस्य ह्रस
उकारः दीर्घस्य दीर्घः ऊकारः अमू अमूः अमूं अमू अमूः अमुया अमूभ्यां अमूभिः अमुष्यै अमू
भ्यां अमूभ्यः अमुष्याः अमूभ्यां अमूभ्यः अमुष्याः अमुयोः अमूषां अमुष्यां अमुयोः अमूषु ॥
इति हलंताः स्त्रीलिंगाः ॥ अथ हलंता नपुंसकलिंगाः ॥ तत्र रेफांतो नपुंसकलिंगो वार्शब्दः नपुंसका
त्स्यमोर्लुक् वाः २ वारी २ वारि २ अयमइतिविशेषणात् त्वं न भवति वार्भिः चतुर्शब्दः अस्मात्स्यमो

सा॰
१८

वेति ग्रामचत्वारि २ चतुर्भिः चतुर्भ्यः २ चतुर्णां चतुर्षु नकारांतो ह्नन्शब्दः। अह्नोपः। अहन्शब्द
स्य सकारः स्यात् रसे पदांते च परे ह्रोर्विसर्गः अहः ईमौ वेद्वे अह्नी अहनी अहानि २ हे अहः अह्नः १
अह्नो अह्नाम् अह्नि अह्नोः अहस्सु ब्रह्मन्शब्दस्य रसे पदांते च नलोपः ब्रह्म २ ब्रह्मणी २ ब्रह्माणि
२ ब्रह्मन्शब्दस्य संबोधने नकारस्य लोपो वा वक्तव्यः हे ब्रह्मन् हे ब्रह्म ब्रह्मणः ब्रह्मभ्यां ब्रह्मभिः। एवं
चर्मन् कर्मन् शर्मन् प्रभृतयः नोनादेर्दन्ताच्च स्म्नन्तसिद्धिः अपो वा लोपः परमे व्योमन् व्योम्नि वा सर्वभूता१
नि सर्वभूतानि स्यदादीनां स्यमोर्लुकि कृते टेरत्वं न भवति स्यादौ इति विशेषणात् वावसाने त्यद् त्यत्
द्विवचनादौ तु टेरत्वे कृते सर्वशब्दवद्रूपं त्ये त्यानि तत् तद् ते तानि इदं इमे इमानि तृतीयादौ सर्ववत् एवं१
त् चकारांतः प्रत्यच्शब्दः अन्वेरलोपो दीर्घश्च चोऽङ्गः प्रत्यक् प्रतीची प्रत्यञ्चि २ प्रतीचा प्रत्यग्भ्यां
तकारांते जगच्छब्दः जगत् जगती जगंति २ महच्छब्दस्य भेदः न्सम्महतोरिति दीर्घः महत् महती महां
ति २ महता महद्भ्याम् सकारांतः पयस् तेजस् वर्चस् वचस्प्रभृतयः पयः पयसी पयांसि २ पयो१
भ्याम् पयसा अदस्शब्दस्य स्यमोर्लुकि कृते स्रोर्विसर्गः अदः द्विवचनादौ टेरत्वे कृते मन्वोत्वे अमू
अमूनी अमूनि नामिनः स्वरे इति नुः अमुना अमूभ्यामित्यादि ॥ इति हसंतानपुंसकलिंगाः ॥ अथैता१
नी युष्मदस्मदोः स्वरूपं निरूप्यते ॥ तयोश्चावाच्यलिंगत्वात् त्रिष्वपि लिंगेषु समानं रूपं निरूप्यते। त्वमहं
सिना। युष्मदस्मदोः सिसहितयोः त्वम् अहम् आदेशौ भवतः यथासंख्येन त्वम् अहम्। वावौ द्विव १८

वने । युष्मदस्मदोर्द्विवचने परे युव आव आदेशौ भवतः । युवावौ । युष्मदस्मदोः पदान्तय आम्भवति
युवाम् आवाम् ॥ यूयंवयंजसा । जसासहितयो युष्मदस्मदोः यूयंवयमादेशौ भवतः यूयम् ।
वयम् । त्वन्मदेकत्वे । एकत्वेगम्यमाने युष्मदस्मदोः त्वत् मत् आदेशौ भवतः त्वत् मत् । आम्नो ।
युष्मदस्मदोः टेरत्वंस्यात् अमिमकारेभिसिचपरे त्वांमांयुवाम् आवाम् युष्मदस्मदोः त्यादादेः
शत्वेकृते षासीनिर्दीर्घः शसोनोवक्तव्यः युष्मान् अस्मान् त्वन्मदादेशेकृते । टाङ्योः । युष्मदस्म
दोः टेरेत्वंभवति टाङिङसु इत्येतयोः परयोः अयादेशः त्वयामयायुवाभ्यां आवाभ्यां युष्माभिः । तुभ्यम
ह्यंङया । ङयासहितयोः युष्मदस्मदोः तुभ्यंमह्यमादेशौ भवतः तुभ्यम् मह्यम् । भ्यसभ्यम् । युष्मद
स्मदोः परोभ्यस् भ्यमादेशंप्राप्नोति युष्मभ्यम् अस्मभ्यम् शकारोभकारादित्वाव्यर्थः तेनात्वमेत्वं
नभवतः । ङसिभ्यसोः त्तः । पंचम्याः ङसिभ्यसोः त्तभवति शकारः सर्वादेशार्थः उकार उच्चारणार्थः
त्वत् मत् युवाभ्याम् आवाभ्याम् युष्मत् अस्मत् । तवममङसा । ङसासहितयो युष्मदस्मदोः तवम
मआदेशौभवतः तवमम युवयोः आवयोः सर्वादित्वात्सुट् । सामाकम् । युष्मदस्मद्भ्यांपरःसाम्
आकम्भवति युष्माकम् अस्माकम् अस्मयोरित्यनेननङेरत्वंभवति त्वयिमयियुवयोः आवयोः युष्मा
सु अस्मासु । अथानयोरादेशाभिस्तेमेवान्नौवस्नसौ । युष्मदस्मदोः यथासंख्येनअमीभवन्ति कीदृशयोः
षष्ठीचतुर्थीद्वितीयासहितयोः तत्रैकवचनेतेमेभवतः द्विवचनेवांनौभवतः बहुवचनेन वस्नसौभव

सा.
१९
19

नः स्वामीतेममसमायातः स्वामीमेसांप्रतंगतः नमस्तेभगवान्हृदयेदेहिमेमोक्षमव्ययम् स्वामीवांसज्ज-
ह्रामोऽद्यैरिष्टानोदानयाचनाम् राजावांदास्यतेग्रामंत्रानेनोमधुसूदनः देवोवामवताद्विष्णुर्नरकान्तोज-
नार्दनः स्वामीवोबलवान्राजास्वामीनःसज्जनार्दनः नमोवोब्रह्मविद्भ्योज्ञानेनोदीयतांधनम् सानन्दा
न्वः प्रपश्यामः पश्यसेनः सुहृद्भिःविनान् । त्वमामा । अमावस्विनयोर्युष्मदस्मदोः त्वामाआदेशौभवतः प
पूर्णामित्वामहालीढपद्मामामद्यभेदकम् । नाद्यौ । पदादौवर्तमानयोः युष्मदस्मदोः एतेआदेशानभवन्ति
वस्तस्मादयः । संबोधनपदस्यैनभवंतिवस्मादयः तववेशश्चवोराजन्ममेतेष्णानिशत्रवः तवमित्राणि
थानिस्युः ममामित्राणितान्यपि देवास्मान्पाहिन्टहरेविश्वोस्मात्रत्सर्वनः सहेविश्वेश्वरोदेवोयुष्माकं
कुलदेवता सएवभगवान्नोस्मदस्माकंपापनाशनः हेरामतवदासोस्मिहेवामहब्भ्यंनमः पदादावितिकिं
पातुवोनरसिंहस्यनखलांगूलकोटयः हिरण्यकशिपुवक्षःक्षेत्रासृक्कर्दमारुणाः ॥ इतिनामप्रक्रिया ॥
चादिभिश्च । तवचममचमैत्रीचेंदुलेवप्रवर्धते चादिभिर्योगेनतेआदेशानभवन्ति । चादिर्निपातः ॥
चवाहस्वहएवएवंनूनंपृथक् विनानानानास्ति अस्तिदोषानकंपृच्छामिथ्यामिथ अथअहोस्वस्व-
स्ति उश्रत्तीचैस्वर् अन्तर् प्रातर् पुनर् भूयम् अहोसित् ननु सहनाम ऋतेअन्तरेणअन्तरानमस् अल-
म्हते अमानाप्रतिषेधेरेमनुकिलखलुवैआरात् ह्रात् भूषायननुनतस्वधाच इत्येवंचादिनिपाता-
संज्ञोभवति । तद्वादिगणोविभक्तयर्थेनिपात्यते तस्मिन् तत्र यस्मिन्यत्र कस्मिन्कुत्र तस्मिन्कालेतदा १९

यदा तस्मिन्काले कदा कस्मिन् एकस्मिन्काले एकदा तेन प्रकारेण तथा येन प्रकारेण यथा केन प्र
कारेण कथम् । अनेन प्रकारेण इत्थम् । तस्मात् ततः कस्मात् कुतः यस्मात् यतः । सर्वविभक्तिकात्तसि
के पूर्वस्मिन्निति पुरस्तात् अधरस्मिन् अधस्तात् परस्मिन्परेण दक्षिणा विवस्मिनि चाण्डालः । अपिव
`` रे । इत्यर्थे अहि प्रत्ययो भवति । किमः सामान्ये चिदादिः । किंशब्दात्सामान्यार्थे चिदादिप्रत्ययो भवति
कश्चित् कश्चन क्वचित् क्वचन । तद्धिताकान्यपयोर्वासात् रात्रेसात् भस्मसात् गर्वधीनं धनं गुरु
मात् । तत्पुरुषे स्वीकरणे । तरीकृत्य तरीकृत्य । सद्यआदि कालेनिपात्यते । सद्यः अद्य सपदि अधुना
इदानीम् साम्प्रतं शाश्वतं पात्रे सर्वेद्युः अन्येद्युः अपरेद्युः यदि यर्हि तर्हि कर्हिचित् अलम् ॥
प्रादिरुपसर्गः । प्रपरा अपसम् अनुअवनिर्दुर्विआङ् निअधि अपि अतिसुउत् अभिप्रतिपरि
उप उपसर्गवशाद्धात्वर्थो नरविलासकृत् प्रहाराहारसंहारविहारपरिहारवत् अयंगणस्तूपसर्गकः
प्राग्धातोरुपसर्गः । उपसर्गाः धातोः प्राक्प्रयोक्तव्याः । तदव्ययम् । तदिदं चादि शाहयुपसर्गमव्ययं स्यात् ।
क्त्वाद्यंतेच ॥ क्त्वादिप्रत्ययान्तकृतः शब्दो व्ययसंज्ञो भवति । अव्ययाद्विभक्तेर्लुक् । अव्ययाद्विभक्तेर्लुग्भ
वति । तथाहि निर्देशो । अव्ययानां च न लिंगादिनियमः । तथा चोक्तम् । सदृशं त्रिषु लिंगेषु सर्वासु च विभ
क्तिषु वचनेषु सर्वेषु यन्न व्येति तदव्ययम् । उक्तान्यलिंगान्यव्ययानि । अथ नालिंगविशेषविधिविः
जित्वाप्ययिपयास्त्रीप्रत्ययाः प्रदर्श्यंते आवतः स्त्रियाम् अकारान्तान्नाम्नः स्त्रियां वर्तमानात् आप्प्र

सा. २० 20

लयोभवति जायामायामेधाश्रद्धाइत्यादि। अजादेस्त्राप्प्रत्ययः। अजा एडका कोकिला शूद्रा बाला
गणिका। कात्यतः। कापिपरेपूर्वस्याकारस्यइकारोभवति कारिका पाचिकापाचिका पाटिका
वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः आपंचैवहलंतानांयथावाचादिशादिशः। कस्वोवा। का-
पिपरेऽवर्णस्यकस्वोवास्यात् वेणिका वेणीका नदिकानदीका। तरसोश्च। श्रियसितरा श्रियसी-
तरा श्रियसितमा श्रियसीतमा वाग्रहणादेवनिश्चयेन निपातंत्यनेकेष्वर्थेष्विति निपातनं अने-
कार्थत्वात्। तदन्तम्। धातवश्चोपसर्गाश्च निपाताश्चेति तेत्रयः अनेकार्थाहिविज्ञेयाः पाठस्तेषांनि-
दर्शनम् ऋणाईप् नांतात् ऋदंतान्नांतात्स्त्रियामीप्रत्ययःस्यात् दंडिनी कारिणी मलिनी। ई-
पिराज्ञोलोपोवनस्याच्यः। राज्ञीशुनीकद्री। यस्यचलोपः। इव अच्चयाईस्य आश्रयः तस्यलोपोभवति
स्वरेयकारेचपरेगोपगवी। षृतः। षकारटकारउकारधकारांतत्वेधातोस्त्रियांईप्स्यात् ष वराकी ट
कुरुचरी उ गोमती ध्रंपरंतीत्यादि। नदादेः। नदादेर्गणात् स्त्रियामीप्रत्ययःस्यात् नदी गौरी
गौतमी सरस्वती नारी पार्वती चतुर्थीपंचमीइत्यादि। इंद्रादेरानीश्च। इंद्रादेर्गणादानीम्प्रत्ययः
स्यात्। इंद्रानी भवनी इंद्रवरुणभवशर्वरुद्रमृडहिमअरण्ययवयवनमातुल आचार्यएतेइंद्राद-
यः इंद्राणी ब्रह्माणी मृडानी भवानी वरुणानी रुद्राणी शर्वाणी। मातुलोपाध्यायाभ्यांवाआ- २०
नीश् मातुलानी मातुली उपाध्यायानी उपाध्यायी। समाहारेगणाश्च। समाहारेऽर्थेईप्स्यात्गणश्च ॥

हयी गवी। पुंयोगे। शूद्री गणकी चकारान्नेपालकाशीचन। जातेरयोपधात्। जातिवाचिनश्चय-
अयकारोपधाददकारान्तात् स्त्रियामीप्स्यात् मेषी शूकरी कुञ्जी ब्राह्मणी कुक्कुटी अयकारोपधा-
त्किम् क्षत्रिया वैश्या कोकिला बलाका आर्यक्षत्रिययोर्वा ईप्रत्ययो वा आर्यी क्षत्रियी आर्याणी।
क्षत्रियाणी। प्रथमवयोवाचिनः। अयकारोपधात् अकारान्तात् स्त्रियामीप्स्यात् कुमारी किशो-
री कलभी प्रभृतयः। वक्तव्यात्कन्याया नेप्सः। कन्या प्रथमवयोग्रहणात्किम् स्वं स्वकीयमंगं स्वां-
गं तद्वा यद्येषामपि स्वांगमुच्यते यद्वा स्वष्टु शोभनमंगं स्वांगमिति यद्वा सुष्ठु शोभनमासमंतादंगं स्वा-
गमिति स्वस्य प्राणिनो वांगं स्वांगं तस्मात् वृद्धा स्थविरा अजुहृणात्किम् शिखः पुच्छाद्वा दीर्घपुच्छी
दीर्घपुच्छा। स्वांगाद्वा। स्वांगवाचिनः स्त्रियामीप्स्यात् सुगात्री सुगात्रा सुमुखी सुमुखा मृगाक्षी
तन्वङ्गी तन्वङ्गा मृगाक्षीति नियम पद्मवदनाद्यर्थांशे न भवति वा श्रणार्चिरेव अथ स्वांगं किमुच्यते।
अद्रवं मूर्तिमत्स्वांगं प्राणिस्थमविकारजम् अतत्स्थं तत्र दृष्टं च तेन चेत्तत्तथायुतम्। क्तादिकारादक्तेर्वी-
धीवक्तव्यः। अङ्गुली अङ्गुलिः आली आलिः धूली धूलिः अक्तेरिति विशेषणात् कृतिः भूतिः धृतिः
मतिः। पेचमन्वादेः। मत्वादेर्गणात् स्त्रियामीप्स्यात् ऐकारादेशश्च मनायी वृषायी वृषाकपायी। व-
कारान्मनोरौवा मनावी। पत्न्यादयः। पत्न्यादयोपि शब्दा निपात्यन्ते पत्नी अन्तर्वत्नी सपत्नी अशिश्वी।
अर्धजरती युवती प्राची प्रतीची इत्यादयः शब्दाः निपात्यन्ते दारा शब्दो नित्यं बहुवचनांतः पुल्लिंगः

सा. वोर्गुणात्। तकारांताद्गुणवाचिनः वा स्त्रियामी भवति पट्वी पटुः मृद्वी मृदुः तन्वी तनुः ऋज्वी।
२१ ऋजुः। उतनूः। उकारांतादूप्रत्ययो भवति पंगूः वामोरूः। यूनस्तिः। युवन्शब्दात्तिप्रत्ययः स्यात् युवतिः
21 एभ्यो नामत्वात्स्यादयः प्रत्यया भवति आबंतादीबंतात् हसेः परस्सेर्लोपः पूर्ववत्प्रक्रिया ।१॥ इति स्त्रीप्रत्य।
याः॥ अथ कारकप्रक्रिया निरूप्यते ॥ सन्मात्रे लिंगार्थे प्रथमा धातुप्रत्ययाद्यतिरिक्तमर्थवच्छब्दरूपं लिंगं
तस्यैवार्थे सन्मात्रे प्रथमा विभक्तिः स्यात् लिंगादयः प्रथमार्था इति कोविदाः तत्सङ्ग्रहस्य आदिग्रहणेन लिंगं
परिमाणवचनानि ग्राह्याणि यथा लिंगं कुमारी परिमाणो द्रोणो व्रीहिः वचनमेकः द्वौ बहवः रविरिव राजते राजा
लोकाः कुमारीरोहूयते भ्रातृभुज्यते भुवं भूपालः प्राणान् त्रायते रामलक्ष्मणौ संति संतः कियंतः कुमाराः शेरते स्वैरं
रोहूयंते च नायिका जेगीयंते च गीतज्ञाः मेम्रियंते रुजार्दिताः। आमंत्रणे च। आमंत्रणे अभिमुखीकरणे प्र।
थमा विभक्तिः स्यात् मां समुद्धर गोविन्द प्रसीद परमेश्वर कुमारी स्वैरमासाथां हे मधुभो तपस्विनः भोसः भो
स्त् भगोस् अघोस् प्राग्वानिपात्यंते धविषये त्वमस्य भोर्दुराराध्य भगोस्त्वम्भंनमोस्तु ते अधीष्व भो महाप्राज्ञ।
ज्ञानयाचोस्त्वघस्मर्। शेषाः कार्यकारसाधनयोर्हीनमात्रे विज्ञानवधोसंबंध आधारभावयोः शेषाः विभ
क्तयः द्वितीयायाप्तव्येष्वर्थेषु स्युः कार्ये कर्मकारके स्युः उत्पाद्ये आप्ये संस्कार्ये विकार्ये च विभक्तिर्द्वितीया स्या
त् कटं करोति कानकः रूपं पश्यति चाक्षुषः राज्यं प्राप्नोति धार्मिष्ठः सोमं सुनोति सोमपः। अभिसर्वतसोः
कार्या धिगुपर्यादिषु त्रिषु द्वितीयाम्रेडितांतेषु ततोन्यत्रापि दृश्यते ग्राममभितो नदी वहति सर्वतो नगरं। २१

तरवो हृष्यन्ते दिशे दिशे वसन्ते उपर्युपरि ग्रामं अध्यधि ग्रामं अधोधो ग्रामं निधानं निकषा ग्रामं प्रतियोगे वीप्सा
यां द्वितीया प्रति ग्रामं अभिभोज्यं ह्यास्वामिनं । कालाध्वनोर्नैरंतर्ये । कालाध्ववाचकानैरन्तर्येऽर्थे द्विती
या मासमधीते अन्यथा मासस्य द्विरधीते क्रोशं पर्वतः अन्यथा क्रोशस्यैकदेशस्य पर्वतः कर्त
रि प्रधाने क्रियाश्रयसाधने च क्रियासिद्ध्युपकारके करणे तृतीया विभक्तिर्भवति भिन्नः शरेण रामेण रा
वणो लोकरावणः करजेण विदीर्णोपि वानरैर्यथा अतः पुनः दानपात्रे संप्रदानकारके चतुर्थी विभक्तिर्भव
ति वेदविदे ब्राह्मणाय मां गां ददाति तस्मै यवकन्यां ददाति विश्लेषावधौ पंचमी विश्लेषो विभागस्तत्रयो
वधिस्खलनया चलनया वा विवक्षितस्तत्रापादाने पंचमी धावतोश्वादधोपतत् भूभृतोवतरति गंगा ॥
सेम्बन्धे षष्ठी । सम्बन्धिनोर्मध्ये प्रधानो यस्तत्र षष्ठी राज्ञः सप्तसप्तेर्ज्ञेयः पित्रोर्देवतस्पूजनम् गुरूणां
वचनेषु पथ्यं कवीनां रसवद्वचः । आधारे सप्तमी । आधारोधिकरणं षड्विधमधिकरणं औपश्लेषिकं सामी
प्यकं अभिव्यापकं वैषयिकं नैमित्तिकं औपचारिकं चेति कटे शेते कुमारो मोवटे गावः स्वशेरते ति
लेषु विद्यते तैलं हृदि ब्रह्मामृतं परम् युद्धे सन्निहितो धीरोङ्गुल्यग्रे करिणां शतम् । भावे । भावः क्रियाल
क्षणं तत्रापि सप्तमी वर्षति देवे चौरा आयान्तः अस्तंगच्छत्यंशुमालिन्यां निपतितो रातिः ॥ विनाहृत्तम
धते निर्धारणस्वाम्यादिभिश्च ॥ एतैरपि योगे द्वितीयाद्या विभक्तयो भवन्ति विना पापं सर्वं फलति अंत
रेण दृष्णं किंणी विनेन अंतरा ग्राममध द्रुत्यादि परायाह्यं । सहादियोगे तृतीया । सहस्र हृदशाखाकंसा

सा. २२

र्थंसममित्यादियोगेतृतीया सहशिष्येणागतोगुरुः सहशब्दोऽत्रमैत्रेणसाकंनयनाभ्यांसलवणादंताः सार्धं
निभिर्वृतःसाधुः समंचंद्रेणोदितोगुरुः ॥ नमःस्वस्तिस्वाहास्वधालंवषड्योगेचतुर्थी ॥ नमोनारायणा
य स्वस्तिराज्ञे सोमायस्वाहा पितृभ्यःस्वधा अलंमल्लोमल्लाय वषडिन्द्राय । ऋतेइत्यादियोगेपंचमी
ऋतेज्ञानान्नमुक्तिः अन्योगृहाद्विहारः । निर्धारणे । निर्धारणंक्रियागुणजातिभिःसमुदायात्पृथक्करणंत
त्रषष्ठीसप्तम्यौभवतः क्रियापराणांक्रियापरेषुवाभगवदाराधकाःश्रेष्ठाः गवांगोषुवाकृष्णासंप
न्नतमा एतेषामेतेषुवाक्षत्रियाःशूरतमा । स्वाम्यादिभिश्च । स्वाम्यादिभिर्योगेषष्ठीसप्तम्यौभवतः
गवांस्वामी गोषुस्वामी गवामधिपतिः गोष्वधिपतिः । कर्तृकार्ययोरक्तादौषष्ठी । कर्तरिकार्येचषष
ष्ठीविभक्तिर्भवतिक्तादिवर्जितेकृदंतेशब्दे प्रयुज्यमाने व्यासस्यकृतिः भारतस्यश्रवणं । स्मृतौचकार्ये ।
स्मृतौधातौप्रयुज्यमानेकर्मणिषष्ठीविभक्तिर्भवति चकारेणद्वितीयापि चकाराज्जगतीमेष्टं अप्राधान्यप
व मातुःस्मरति मातरंस्मरति । हेतौतृतीयापंचमीचवक्तव्या । अनित्यः शब्दः कृतकत्वात् कृतकत्वेन ।
भयहेतौपंचमीवक्तव्या चौराद्बिभेतिव्याघ्राद्बिभेति विद्यात्यानाश्रकिनः । षष्ठीहेतुप्रयोगे । कस्यहेतो
रियंकन्या । तुल्यार्थप्रयोगेतृतीयाषष्ठीच । राज्ञाराज्ञोवासदृशस्तुल्यः समोवादेवदत्तः तुलोपमाभ्यां
नतुलातुपमावानास्तिकृष्णस्य । इत्थंभावेतृतीया । अन्यस्यान्यप्रकारेणवर्तमानः सइत्थंभावस्त
स्मिन्नित्थंभावेतृतीयासमान शिष्यंपुत्रेणपश्यति संसारमसारेणपश्यति । येनांगविकारः । येनांगेन २२

विकृतेनांगिनोंगविकारो लक्ष्यते तस्मात्तृतीया भवति अक्ष्णा काणः पादेन खंजः कर्णेन बधिरः हस्ते
न लुंठः शिरसा खल्वाटः मुखेन विलोचनः वपुषा वक्रभंजः । जनिकर्तुः प्रकृतिः । जायमानस्य कार्य
स्योपादानमपादानसंज्ञं भवति तत्रापादाने पंचमी यस्मात्प्रजाः प्रजायंते तेन ब्रह्मेति विदुर्बुधाः । आजाति-
योगे च । आपाटलिपुत्राद्वृष्टो देवः आदिशाद्दृष्टपर इत्यन्तेऽपि योगे । तदर्थे चतुर्थी वक्तव्या । संयमाय श्रु
तिधत्ते नरो धर्माय संयमं धर्मं मोक्षाय मेधावी धनं दानाय भक्तये । क्रुध्यादियोगे च । क्रुधाय क्रुध्यति मित्राय-
क्रुध्यति गुणवैते असूयति । कल्लोपे पंचमी वक्तव्या । हर्म्यात्प्रेक्षते हर्म्यमारुह्य प्रेक्षते इत्यर्थः । निमित्ता
त्कर्मयोगे सप्तमी वक्तव्या चर्मणि द्वीपिनं हंति दंतयोर्हंति कुंजरम् केशेषु चमरीं हंति सीम्नि पुष्कलको ह
तः । विषये च सप्तमी तर्के चतुरः षष्ठीसप्तम्यौ चानादरे बहूनां क्रोशतां गतश्चौरः बहुषु साधुषु निवा
रयत्स्वपि स्वयमनर्थो यात्यसाधुमार्गेण मातापित्रो रुदतो प्रव्रजति पुत्रः । इन्नंते क्तांते कर्मणि सप्तमी भ-
वति । अधीती व्याकरणे इत्यादि शिष्टप्रयोगाज्ज्ञेयम् । अन्योक्तो प्रथमा । यदिदं कार्यत्वादन्येनाख्यातेन कृता
बोक्तं भवति तदा प्रथमा प्रयोक्तव्या कटः क्रियते कृतः कार्यः । उक्तसि स्यादिः सर्वत्र । दृश्याज्ञहोति पुनाह
ब्रह्मणस्पतिः ब्रजेते विरेजः । कर्ता कर्माथ करणं संप्रदानं चतुर्थकम् अपादानाधिकरणमित्याहुः कारक
काणि षट् ॥ इति कारकप्रक्रिया ॥ अथ समासप्रक्रिया निरूप्यते ॥ अथार्थवद्विभक्तिविशिष्टानां पदा-
नां समासो निरूप्यते । समासश्चान्वयेनाम्नाम् नाम्नामन्वययोग्यत्वे सत्येव समासो भवति चशब्दान्नडितो

सा.
२२
23

पि ततोभार्योऽग्रहणस्येत्याद्येन भवति स च षड्विधः अव्ययीभावः तत्पुरुषः द्वन्द्वः बहुव्रीहिः कर्मधारयः द्वि
गुश्चेति पूर्वपदप्रधानोऽव्ययीभावः द्विगुतत्पुरुषौ परपदप्रधानौ द्वन्द्वकर्मधारयौ चोभयपदप्रधानौ बहुव्री
हिरन्यपदप्रधानः तत्र क्रियासंबंधादुभयप्रधानो बलवान् ऐकपद्यमैकस्वर्यमेकविभक्तिकत्वं च समा
सप्रयोजनम् स्त्रीष्वधि इति स्थिते स्त्रीष्वाद्वितीयैकवचनेऽम् स्त्रीभ्रुवो स्त्रियमधिकृत्य भवतीति विग्र
ह अन्वययोग्यार्थसमर्थकः पदसमुदायो विग्रहो वाक्यमिति यावत् कृते समासेऽव्ययस्य पूर्वनिपातो व
क्तव्यः । पूर्वोऽव्ययेऽव्ययीभावः । अव्यये पूर्वपदे सति योऽन्वयः सोऽव्ययीभावसंज्ञः समासो भवति ॥ इति समास
संज्ञायां ॥ समासे प्रत्यये लुक् ॥ समासे वर्तमानाया विभक्तेः प्रत्यये च परे लुग्भवतीत्यमो लुक् नामसंज्ञायां
स्याद्विभक्तिः अधिस्त्रीसि इति स्थिते । स नपुंसकः । सोऽव्ययीभावो नपुंसकलिंगो भवति नपुंसकत्वाद्ध्र
स्वत्वम् । अव्ययीभावात् । अव्ययीभावात्परस्या विभक्तेर्लुग्भवति अधिस्त्रि गृहकार्यं रायमतिक्रांतमति
रि जलं नावमतिक्रांतमतिनु जलं । ह्रस्वादेशे संध्यक्षराणामिकारोकारौ च वक्तव्यौ ॥ यथाऽसादृश्ये ॥ यथा
शब्दः सादृश्ये वर्तमानः समस्यते यः सोऽव्ययीभावसंज्ञकः समासो भवति शक्तिमनतिक्रम्य करोति य
थाशक्ति दानम् । अतोऽमनन्तः । अकारांतादव्ययीभावात्परस्या विभक्तेरम्भवति अंतं वर्जयित्वा उपकुम्भस्य समी
पे उपकुम्भं वर्तते उपकुम्भम् उप समीपार्थे तेप । वा टाङ्योः । टा ङि इत्यनयोः परयोर्वाम्भवति उपकुम्भस्याप
अनंतविशेषणात्वं च स्यात्त्र भवति । अवधारणार्थे यावदिति च अवधारणार्थे यावच्छब्दे प्रयुज्यमानेऽव्ययीभा २२

वसंज्ञकः समासोभवति यावंत्यमत्राणिसंतितावतोब्राह्मणानामंत्रयस्वयावदमत्रमामंत्रयस्व ।
अमाहात्तत्पुरुषः । द्वितीयाद्यंतेपूर्वपदेसतिषष्ठोन्वयः सतत्पुरुषसंज्ञकः समासोभवति ग्रामंप्राप्तो
ग्रामप्राप्तः दात्रेणछिन्नं दात्रछिन्नं यूपायदारु यूपदारु वृकेभ्योभयं वृकभयं राज्ञः पुरुषः राज
पुरुषः अक्षेषुशौंडो अक्षशौंडः । क्वचिदमाद्यंतस्यपरम् । अग्न्याहिताग्निः अग्न्याहितइत्यपिभव
ति पूर्वंभूतो भूतपूर्वः । मासेक्वचिदेकपदेणत्वहेतुः । शराणांवनंशरवणं । आम्राणांवनमाम्रव
णम् । पानस्यवा । पानशब्दस्यनकारस्यणत्वंभवति स्वरायाःपानं स्वरापानं । नञि । नञिपूर्वपदे
सतितत्पुरुषसंज्ञकः समासोभवति नब्राह्मणः ना समासेसति नञोकारादेशोभवति नाकना
यकनालिनीनक्षत्रादिवर्ज्यं अब्राह्मणः । अनः स्वरे । समासेसति नञोनादेशोभवति स्वरेपरे
नकादिवर्ज्यं नअश्वः अनश्वः धर्मस्यविरुद्धोधर्मः ग्रहणाभावोग्रहणम् नदन्यतद्विरुद्धतदभावेषु
नञ्वर्तते । चार्थेद्वन्द्वः । समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः तत्रेश्वरंचगुरुंचभजस्वेति ।
प्रत्येकमेकक्रियासंबंधेसमुच्चयेसमासोनास्ति वटोभिक्षामटगांचानयेति क्रमेणक्रियाद्वयसंबंध
त्वाचयेचसमासोनास्तिपरस्परमसंबन्धात् इतरेतरयोगेसमाहारेचसमासोभवति । आदेश्चद्वन्द्वे ॥
द्वन्द्वेल्पस्वरप्रधानेकारौकारांतानांपूर्वनिपातोवक्तव्यः धवश्चखदिरश्चधवखदिरौ भोक्ताचभोग्यश्
श्चभोक्तृभोग्यौ । उक्तार्थानामप्रयोगः । अग्निश्चमारुतश्चाग्निमारुतौ पटुश्चगमश्चपटुगमौ ॥

देवताद्वन्द्वे पूर्वपदस्य दीर्घो वक्तव्यः। इन्द्रश्च बृहस्पतिश्च इन्द्राबृहस्पती। अग्न्यादेः सोमादीनां षत्वं वाच्यं अग्नि
श्च सोमश्च अग्नीषोमौ। इतरेतरयोगे द्विवचनं। एकवद्भावः समाहारे वा वक्तव्यः पाशश्च कशश्च पलाशश्च
पाशकशपलाशाः पाशकशपलाशं॥ अव्ययादीनां विभक्तिलोपे पूर्वपदस्य समागमो वक्तव्यः॥ अन्य
श्चान्यश्च अन्योन्यं परश्च परश्च परस्परं। एकत्वे द्विगुद्वन्द्वौ। एकत्वे वर्तमानौ द्विगुद्वन्द्वौ नपुंसकलिंगौ
स्तः। संख्यापूर्वो द्विगुः। संख्यापूर्वो द्विगुर्निगद्यते। समाहारे नदीष्टा द्विगुः। समाहारेर्थे द्विगुर्भवति। त
स्मात् अकारान्तादीप्प्रत्ययो भवति त्रयाणां ग्रामाणां समाहारः त्रिग्रामी पंचमूली पंचाग्नयः समाहृताः
पंचाग्नि पंचानां गवां समाहारः पंचगु नपुंसकत्वाद्ध्रस्वत्वं त्रिफलेति तु अजादित्वाट्टाप्। बहुव्री
हिरन्यार्थे। अन्यार्थे वर्तमानो यः समासः स बहुव्रीहिसंज्ञकः समासो भवति बहुधनं यस्य सः बहु
धनः अल्पं धनं यस्य सोऽल्पधनः सच बहुव्रीहिर्द्विधा तद्गुणसंविज्ञानोऽतद्गुणसंविज्ञानश्च यस्य यथा
नस्यैकदेशो विशेषणत्वाय तत्र ज्ञायते स तद्गुणसंज्ञकः लम्बौ कर्णौ यस्य स लम्बकर्णः। बहुव्री
हौ। बहुव्रीहिविशेषणस्य सप्तम्यन्तस्य पूर्वनिपातो वा वक्तव्यः चक्रपाण्यादौ पाणौ चक्रं यस्य स च
क्रपाणिः भुवने कीर्तिर्यस्य स भुवनकीर्ति चंद्रशेखर इत्यादि ज्ञेयम्। प्रजामेधयोरसक। सुष्ठु
प्रजा यस्य स सुप्रजाः दुष्टा मेधा यस्य स दुर्मेधाः। धर्मादन्। सुष्ठु धर्मो यस्य स सुधर्मा अन्यार्थे स्त्री
लिंगस्यान्यार्थे वर्तमानस्य पुंवद्भावो भवति रूपवती भार्या यस्य स रूपवद्भार्यः। पुंवद्भार्यादीपो निट

त्रिः वाग्रहणात्कल्याणीप्रियइत्यादौनभवति। गोः। गोशब्दस्यन्यार्थेवर्तमानस्यह्रस्वःस्यात् पंचगा
वोयस्यसःपंचगुः सप्तमुख्याद्याव्यादिपूर्वस्यपादशब्दस्यलोपोवक्तव्यः सहस्तंपादायस्यसःसहस्तपात् शो
भनौपादौयस्यससुपात् व्याघ्रस्येवपादौयस्यसव्याघ्रपात् कुम्भादौस्त्रीत्वेपरे पाददेशश्चवक्तव्यः द्विप
दः द्विपदा द्विपद्यामित्यादि टाङकाः समासेसति ट अ इ कप्तप्रत्ययाः स्युः यथाप्रयोगमनुसंधनी
यम् अचिंत्योमहिमायस्यसःअचिन्त्यमहिमः। नोवा। नांतस्यपरस्यटेःलोपोवाभवति यकारेत्वेवेचप
रे वाग्रहणात्क्वचिन्नभवति उपधालोपश्च अक्ष्णोमध्यंमध्याक्षः कवीनांराज्ञाकविराजः टकाराभावेप
ईवर्ध्यः कविराज्ञीराज्ञः पुरराजपुरम् वाङ्मनसश्चवाङ्मनसम् दक्षिणस्यांदिशिपन्थाइदक्षिणापथः अ
हश्चरात्रिश्चअहोरात्रम् द्वौचत्रयश्चद्वित्राः बहवःवातारोयस्यसबहुवातृकः प्रासादः बहवोराजा
नोयस्यांनगर्यांसाबहुराजानगरी अत्रटिलोपःकृते आबंतःस्त्रियाम्। कर्मधारयःतुल्यार्थेपदद्वये॥
पदद्वयेतुल्यार्थेएकार्थेनिर्देशेसति समासःकर्मधारयसंज्ञोभवति नीलंचतदुत्पलंनीलोत्पलम् रक्ता
चासौलताचरक्तलता पुमान्चासौकोकिलःपुंस्कोकिलः पुंसःसपेसंयोगांतस्यलोपोनवक्तव्यः॥
नाम्नःप्रकृतासमासः। प्रादेरुपसर्गस्यनाम्नश्चप्रकृतेनेनसहसमासःतत्पुरुषोभवति प्रकर्षेणवादःप्रवा
दः कुम्भंकरोतिकुम्भकारः। सहादेस्सादिः। समासेसतिसहादीनांसादिर्भवति पुत्रेणसहवर्ततेसपुत्रः
क्वचिन्नसहचरतीतिसहचरः। सहसंतिवसांसिसमितिवयः। सहअञ्चतीतिसध्र्यङ् सममंचतीतिस

सा.
२५
25

म्यङ्. तिरोंचतीतितिर्यङ्. कोः कात्तत्पुरुषे। कुशब्दस्य तत्पुरुषे स्वरे परे कद्भवति कुत्सितोऽर्थः कुत्सि
तमन्नं कदन्नं। ईषदर्थे कवादिः। कुशब्दस्येषदर्थे काकवचादेशा भवंति उष्णे परे कोष्णं कवोष्णं मन्दोष्णं
कालवणं। कुत्सितं लवणं कालवणं। पुरुषे वा। कुत्सितः पुरुषः कापुरुषः कुपुरुषः। षष उद्दंतो·
षट्दशधासु षोडशः। संख्यायाः प्रकारे धा। षट्कारायस्यसषोडशः। संख्यायाः प्रकारे धा। षट्कारायस्य·
स षोढा षड्दंतायस्यसषोडन्. दिवस्य दिवश्चादेशाः द्यावाभूमी। जायाशब्दस्य जंदंनिपात्यते पत्यौ दंपती जंप
ती इत्यादिराकृतिगणोऽयम्। अलुक् क्वचित्। क्वचित्समासे कृते तद्धिते विभक्तेर्लुग्भवति कण्ठेकालः। अर
ण्येनिवसेत्यरण्ययोनिः। उरसिलोमादिस्रक् कण्ठेकालः वाचोयुक्तिः दिवोदासः पश्यतोहरः वि·
शांपतिः वास्तोष्पतिः इत्यादि॥ समानाधिकरणे शाकपार्थिवादीनां मध्यपदलोपो वक्तव्यः॥ शाकप्रि·
यश्चपार्थिवश्च शाकपार्थिवः भक्तिप्रियो ब्राह्मणो भक्तिब्राह्मणः देवपूजकश्चासौ ब्राह्मणश्च देवब्राह्मणः
आदेश्च द्वंद्वे॥ द्वंद्वे समासादिशब्दस्य लोपो भवति चकारात्क्वाचिद्विकल्पः पाता च पिता च पितरौ श्वश्रूश्च
श्वशुरश्च श्वशुरौ दुहिता च पुत्रश्च पुत्रौ। ऋतां द्वंद्वे पूर्वपदस्यात्वं वा। द्वंद्वे ऋकारांतानां पूर्वपदस्यात्वं वा भव
ति माता च पुत्रश्च मातापुत्रौ। द्वंद्वे सर्वादित्वं वा जसि॥ वर्णाश्रमेतरे वर्णाश्रमेतराः। वैयधिकरणेऽपि बहुव्री
हौ मध्यपदलोपश्च। कमलस्य गंध इव गंधो यस्य स कमलगन्धिः। गंधशब्दस्येकारः एवं हंसस्य गमनमिव गम·
नं यस्याः सा हंसगमना। दिक्संख्यायां। दिक्संख्याशब्दौ संज्ञायां विषये समस्येते स समासस्तत्पुरुषसंज्ञ· २५

कोभवति अविग्रहोनित्यसमासः अन्यस्वस्वपदविग्रहोवा दृष्टिणाग्निः समस्तोग्रामः सूतकोग्रामः अ
न्यः स्वपदविग्रहोपि ॥ इतिसमासप्रक्रिया ॥ अथतद्धितप्रक्रियानिरूप्यते ॥ अपत्येणनाम्नोपत्येर्थे
प्रत्ययोभवति उपगोरपत्यमितिविग्रहे उपगोरण् इतिस्थितेसमासप्रत्यययोरितिषष्ठीलोपः णका
रोवृद्ध्यर्थः । आदिस्वरस्यञ्णितिचवृद्धिः ॥ स्वराणांमध्येआदिस्वरस्यवृद्धिः स्वराणांमध्येआदि
स्वरस्यवृद्धिर्भवतिञ्णितिप्रत्ययेपरे । ओवस्वरे । उकारस्यौकारस्यचावभवति । यकारेस्वरेचपरे औप
पगवः यस्यलोपः वासिष्ठः ऋतउत् ऋकारस्यउभवति अणिपरे षस्रांमातॄणामपत्यं । षण्णा
वाविमातरि । षाण्मातुरः द्वैमातुरः । अतइञ्जन्यपेः । अकारांतनाम्नोन्नेन्यपिषाह्वादिभ्यः प्रत्ययोभवति । य
स्यलोपः देवदत्तस्यापत्यंदैवदत्तिः औधविः दाशरथिः पौरन्दरिः कार्ष्णिः । बाह्वादेश्च । बाहविः औ
पबिन्दविः औडुलोमिः शैवः वैदेहः । एयायनणेयणीयागर्गनडादिस्त्रीपितृष्वस्रादेः गर्गादेर्नडादेः
आदेः स्त्रीलिंगात् पितृष्वस्रादेश्च आयनण् एयण् ईयइत्येतेप्रत्ययाभवंति अपत्येर्थे गर्गस्या
पत्यंगार्ग्यः वात्स्यः नडस्यापत्यंनाडायनः चारायणः आम्हायणः अत्रेरपत्यमात्रेयः काद्रेयः गंगा
याअपत्यंगांगेयः माहेयः पैतृष्वस्रीयः मातृष्वस्रीयः । पितृमातृभ्यांडामहच्प्रत्ययोभवति । मातुःपिता
मातामहः पितुःपितापितामहः । लुग्बहुत्वेक्वाचित् । अपत्यार्थेतत्पन्नस्यप्रत्ययस्यबहुत्वेसतिक्वचि
द्घत्स्वधिविषयेलुग्भवति । वसिष्ठाः गर्गाः अत्रयः विदेहाः । देवतेदमर्थे । देवतार्थेइदमर्थेचाञ्प्रत्य

सा॰
२९
26

याभवंति इंद्रोदेवतायस्यतदैन्द्रंहविः एवंसौम्यंदेवदत्तस्येदंदैवदत्तंदैवदत्तम् ।कविद्धयोः । पूर्वपदोत्तरपदा-
योःकविद्धिर्भवति आग्निमारुतंकर्म सोहृदोभावःसौहार्दं अत्रभावेल्वत्रात्वः ।कार्याणामप्रयोगः वो-
वस्वरेइत्यत्र ।णितोवा ।उक्तप्रत्ययाविषयांतरेणितोवाभवंति अजोगोर्यस्यसोजगुः शिवस्तस्येदंधनुरा-
जगवमजगवंवा ।हृधात्वादेरीकिणः । हृधातुरपत्यंसाधातकिः ।नसंधिजयोर्यवात् । संधिजौयौतयोःसं-
धिजयोर्यकारवकारयोः परस्यस्वरस्यवृद्धिर्नभवति किंतुतयोर्यकागमोभवति इद् तदितयेतावागमोभवतः
वर्णाविस्त्रेधंकृत्वायकारात्पूर्वमिकारः वकारात्पूर्वमुकारः ततआदिस्वरस्यणितिवृद्धिः व्यासस्याप-
त्यंवैयासकिः व्याकरणमधीतेवेदवेतिवैयाकरणः अमुदस्यगंधइवगंधोयस्यसकोमुदगंधिस्तस्या-
पत्यंस्त्रीकौमुदगन्ध्या अत्रष्यप्रत्ययः आवतःस्त्रियामित्याप् । स्वसुश्छणः । स्वसुरस्यपत्यंस्वास्रीयः
विस्रोविदंवैसवम् पयस्यंगव्यंगत्यंचहीयंमहीयं किमीयं पत्तीयं । चवर्गस्यलोपः । चवर्गस्य
चकारस्यलोपोभवति एयप्रत्ययेणीप्रत्ययेचपरतः तर्यः तरीयः । अन्यस्यदुक । अन्यशब्दस्यदुगाग-
मोभवति णीयप्रत्ययेपरतः अन्यदीय अ॰ जातीयं । कोकारकात्क्रियाफले । कारकादेष्यतेप्रत्ययाभ-
वंति क्रियाफलेकर्तरिकर्मणिवाभिधीयते ऊरुकूमेनहन्तिकौरुकूमिकम् मथुरायाआगतःलब्धजातोवामा-
थुरः ग्रामेभवोग्राम्यः धुरंवहतीतिधुर्यः विकल्पेनवृद्धिः धौरेयः धुरीयः । केनेयेकाः । कइनइयइक
इत्येतेप्रत्ययाभवंति भवाद्यर्थे णित्वंचैषांवैकल्पिकम् कर्णाटेभवः कार्णाटिकः कर्णाटेभवः कार्णा- २२

टिकः कार्णाटिकोवा ग्रामादागतस्तत्रजातोवाग्रामीणः सध्र्यविभवः सध्रीचीनः तिरश्चिभः तिर
यस्यलोपः। अपत्येयकारलोपः कन्यायांजातः कानीनोमुनिः पुष्येजातः पौषीणः अण् अध्येणाय॰
आपौर्णमासीयो त्वष्ठाङ्कवः हविष्यः मत्स्यस्येयंमात्सी अगस्त्यस्येयं आगस्ती दिकुस्तर्यस्येयं सौरीदि
क। ढ्योवा। तस्यादिष्टाद्वादूर्ध्वं प्रत्ययोभवति वाग्रहणात्णपि त्वष्ठियः त्वाष्ट्रः शुक्राज्जातः शुक्रि
यः शुक्रो देवतायस्येतिशुक्रियंहविः इंद्रस्यामनोलिंगमिंद्रियं श्रद्धैदीव्यतीत्याक्षिकः शब्दानधीते॰
वेदवेत्तिशाब्दिकः वेदमधीतेवेदवेत्तिवैदिः तर्कमधीतेवेदवेत्तितार्किकः। त्यतनौ। किमादेर्वहादेर्भ
वाद्यर्थेत्यतनौप्रत्ययोभवतः अत्रभवः अत्रत्यः तत्रभवः तत्रत्यः ह्योभवः ह्यस्तनः श्वोभवः श्वस्तनः
सदाभवः सदातनः प्राग्भवः प्राक्तनः पुराभवः पुरातनः चिरंभवः चिरंतनः सायंभवः सायंत
तनः। स्वार्थेपि। उक्ताः प्रत्ययाः स्वार्थेपिभवंति देवदत्तएवदैवदत्तिकः चत्वारएववर्णाश्चातुर्वर्ण्यम् ॰
चोरएवचौरः। आणीनयोर्युष्मदस्मदोस्तवकादिः। अणईनयतोर्योर्युष्मदस्मदोस्तवकममकयुष्मा
कास्माकादयआदेशाभवंति तवैकत्वेतवकममकौ द्वित्वबहुत्वेयुष्माकास्माकौ तवेदं तावकं
ममेदंमामकं तावायं तावकीनः ममायं मामकीनः युवयोर्युष्माकंवा अपत्यंयौष्माकः आस्मा
कः यौष्माकीनः आवयोरस्माकंवा अपत्यं आस्माकीनः। वतिर्लवे। साहश्येर्थेवतिप्रत्ययोभवति चंद्रेण
तुल्यंचंद्रवन्मुखं घटेनतुल्यंघटवदुदरं पर्वंघटेनतुल्यंघटवत्कमण्डलं। भावेत्वतलणः। शाहस्मप्र॰

सा.
२७
३२

वृत्तिनिमित्तंभावस्तस्मिन्नर्थेत्वतयणित्येतेप्रत्ययाभवन्ति ब्राह्मणस्यभावोब्राह्मणता तान्तस्यनित्यंस्त्री
लिंगत्वादाप् ब्राह्मणत्वंसौमनस्यंसाभाग्यंवैदुष्यम्। समाहारेचत्रेर्युणिः। समाहारेर्थेवाच्येतप्रत्ययोभ
वति गुणस्य त्रयाणांसमाहारः त्रेता जनता। कर्मण्यपियणवक्तव्यः। ब्राह्मणस्यकर्मब्राह्मण्यं राज्ञइदं
कर्मराज्यं राजन्यंनोवेतिटिलोकः। अपिशब्दात्साधुर्थोदावपियण कर्मणिसाधुः कर्मण्यः सभायांसा
धुः सभ्यः इत्यादिप्रयोगवशाज्ज्ञेयम्। लोहितादेर्डिरिमन्। लोहितादेर्गणाद्भावेर्थे इमन्प्रत्ययोभवति
सचडित् डित्वाट्टिलोपः लोहितिमा अणिमा। ऋर। मति ऋकारस्यरेफोभवति इमनादौप्रत्ययेपरे पृ
थोर्भावः प्रथिमा द्रढिमा भ्रशिमा क्रशिमा हलादेर्लघोरकारस्येतिज्ञेयं तेनऋजिमा कृशिमाइत्यादौ
नभवति बहोर्बाहुल्यमितिविग्रहे। बहोर्विलोपोभूश्चबहोः। बहोःपरेषामिमनादीनामिवर्णस्यलोपोभ
वति बहोःस्थानेभूश्चादेशः भूमा। अस्त्यर्थेमतुः। नाम्नोअस्त्यर्थेमतुःप्रत्ययोभवति अस्यास्मिन्नस्तीत्य
स्मिन्नर्थेउकारोनुबंधार्थः। हृन्तोत्तम्। गोमान् श्रीमान्। अइकौचमत्वर्थे अस्त्यर्थेअयकोप्रत्य
योभवतः वैजयंतः मायकः, चकारादस्त्यर्थेअन्येपिप्रत्ययाभवंति। फलिनः बर्हिणः अत्रइन्प्रत्ययः ब
लिनः रजस्वला सिध्मलः चूडालः इत्यादिप्रयोगानुसारेणज्ञेयं। मांतोपधाद्वश्चिनो। मकारांतान्मका
रोपधात्अवर्णांतात्अवर्णोपधाच्चवतिनौप्रत्ययौभवतः अस्त्यर्थेभगवानिंद्रः धनमस्यास्तीतिधनी उका
रानुबंधत्वादीप् हयवतीभूमिः किंवान् शमोस्यास्तीतिशमी। तुंदादिभ्यश्च। एभ्योपिवतिनोप्रत्य २७

यो भवतः तडिद्विद्यते यस्यासौ तडित्वान् विद्युत्वी । किं यत्तदेतद्भ्यः परिमाणे वतु । परिमाणेऽर्थे किं
यत्तदेतत् एतेभ्योऽपि वतुप्रत्ययो भवति किमः, किरश्च । किमः किरादेशो भवति वतोर्वकारस्य य-
कारः किंप्रमाणं यस्येति कियान् । यत्तदोरा । यत्तदोर्वतौ आकारादेशो भवति यत्प्रमाणं यस्ये-
ति यावान् एवं तावान् । आ इदंश्चैतदो वा । एतदिदमोरात्वं भवति वतौ परे इशादेशश्च वा भवति चकारा-
द्वतो वकारस्य यकारः आकारः सर्वादेशार्थः एतावान् इयान् । तुंदादेरिलः । तुंदादेर्गणादिलप्र-
त्ययो भवति तुन्दमस्यास्तीति तुन्दिलः पिच्छिलः फेनिलः इत्यादि । उन्नते दन्तादुरः । उन्नतेऽर्थे द-
न्तशब्दादुरप्रत्ययो भवति उन्नता दन्ता अस्येति दन्तुरः । श्रद्धादेरालुः । श्रद्धादेर्गणादालुप्रत्ययो भवति ।
श्रद्धालुः दयालुः कृपालुः इत्यादि । अस्मायामेधास्रग्भ्यो मत्वर्थे विनिर्वक्तव्यः । तपस्वी मायावी मे-
धावी स्रग्वी । वाचो ग्मिन् प्रशंसायां । वाक्शब्दात् ग्मिन्प्रत्ययो भवति प्रशंसायां गकारोऽनुबंधो म-
कारादिव्यवच्छेदार्थः तेन जग्मे जग्मा इति ककारस्य गकारो भवति प्रशस्ता वागस्यास्तीति वाग्मी । आलाटौ
कुत्सितबहुभाषिणि । वाक्शब्दात्कुत्सितबहुलभाषणार्थे आलाटौ प्रत्ययौ भवतः कुत्सिता बह्वी
वागस्य सः वाचालः वाचाटः । ईषदसमाप्तौ कल्पदेश्यदेशीयाः । ईषन्न्यूनत्वे वर्तमानादेते प्रत्यया भवंति
ईषदसमाप्तः सर्वज्ञः सर्वज्ञकल्पः पटुदेश्यः कविदेशीयः । प्रशंसायां रूपः । प्रशस्तो वैयाकरणो वैया-
करणरूपः पाशः कुत्सायां । वैयाकरणपाशः । भूतपूर्वे चरट् । टकार ईवर्थः पूर्वं दृष्टो दृष्टचरः द

इचरी ॥ प्राचुर्यविकारप्राधान्यादिषुमयट् । अन्नमयोयज्ञः मृन्मयोघटः स्त्रीमयोजाल्मः अ
मृतमयःचंद्रः गोपुरीषंगोमयम् । तदधीतेवेत्यत्राणएवकार्यः । व्याकरणमधीतेवेद्वेत्तिवैयाकरणः
शोभनोश्वःस्वश्वः तंवेत्तीतिसौवश्वः । नसन्धिजयोर्यैद् । यतोसंधिजातयोर्यकारवकारयोः संबंधिनः
स्वरस्यवृद्धिर्नभवति किंतुतयोरदागमोभवति इदुदितिनावागमोभवतः वर्णविश्लेषंकृत्वायकारा
त्पूर्वमिकारः वकारात्पूर्वमुकारः पश्चादादिस्वरस्येतिवृद्धिः । इतोजातेर्थे । जातेर्थेवाच्येसतिइतप्र
त्ययोभवति यस्यलोपः लज्जितः तारकितंनभः इत्यादि । तरतमेयस्विष्ठाःप्रकर्षे । प्रकर्षेर्थेतरप्तम
ईयसुइष्ठइत्येतेप्रत्ययाभवति अतिशयेनकृशः कृशतरः कृशतमः । ईयस्विष्ठोर्डितोवक्तव्यौ ।
डितिटिलोपः उकारोनुम्विधानार्थः नसम्महतोर्दीर्घः इतिदीर्घत्वं अतिशयेनलघुर्लघीयान्
लघुतरः लघुतमः पापीयान् लघुयसीपापीयसी लघिष्ठः पापिष्ठः । गुर्वादेरिष्ठेमेयःसुगरादिष्टे
र्लोपश्च । गुर्वादेर्गरादेशोभवति टेर्लोपश्चभवति इष्ठेमेयःसुपरतः अतिशयेनगुरुर्गरिष्ठः गरीया
न् गरिमा अतिशयेनप्रियः प्रेष्ठःप्रेयान् प्रेमाप्रियस्यप्रादेशः । स्थूलस्यस्थवादेशः । अतिशयेनस्थू
लः स्थविष्ठः । स्थवीयान् । प्रशस्यस्यश्रादेशः श्रेष्ठः श्रेयान् । वृद्धस्यज्यादेशः । अतिशयेनवृद्धः
ज्येष्ठः । ईलोपोज्याशब्दादीयसः । ज्याशब्दात्परस्यईयसः प्रत्ययस्यईकारस्यलोपोभवति ज्यायान्
दीर्घस्यद्राघादेशः । अतिशयेनदीर्घः द्राघिष्ठः द्राघीयान् । बहोर्यिष्ठो । बहोस्तस्यइष्ठस्यइका २८

रस्यपि भवति। बहोरिलोपो भूश्च बहोः। अतिशयेन बहुः भूयिष्ठः भूयान्। किमोव्ययादाम्व
ताश्च भवतस्तमयोराम्वन्ताव्ययः। अतिशयेन किं किंतराम् किंतमाम्। अतिशयेन ऊतः ऊतस्तराप्र
माणवः ऊतस्तमा तेषां मारम्भकत्वे उच्चैस्तरां गायति पचतितरां पचपराति तमाम् पटतित॰
रां। परिमाणेदघ्नादयः। परमाणेर्थे डघ्नादयः प्रत्ययः भवंति दघ्नद्वयसद्घ्नात्रडित्येते प्रत्ययाभ॰
वंति जानुनी परिमाणं जानुदघ्नं जलं शिरो द्वयसं पुरुषमात्रं। द्वयोर्बहूनां चैकस्य निर्धारणे किमादे
डतरडतमौ वक्तव्यौ कतरो भवतोः काएवद्व तमो भयतांविकः भवतोर्येतरस्त्वा किंकत्तनवल्ल
ग्रहणात्। संख्यायविशेषावधारणे। संख्यातं येषां संख्येयं तस्य विशेषावधारणे तस्मिन्नर्थे
वक्ष्यमाणाः प्रत्ययाभवति द्वित्रिभ्यां तीयः द्वयोः पूरणो द्वितीयः त्रयाणां पूरणस्तृतीयः त्रेः संप्रसा
रणंच। षट्कतरोस्यप्रत्ययः। षत्वं षष्ठः चतुर्थः तुर्यः तुरीयः। पञ्चादेर्मुट्। पंचमः सप्तमः अ
ष्टमः नवमः दशमः, एकादशः, देर्डः। एकादशादेर्डप्रत्ययो डित्वाट्टिलोपः एकादशः द्वादशः
अष्टादशः, विंशत्यादेस्तमट्। विंशत्यादेस्तमट्प्रत्ययोभवति विंशतितमः त्रिंशतितमः। द्विअष्टा
नां द्वात्रयोष्टः प्राक्शतादन्यशीतिः। द्वाविंशतिः त्रयोविंशतिः अष्टाविंशतिः। कतिकतिपयाभ्यां थः
कतिथः कतिपयथः। संख्यायाः प्रकारेधः। प्रकारेर्थे संख्याशब्दाद्धाप्रत्ययोभवति द्विधा त्रिधा
गुणोएव। धाप्रत्ययान्तस्य गुणोएव प्रत्ययोभवति चकारोविकल्पार्थः द्वेधात्रेधाद्वैधंत्रैधं। क्रिया

सा. २९ 29

याअभ्यावृत्तौ कृत्वः पंचवारमिति पंचकृत्वः सप्तवारमिति सप्तकृत्वः । द्वित्रिभ्यां सुच् । द्विवारं त्रिवा-
रं द्विः पठितं त्रिः पठितं । बह्वादेः शस् । बह्वादेर्गणात् शस्प्रत्ययो भवति कृत्वसोऽर्थे बहुवारमिति ब-
हुशः शतशः भूरिशः सहस्रशः इत्यादि । तयायटौ संख्यायाः । संख्याशब्दात्तयायट्प्रत्ययौ भवतः द्वा-
वयवौ यस्येति द्वितयं त्रितयं द्वयं त्रयं द्वयी त्रयी । शेषा निपाताः । कत्यादयः शेषाः कत्यादयः शब्दा
निपात्यंते कति पुरुषाः कति स्त्रियः कति कुलानि ॥ इति तद्धितप्रक्रिया ॥ ॥ इति श्रीमत्परमहंसप-
रिव्राजकाचार्यानुभूतिस्वरूपाचार्यविरचितायां सारस्वतीप्रक्रियायां पूर्वार्धं समाप्तम् ॥ ॥ शुभं भवतु
ॐ नमो विघ्नहर्त्रे ॥ अथाख्यातप्रक्रिया निरूप्यते ॥ धातोः । वक्ष्यमाणाः प्रत्यया धातोर्ज्ञेयाः । भ्वादिः ।
भू सत्तायामित्यादिशब्दो धातुसंज्ञो भवति धातवश्च भ्वादयः स च त्रिविध आत्मनेपदी परस्मैपदी उभय-
पदी चेति । आदनुदात्तेङितः । अनुदात्तेतो ङितश्च धातोरादित आत्मनेपदं भवति । ञित्स्वरितेतश्चोभे ॥
ञितः स्वरितेतश्च धातोरुभे आत्मनेपदपरस्मैपदे भवतः आत्मगामि चेत्फलमात्मनेपदं परगामि चेत्फ-
लं परस्मैपदं प्रयोक्तव्यमन्वर्थत्वात् अर्थमत्र लक्ष्यीकृत्यास्यार्थः परतो यत्र सर्वोऽत्रानिमित्ताविधुरा-
दन्यस्माद्धातोः परस्मैपदं भवति । परस्मैपदानि नव । तिबादीनामष्टादशसंख्यानामाद्यानि नव वचना-
नि परस्मैपदसंज्ञानि भवंति परण्यात्मनेपदानि परानि नव वचनान्यात्मनेपदसंज्ञानि भवंति । वर्तमा-
ने तिप्तस् ॥ अन्ति सिप्थस्थ मिप्वस्मस् । ते आते अन्ते से आथे ध्वे ए वहे महे प्रारब्धापरिसमाप्तश्च- २९

वर्त्तमानवत्त्वस्मिन्वर्त्तमानेभिधेयेसतितिबादयः प्रत्ययाभवंति अस्यतिबादेः पाणिनीयानांलडि
तिसंज्ञा। नाम्निचयुष्मदिचास्मद्युत्तमभागैः। नामादिषुपपदेषुसत्स्वत्रिभिर्भागैः प्रथममध्यमोत्तमा
यतेप्रत्ययाभवंति नाम्निप्रयुज्यमाने चशब्दात्प्रयुज्यमानेचशब्दात्प्रयुज्यमानेपिप्रथमः। कर्त्त
रि च। परस्मैपदंकर्त्तरिभवति चकारादात्मनेपदमिति तत्रभूइत्येतस्मात्परस्मैपदेनोविकरणातिबा
दयोयुज्यंते भूतिपइतिस्थिते पकारःपित्कार्यार्थः। अस्कर्त्तरि। धातोरप्प्रत्ययोभवति कर्त्तरिविः
हितेषुतिबादिषुचतुर्षुदिष्यर्थंतेषुपरतः पकारोविकरणभेदज्ञानार्थः। गुणः। धातोरंत्यभू
तस्यनामिनोगुणोभवति पितिपरे अवादेशोभवति द्वित्वविवक्षायांभुतम् इतिस्थिते। अपितादि
ङिन्। पकारांतेतादिवंचविहायान्यः प्रत्ययोङिःत्संज्ञोभवति। किन्तयुगमि। किनिङितिचपरेधातो
गुणोनभवतियुगमंवर्जयित्वा कृतद्विर्वचनादुसिपरेगुणोभवति ततोङित्वात्तस्मिगुणप्रतिषेधेप्राप्ते
त्ययनिमित्तोगुणोभवत्येव स्रोविसर्गः भवतः बहुर्थविवक्षायांभवश्रंति इतिस्थिते। अदे। अका
रस्यलोपोभवति अकारेपकारेचपरेभवंति भवसि भवथः भवथ। वमोर्वा। अवधानाम्प्रयुक्तः
अव्यवहितंधातोरुपपदं तदनुस्वारात्मकविषयोभवति साधुसवचनेचभवथः विधिसंभावनयोः
यात् यातां युस् याम् यातं यातयाम् यावयाम ईत् ईयातां ईरन् ईयाम् ईयाथां ईध्वं ईय ईव
हि ईमहि विधिः कार्त्तव्यार्थेपदेषाः सम्भावनकल्पनम्रतः तत्रयादादयः प्रत्ययाभवंति यर्वालङ्

सा.
३०
30

तिसंज्ञा पाणिनीयानां । यात्ई । अकारात्परो यात् ईर्भवति अइए भवेत् भवेतां । उस्रुः । अकारात्परस्य

उस इङागमो भवति भवेयुः भवेः भवेतं भवेत । यामियम् । अकारात्परस्य याम इयं भवति भवेयं

भवेव भवेम प्रियोगकस्यसूषकोभवेदिति विधि भवेत्सो वेदपारगो ब्राह्मणत्वादि विसंभावनायां ॥

आशीःप्रेरणयोः । तुप् तां अन्तु हि तं त आनि प् आव प् आम प् तां आतां अन्तां स्व आथां ध्वं ए प् आवहै

प् आमहै प् अप्राप्तप्रार्थना आशीः परस्मैपदार्थं पंसंज्ञं वा प्रेरणं प्रवर्त्तनं तत्र तुबादयः प्रत्यया भवंति । ए

षां संज्ञा लोट् पाणिनीयानां । तुह्योस्तातङाशिषि वा वक्तव्यः भवतु भवतात् वा भवतां भवंतु । अतः

अकारात्परस्य हेर्लुग्भवति भव भवतात् वा भवतं भवत भवानि भवाव भवाम आशिषि भवतु पुत्र

वानित्याशीः अध्ययनायोद्दिष्टो भव सोऽस्मीति प्रेरणं अहं स्वाभागी भवामि ॥ अनद्यतने दीर्घादिः तुप् तां

अन् सिप् तं त अमिप् व म त अन् आतां अतं तथाम् आथां ध्वं इ वहि महि अनीत्या याचेर्यामर्ध्यादर्पागागा

मिन्याराज्ञ पूर्वेयामह्यर्थे यावद्यः कालः सोऽद्यतनः ततोऽन्योऽनद्यतनः तस्मिन्नतीते काले दिबादयः प्रत्यया

भवंति एषां लङ् संज्ञा पाणिनीयानां दिसिमिपद्धामिकारस्य अकारार्थः ततो नकार इणात्तन्यकर्त्तरीतिवि

पोषणार्थः वाबेसानइति वा रस्यतः । दिबादावट् । दिबादौ परे धातोरडागमो भवति अभवत् अभवद् ।

अभवतां अभवन् अभवः अभवतं अभवत अभवं अभवाव अभवाम आशोभवत्वात्सत्वरस्यादि एधद्वें

अकारस्यात्मनेपदार्थः ततः परिणिनवचनानियोज्यानि पूर्ववद्बादिप्रयोगाः एधते । आतामथई । अ ३०

कारणत्वस्मात्स्रथमं बंधेन आकारस्येईभवति पथेते पथंते पथसे पथेथे पथध्वे पथे पथावहे पथा
महे धर्मादेर्थत्वेहोत्यनंतरं इत्यादि विधिसंभावनयोरित्याहीनिनववचनानियोज्यानि पथेत पथेयातां पथे
रन् पथेथाः पथेयाथां पथेध्वं पथेय पथेवहि पथेमहि धर्मतः साधुरेधेत आशीःप्रेरणयोस्त्वासौ
त्वयः पथतां पथेतां पथतां अनद्यतनेनेनाद्यः। त्वरादेः। त्वरादेर्धात्तोर्हितीयोऽनागमोभवति हिवादे
पते पथत पेथेतां पेदंत ईलदर्शनाकांक्षनयोः आत्मनेपदे वर्तमाने ईलते ईलेते ईलंते ईलसे ईलेथे
ईलेध्वे ईले ईलावहे ईलामहे विधिसंभावनयोः ईलेत ईलेयातां ईलेरन् ईलेथाः ईलेयाथां ईलेध्वं
ईलेय ईलेवहि ईलेमहि आशीःप्रेरणयोः ईलतां ईलेतां ईलंतां ईलस्व ईलेथां ईलध्वं ईले ईलावहे
ईलामहे अनद्यतने पेलत पेलेतां पेलंत पेलाथाः पेलेथां पेलध्वं पेले पेलावहि पेलामहि डुपचंष
पाके डुकारषकारानुबंधौ कार्यार्थौ चकारोऽकारउच्चारणार्थः सर्वत्रवाविप्रयोगः वर्तमानेपचति।
पचतः पचंति पचसि पचथः पचथ पचामि पचावः पचामः विधिसंभावनयोः पचेत् पचेतां
पचेयुः पचेः पचेतम् पचेत पचेयम् पचेव पचेम आशिषि पचतु पचतात् पचताम् पचन्तु पच
पचतात् पचतम् पचत पचानि पचाव पचाम अद्यतेन अपचत् अपचद् अपचताम् अपचन् अपचः
अपचतम् अपचत अपचम् अपचाव अपचाम लट् पचते पचेते पचंते पचसे पचेथे पचध्वे पचे प
चावहे पचामहे लिङ्. पचेत पचेयातां पचेरन् पचेथाः पचेयाथां पचेध्वं पचेय पचेवहि पचेमहि

सा० उ० ३२ 31

लोट् पचतां पचेतां पचंतां पचस्व पचेथां पचध्वं पचे पचावहै पचामहै लङ् अपचत अपचेतां अ
पचन्त अपचथाः अपचेथां अपचध्वं अपचे अपचावहि अपचामहि अनेनप्रकारेण भ्वादिगणः सा
ध्यः इदानीं लुग्विकरणादादिगणात्कार्यमिति वाद्य अत्वारो गणा योज्यंते अद भक्षणे अकार उच्चार
णार्थः । अदादेर्लुक् । अदादेर्गणादुत्पन्नस्य शपो विकरणस्य लुक् स्यात् । एवमेव पाउसानां । उसानां ए
सेपरेव पा भवंति इति उकारः अत्ति अत्तः अदन्ति अत्सि अत्थः अत्थ अद्मि अद्वः अद्मः लिङ् अद्यात् अद्या
तां अद्युः अद्याः अद्यातं अद्यात अद्यां अद्याव अद्याम लोट् अत्तु अत्तात् अत्तां अदन्तु । उसाद्धिर्हेः ॥
उसादुत्तरस्य हेर्धिर्भवति अद्धि अत्तात् अत्तं अत्त अदानि अदाव अदाम लङ् अदोऽदिस्योरडागमो वक्तव्यः
आदत् आत्तां आदन् आदः आत्तं आत्त आदं आद्व आद्म शीङ् स्वप्ने ङकार आत्मनेपदार्थः प्रागवल्लुगादि
शीङः । शीङः सार्वधातुके गुणः स्यात् शेते शयाते । शीङो रत् । शीङः परस्यांत इत्येतस्य रुडागमो
भवति । आतोऽन्तोऽदनन्तः । आन आत्मनेपदस्यांत इत्येतस्यादुर्भवति अकारात्तस्मान्न भवति शेरते शे
षे शयाथे शेध्वे शये शेवहे शेमहे लिङ् शयीत शयीयातां शयीरन् शयीथाः शयीयाथां श
यीध्वं शयीय शयीवहि शयीमहि लोट् शेतां शयातां शेरतां शेष्व शयाथां शेध्वं शये शयावहै
शयामहै लङ् अशेत अशयातां अशेरत अशेथाः अशयाथां अशेध्वं अशेहि अशेवहि अशेमहि ब्रू
ञ् व्यक्तायां वाचि ञकार उभयपदार्थः । ब्रुवस्तावीपितिस्मि । ब्रूञ ई प्रत्ययो भवति उकारसकारमका ३२

यादौपितिपरे अवादौविषये गुणागाद्देशो ब्रवीति ब्रूतः। श्नोर्धातोरियुवौस्वरे। श्नोर्वेत्यनुवर्त्तमाने तथा
तोर्विकरणस्यनोः संयोगपूर्वस्यधातोश्चेवर्णोवर्णयोरियुवौभवतः स्वरेपरे अनेकस्वरस्यासंयोगपू
र्वस्यतुय्वौ। नानस्योर्वः। अनेकस्वरस्यासंयोगपूर्वस्यतुय्वौ। नानप्योर्वः। अनेकस्वरस्यासंयोगपूर्वस्यव
धातोरुवर्णस्यानपिविषये स्वरेपरे वकारोनभवति किंतु उवेवस्यात् जुहुवतुः जुहुवुः बिभ्यतुः।
बिभ्युरित्यादि ब्रुवंति ब्रवीषि ब्रूथः ब्रूथ ब्रवीमि ब्रूवः ब्रूमः ब्रूते ब्रुवाते ब्रुवते ब्रूषे ब्रुवाथे ब्रूध्वे
ब्रुवे ब्रूवहे ब्रूमहे। ब्रुवआहस्थपंचानां। ब्रुवउत्तरेषांपंचानांतिबादीनांप्रत्ययानांक्रमेणाप् अत
अतुस् उस् थप् अथुस् इत्येते आदेशाभवंति ब्रुवश्चाहादेशोभवति णकारोवृद्ध्यर्थः आह आहतुः
आहुः। नथे। ब्रुवोहकारस्यतकारोभवति थकारेपरे आत्थ आहथुः। विधिसंभावनयोः। ब्रूया
त् ब्रूयातां ब्रूयुः ब्रूयाः ब्रूयातं ब्रूयात ब्रूयां ब्रूयाव ब्रूयाम ब्रुवीत ब्रुवीयातां ब्रुवीरन् ब्रु
वीथाः ब्रुवीयाथां ब्रुवीध्वं ब्रुवीवहि ब्रुवीमहि लोट् ब्रवीतु ब्रूतात् ब्रूतां ब्रुवन्तु ब्रूहि ब्रूता
त् ब्रूत ब्रूत ब्रवाणि ब्रवाम ब्रूतां ब्रुवातां ब्रुवतां ब्रूष्व ब्रुवाथां ब्रूध्वं ब्रवै ब्रवावहै ब्रवामहै
लङ् अब्रवीत् अब्रूतां अब्रुवन् अब्रवीः अब्रूतं अब्रूत अब्रवं अब्रूव अब्रूम अब्रूत अब्रुवातां अ
ब्रुवत अब्रूथाः अब्रुवाथां अब्रूध्वं अब्रुवि अब्रूमहि लुग्विकरणस्यापि जुहोत्यादिगणस्यविशेषः
हुदानादानयोः। जुहोत्यादेश्च। कादेर्गणादुत्पन्नस्यापो लुग्भवति तस्मिंल्लुकि सति धातोर्द्विर्वचनम्।

सा. सस्वरस्यादेर्द्विरुक्तिः। सस्वरस्याद्योवयवो द्विरुक्तो द्विर्भवति अद्विरितिद्वनोर्थं द्विर्वचनं न भवतीत्यर्थः
उ. जहोश्चुः। पूर्वसंबंधिनोः कवर्गहकारयोश्चुत्वं भवति वर्गचतुर्थयोर्ह्रस्वस्य वर्णाः। जपानां जबचपाः।
२१ पूर्वसंबन्धिनां झभानां जबा चपाश्च भवंति जुहोति जुहुतः हेर्द्विरुक्तादुत्तरस्यान्तस्यातङ् इतस्माद्भवति जु
ह्वति जुहोषि जुहुथः जुहुथ जुहोमि। उर्वपोर्वालोपः। प्रत्ययसंबंधिनोरुकारस्य वमोः परयोर्लो
पो वा भवति क्वचिदन्यत्रापि जुहुवः जुहुवः जुहुमः विधौ जुहुयात् जुहुयातां जुहुयुः जुहु
याः जुहुयातं जुहुयात जुहुयां जुहुयाव जुहुयाम। आशीर्मिति वादिविधौ वा वक्तव्यः। अग्निहोत्रं
जुहोति अग्निहोत्रं जुहुयादित्यर्थः। अस्य लिंवादेः लोडिति पाणिनीयानां संज्ञा लोट् जुहोतु जुहुता
त् जुहुतां जुह्वतु। हेर्धिः। झपाह्रादुत्तरस्य हेर्धिर्वक्तव्यः जुहुधि जुहुतात् जुहुतं जुहुत जुहवानि
जुहवाव जुहवाम अनद्यतने अजुहोत् अजुहुतां। अनतस्। द्विरुक्तादुत्तरस्यानउस्भवति गुणो
वा रेफो अजुहवुः अजुहोः अजुहुतं अजुहुत अजुहवं अजुहुव अजुहुम अजुहुमेत्यादि।
ओहाङ् गतौ टकारश्चात्मनेपदार्थः ओकार उदित्कार्यार्थः हनेश्च नित्यमिति सर्ववद्द्विर्वचनादि। ह्रस्वः।
पूर्वसंबंधिनो दीर्घस्य ह्रस्वो भवति। भृञामिल्लकि। डुभृञ् धारणपोषणयोः ओहाङ् गतौ माङ् माने एषां
पूर्वस्याकारस्येकारो भवति लकि सति हेस्तो लोपोनुवर्तते। ईकारश्च। द्विरुक्तस्याकारस्य आकारस्य लो
पो भवति ङिति स्वरे ईकारश्चास्यात् ङिति हसे परे जिहीते जिहाते जिहते जिहीषे जिहाथे जिही २१

हीध्वे जिहे जिहीवहे जिहीमहे विधिः जिहीत जिहीयातां जिहीरन् जिहीथाः जिहीयाथां
जिहीध्वं जिहीय जिहीवहि जिहीमहि लोट् जिहीतां जिहातां जिहतां जिहीष्व जि-
हाथां जिहीध्वं जिहै जिहावहै जिहामहै लङ् अजिहीत अजिहातां अजिहत अजिहीथाः
अजिहाथां अजिहीध्वं अजिहि अजिहीवहि अजिहीमहि डुभृञ् धारणपोषणयोः पूर्ववत्
कार्यं । रः । पूर्वसंबन्धिनऋकारस्याकारो भवति भृञोऽलुकि गुणः बिभर्ति बिभृतः बिभ्रति
इत्यादि । दिस्योर्लोपः । हसाद्भयोर्दिप्सिपोस्त इत्येनयोर्लोपो भवति अबिभः अबिभृतां अबिभ-
रुः इत्यादि ओहाक् त्यागे द्विर्वचनादि पूर्ववत् जहाति जहीतः जहति जहासि जहीथः जही-
थ जहामि जहीवः जहीमः । जहातेराकारस्य लोपो वक्तव्यः यादादौ परे जह्यात् जह्यातां ।
जह्युः जह्याः जह्यातं जह्यात जह्यां जह्याव जह्याम जहातु जहीतात् जहीतां जहतु ।
इर्वाहौ । जहातेर्हौ परे इकारो वा भवति ईकाराकारौ च भवतः आकारः सिद्ध एव जहिहि जही-
हि जहीतात् अथवा जहीतं जहीत जहानि जहाव जहाम अजहात् अजहीतां । उस्यालोपः । हि
हन्नस्य धातोराकारस्य लोपो भवति उसि परे अजहुः अजहाः अजहीतं अजहीत अजहां अ-
जहीव अजहीम डुदाञ् दाने नकारउभयपदार्थः डुकारो ड्वित्कार्यार्थः ददातीति स्थिते द्विर्व-
चनादि पूर्ववत् ङत्वः ददाति । दादेः । द्विरुक्तस्य दादेराकारस्य लोपो भवति ङिति परे हसे च पा

सा॰ उ॰ ३३ 33

जुसानामितिह्रस्वत्वं दत्तः ददति ददासि दत्थः दत्थ ददामि दद्वः दद्मः दद्यात् दद्यातां दद्युरित्या
दि। ददातु दत्तात् वा दत्तां ददतु। देहि। दासीनां दानादीनां ह्लौ परे पूर्वस्य लोपो भवति धातोराकारस्य
चैकारः देहि दत्तात् वा दत्तं दत्त ददानि ददाव ददाम अनद्यतने अददात् अदत्तां अददुः अददाः
अदत्तं अदत्तेत्यादि आत्मनेपदे पूर्ववदाकारलोपादि दत्ते ददाते ददते दत्से ददाथे दद्ध्वे ददे द
द्वहे दद्महे ददीत ददीयातां ददीरन् ददीथाः ददीयाथां ददीध्वं ददीय ददीवहि ददीमहि।
आशिषि दत्तां ददातां ददत्वेत्यादि अदत्त अददातां अददत अदत्थाः इत्यादि डुधाञ् धारणपोष
णयोः पूर्ववल्लुगादि दधाति। पूर्वस्यादि निजसेधः। धातोर्ङि निजसे परे पूर्वस्य दकारस्य धका
रादेशो भवति दादेरित्याकारलोपः एवं से च पाजसानां इति धस्यत्वं धत्तः दधति दधासि धत्थः
धत्थ इत्यादि ह्यस्तने अदधात् अधत्तां अदधुरित्यादि दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुति
मोदमदस्वप्नकान्तिगतिषु उकार इदुकारत्वार्थः दिवु इति स्थिते। दिवादेर्यः। दिवादेर्गणा
द्यप्रत्ययो भवति चतुर्षु परेषु गुणापवादः छ्वोर्विहसे इति दीर्घः दीव्यति दीव्यतः दीव्यन्ति दीव्यसि
दीव्यथः दीव्यथ दीव्यामि दीव्यावः दीव्यामः लिङ् दीव्येत् दीव्येतां दीव्येयुः दीव्येत दीव्येयं
दीव्येव दीव्येम आशिषि दीव्यतु दीव्यतात् वा दीव्यतां दीव्यन्तु दीव्य दीव्यतात् वा दीव्यतं दीव्य
त दीव्यानि दीव्याव दीव्याम अनद्यतने अदीव्यत् अदीव्यतां अदीव्यन् इत्यादि षूञ् अभिषवे। ३३

अकारउभयपदार्थः। आदेः ष्णः स्नः। धातोरादौ वर्तमानयोः षकारणकारयोः सकारनकारौ भ
वतः। स्वादेर्नुः। स्वादेर्गणात् नुप्रत्ययो भवति चतुर्षु परेषु शपोपवादः प्रागभिप्रयोगः। आदेश्च
तथा तो क्षणुमान्। आदेः ष्ण उपसर्गात्परेषां स्वादीनां नमादीनां च धातूनां सकारनकारयोस्तौ पूर्वभावि
नावेव षकारणकारौ भवतः तथा नेष्वेव निमित्तेषु परतः। नुपः पिति। विकरणस्य नुप्रत्ययस्य उप्र
त्ययस्य च गुणो भवति पिति परे अभिषुणोति सोमं सोमयाजी क्षणोति क्षणुतः क्षण्वन्ति। क्षणोषि
क्षणुथः क्षणुथ क्षणोमि पर्वमोर्वा लोपः क्षण्वः क्षणुवः क्षण्मः क्षणुमः विधौ क्षणुयात् क्षणुयातां
क्षणुयुः क्षणुयाः क्षणुयातं क्षणुयात क्षणुयाम् क्षणुयाव क्षणुयाम लोट् क्षणोतु क्षणुताद्वा क्षणुतां
क्षण्वन्तु। ओर्वा हेः। प्रत्ययासंबंधिन उकारात्परस्य हेर्लुग्भवति वाग्रहणात्क्वचित्संयोगादुत्तरस्य तह
त्वत्तनूकारो इत्यादिकस्य न भवति तद्गणग्रहादित्यादि क्षणु क्षणुताद्वा क्षणुतं क्षणुत क्षणवानि क्ष
णवाव क्षणवाम अनद्यतने अक्षणोत् अक्षणुताम् अक्षण्वन् अक्षणोः अक्षणुतं अक्षणुत अक्षणवं।
अक्षणुव अक्षणुम आत्मनेपदेऽपि क्षणुते क्षण्वाते क्षण्वते विधिसंभावनयोः क्षण्वीत क्षण्वीयाताम्
क्षण्वीरन् क्षणुतां क्षण्वातां क्षण्वतां अक्षणुत अक्षण्वातां अक्षण्वत इत्यादि रुधिर् आवरणे इरनुबं
धः। रुधादेर्नम्। रुधादेर्गणात् नम्प्रत्ययो भवति चतुर्षु परेषु शपोपवादः मकारो मिदन्त्यात्स्वरात्।
त्यादिति स्थाननियमार्थः। तथोर्धः। झभान्ताद्धातोः परयोस्तकारथकारयोर्धकारादेशो भवति रुणे

सा. उ. २४

34

नवाइतिधस्य हः णत्वं कृणद्धि। नमसोऽस्य। नम् इत्येतस्य विकरणाकारस्य अस भुवीत्यस्य धातोरअ-
कारस्य लोपो भवति ङितिपरे कृन्तः कृन्तन्ति कृणत्सि कृन्थः कृन्थ कृणत्मि कृन्त्वः कृन्त्मः लिङि
कृन्त्यात् कृन्त्यातां कृन्त्युः कृन्त्याः कृन्त्यातं कृन्त्यात कृन्त्यां कृन्त्याव कृन्त्याम लोट् कृणत्तु
कृन्तात् कृन्तां कृन्तन्तु जसाद्धिर्हेरिति धि कृन्द्धि कृन्तात् कृन्तं कृन्त कृणतानि कृणताव कृणता-
म लङ् दिस्योर्हसात् असान्तरयोः दिप् सिप् अणायोः लोपः स्यात् वावसाने इति विकल्पेन ध-
स्य दकारतकारौ अकृणत् अकृणम् अकृन्तां अकृन्तन् मध्यमपुरुषैकवचने सिपि लुप्ते धस्य वि-
कल्पेन दकारः कृते। दस्सः। दस्य वा सकारो भवति सिपि विषये स्रोर्विसर्गः अकृणः अकृणद् अकृण-
त् अकृन्तम् अकृन्त अकृणम् अकृन्त्व अकृन्त्म आत्मनेपदानि कृन्ते कृन्ताते कृन्तते कृणत्से कृ-
न्ताथे कृन्द्धे कृन्ते कृन्त्वहे कृन्त्महे कृन्तीत कृन्तीयातां कृन्तीरन् कृन्तीथाः कृन्तीयाथां कृन्ती-
ध्वं कृन्तीय कृन्तीवहि कृन्तीमहि कृन्तां कृन्तातां कृन्ततां अकृन्त अकृन्तातां अकृन्तत भुजपाल-
नाभ्यवहारयोः चोः कुः भनक्ति भुङ्क्तः भुञ्जन्ति भुञ्ज्यात् भुञ्ज्यातां भुञ्ज्युः भनक्तु भुङ्क्ताद्वा भुङ्क्तां
भुञ्जन्तु अभनक् इत्यादि तनु विस्तारे उकार उच्चारणार्थः। तनादेरुप्। तनादेर्गणात् उ प्रत्ययः
स्यात् चतुर्षु परेषु पकारः पित्कार्यार्थः लघूपधगुणः तनोति तनुतः तन्वन्ति तनोषि तनुथः
तनुथ तनोमि तनुवः तन्वः तनुमः तन्मः लिङ् तनुयात् तनुयातां तनुयुरित्यादि लोट् तनोतु २४

तनुतां तन्वन्तु तनु तनुतात् तनुतं तनुत तनवानि तनवाव तनवाम लङ् अतनोत् अ-
तनुतां अतन्वन् इत्यादि तनोतिवन्नेयम् डुकृञ् करणे अकार उभयपदार्थः डुकारोड्वित्वार्-
थः उपगुणाइति सूत्रेण ऋकारस्य गुणः अर् नूपइति गुणः करोति । ङिन्यदु करोते । उकारस्य
उकारः स्यात् ङि-तिपरे कुरुतः कुर्वन्ति करोषि कुरुथः कुरुथ करोमि । कृञोनित्यंम्वोः ।
कृञः वमोः परयोः नित्यमुकारलोपः स्यात् कुर्वः कुर्मः लिङ् । कृञोये । कृञोन्नस्योकार-
स्यलोपः स्यात् येपरे । कुर्यात् । कुर्यातां कुर्युः कुर्याः कुर्यातं कुर्यात कुर्यां कुर्याव कुर्याम लो-
ट् करोतु कुरुतात् कुरुतां कुर्वन्तु कुरु कुरुतात् कुरुतं कुरुत करवाणि करवाव करवाम ल-
ङ् अकरोत् अकुरुतां अकुर्वन् अकरोः अकुरुतं अकुरुत अकरवं अकुर्व अकुर्म आत्मनेप-
दानि कुरुते कुर्वे तेकुर्वते कुरुषे कुर्वाथे कुरुध्वे कुर्वे कुर्वहे कुर्महे कुर्वीत कुर्वीयातां कुर्वीरन्
कुर्वीथाः कुर्वीथां कुर्वीध्वं कुर्वीय कुर्वीवहि कुर्वीमहि कुरुतां कुर्वातां कुर्वतां कुरुष्व कुर्वा-
थां कुरुध्वं करवै करवावहै करवामहै अकुरुत अकुर्वातां अकुर्वत अकुर्वतां अकुरुथाः ।
कुर्वाथां अकुरुध्वम् अकुर्वि अकुर्वहि अकुर्महि ॥ इति तनादयः । तृद्व्यथने अकार उच्चारणार्थः
तरदेः । तरदेर्गणात् दप्रत्ययोभवति चतुर्षुपरेषु अपोपवादः तरदति तरदतः तरदन्ति तरदसि तरद-
थः तरदथ तरदामि तरदावः तरदामः तरदेत् तरदेतां तरदेयुः तरदेः तरदेतं तरदेत तरदेयं तरदेव तरदेम

सा. तुदतु तुदतात् तुदतां तुदन्तु तुद तुदतात् तुदतं तुदत तुदानि तुदाव तुदाम अतुदत् अतुद-
उ. तां अतुदन् अतुदः अतुदतं अतुदत अतुदं अतुदाव अतुदाम आत्मनेपदेपि तुदते तुदेत तुदतां।
३५ अतुदत इत्यादि ॥ डुक्रीञ् द्रव्यविनिमये डुकारञकारौ प्राग्वत्। श्नाक्र्यादेः। क्र्यादेर्गणात् श्नाप्रत्ययो
35 भवति चतुर्ष्वपरेषु क्रीणाति। ई हसे। नाइत्यस्याकारस्य ईः स्यात् ङिति हसे परे क्रीणीतः। नातः
नामसंबंधिन आकारस्य लोपो भवति ङिति स्वरे परे क्रीणन्ति क्रीणासि क्रीणीथः क्रीणीथ क्री-
णामि क्रीणीवः क्रीणीमः। विधौ। क्रीणीयात् क्रीणीयातां क्रीणीयुरित्यादि क्रीणातु क्रीणी-
तां क्रीणन्तु क्रीणीहि क्रीणीतात् क्रीणीतं क्रीणीत क्रीणानि क्रीणाव क्रीणाम लङ् अक्रीणा-
त् अक्रीणीतां अक्रीणन् अक्रीणाः अक्रीणीत अक्रीणां अक्रीणीव अक्रीणीम आत्मनेपदेपि
क्रीणीते क्रीणाते क्रीणते क्रीणीषे क्रीणाथे क्रीणीध्वे क्रीणे क्रीणीवहे क्रीणीमहे विधौ क्री-
णीत क्रीणीयातां क्रीणीरन्नित्यादि लोट् क्रीणीतां क्रीणातां क्रीणतां क्रीणीष्व क्रीणाथां।
क्रीणीध्वं क्रीणै क्रीणावहै क्रीणामहै ह्यस्तनी अक्रीणीत अक्रीणातां अक्रीणत अक्रीणीथाः
अक्रीणाथां अक्रीणीध्वं अक्रीणीवहि अक्रीणीमहि ग्रहउपादाने अकार उच्चारणार्थः। ग्रहादेर्ङि-
ति च। ग्रहज्यावयिव्यधवशेव्यच व्रश्च प्रच्छ् भ्रस्जवृश्चानामित्यादीनां किति ङिति च
परे संप्रसारणं भवति रेफस्य ऋकारः गृह्णाति गृह्णीतः गृह्णन्ति गृह्णासीत्यादि विधौ गृह्णी ३५

याति गृह्णीतां गृह्णन्तु । हसात् शानाहौ । हसन्तात् क्र्यादिगणात् हानप्रत्ययो भवति हौ परे ना१
आदेरिति णत्वं न भवति अतः इति हि लोपः गृहाण गृह्णीयात् गृह्णीतं गृह्णीत गृह्णा
नि गृह्णाव गृह्णाम लङ् अगृह्णात् अगृह्णीतां अगृह्णन् अगृह्णाः अगृह्णीतं अगृह्णीत अ
गृह्णाम् अगृह्णीव अगृह्णीम क्वचिन्नीणत्वनिषेधम् पुष पुष्टौ पुषस्तेये अकारउच्चारणार्थः
पुष्णाति पुष्णीतः पुष्णन्ति इत्यादि एवं पुष्णाति विधौ पुष्णीयात् पुष्णीयाताम् पुष्णीयुरित्या
एवं पुष्णीयात् लोट् पुष्णातु पुष्णीतात् पुष्णीतां पुष्णन्तु पुषाण पुष्णीतात् इत्यादि पुष पुष्टा१
विति धातुर्दिवादिगणेऽपि पठितः पुष्यति पुष्यतः पुष्यन्ति इत्यादि एवं पुष्णातु लङ् अपुष्णात् अपु
ष्णीतां अपुष्णन्नित्यादि एवमपुष्यत् अपुष्यतां अपुष्यन्नित्यादि एवं सर्वत्र कर्तरि प्रक्रिया हष्ट
व्या एतद्विभक्तिचतुष्टयं सार्वधातुकसंज्ञं परमार्थधातुकसंज्ञं पाणिनीयानाम् ॥ अथ भावकर्मणोर्थे
प्रक्रिया निरूप्यते ॥ आद्भ्युविकर्मणि अकर्मकेभ्यो धातुभ्यो भावे सकर्मकेभ्यः कर्मणि चात्म
नेपदं स्यात् ये कर्म न निरपेक्षतां क्रियामाहुस्ते अकर्मकाः भूएधग्लासपा दीङ्प्रभृतयः यथाहः वृद्धिक्ष
यभवजीवितमरणलज्जासत्तास्थितिजागरणं शयनक्रीडारुचिदीप्त्यर्थे धातुगणं तमकर्मकमाहुः
पञ्चातर्षे । धातोः भावे कर्मणि च यक्प्रत्ययः स्यात् चतुर्षु परेषु परतः ककारो गुणाभावार्थः भा
वस्यैकत्वादेकवचनमेव प्रथमपुरुषस्य भवति भूयेत भवता भूयेत भूयतां अभूयतेति पुष्यते धार्मि

सा॰
उ॰
७४
36

कैः पथ्यते पथ्यतां पथ्येत अ्रासउपवेश ... भावेऽस्यते सद्भिः। शीङो यङ्यकि वक्तव्यः शीङ् इति
गुणः शय्यते सुखेन शय्येत शय्यतां अशायत अकर्मकोऽपि कदाचित् सकर्मकतामनुभवति उपसर्गे
ण धात्वर्थो बलादन्यत्र नीयते उपसर्गवशाद्धात्वर्थान्तरविलासवत् प्रहाराहारसंहारविहारपरिहा
रवत् इति वचनात् यथाऽस्यावमनुभूयते स्वामिना येन कर्म सापेक्षा क्रिया माह्नः तेऽसकर्मका धात्वर्थं
बाधते कश्चित् कैश्चिदनुवर्तते तमेव विशिनष्ट्येकोऽनर्थकोऽन्यत्र प्रयुज्यते कटः क्रियते त्वं दुःखी क्रियसे
रागैः अहं क्रिये। अहकि रिङ्। ऋकारस्य रिङादेशः स्यात् अकारे यकि च परे ङकारो व्यवधानार्थः
क्रियते क्रियेते इत्यादि क्रियेत क्रियेयातां क्रियेरन् इत्यादि मृङ् प्राणत्यागे नकार आत्मनेपदार्
र्थः म्रियते म्रियेते म्रियन्ते इत्यादि प्रागुक्त हृङ् आदरे आङ्पूर्वः दानं आद्रियते सहस्रपेक्षया वर्तते
णसामापेक्षाकर्मणः सापेक्षा आकांक्षा इत्यर्थः स्वकृप्रापणे ह्रियते हृञ् हरणे ह्रियते गणं चोराणि
चिञ् चये। येर्दीर्घः। क्ङिति यकारे पूर्वस्य दीर्घः स्यात् चीयते चीयेते इष्टिकाश्चीयंते ङुदाधातोरा
कारस्य ईः स्यात् क्ङिति चपरे दीयते दीयेते दीयंते इत्यादि वेदविदे दो दीयतामित्यादि डुधाञ्
धारणपोषणयोः धान्यं निधीयते भूमौ निधीयते इत्यादि माङ् माने पूर्ववदीकारः मीयते मीयेते
मीयन्ते केयौरेणाहं। सन्ध्यक्षराणामा। सन्ध्यक्षराणां धातूनां आत्वं स्यात् अनपि विषये कीयते
कीयन्ते मीयते मीयेते मीयन्ते रीयते रीयेते रीयन्ते इत्यादि धोतन्नुकरणे धीयते ओहाकात्यागे। ७४

हीयते योऽग्नं नकर्मणि विश्रवसर्वः व्यवसीयते पायाते पीयते शकुन्मायां ह्रीयते घ्रायति
निवृत्तौ शादेरसः स्तः निमित्ताभावेनैमित्तिकस्याप्यभाव इति दस्य घः षत्वनिवृत्तौ धुत्वनिषेधः शि
थ्यीयते तनुविस्तारे। तनोतेर्वा यकि। तनोतेन्नकारस्याकारादेशो वा स्यात् यकि परे ताय
तेतायेते तायंते पक्षे तन्यते तन्येते तन्यंते इत्यादि। गुणोर्तिसंयोगाद्योः। ऋगतावित्यस्य धातोः
संयोगादेश्च ऋकारस्य गुणः स्याद्यङि लिङि परे अर्यते अर्येते अर्यन्ते स्मृ स्मरणे स्मर्यते स्मर्येते स्म
र्यन्ते इत्यादि। जागर्तेश्च। जागृ निद्राक्षये इत्यस्य गुणो भवति किति ङिति परे जागर्यते। यत्कर्मणो
णां संयोगात्कर्तृत्वेन विवक्ष्यते। सकर्मककर्त्राक्रियमाणं तु यत्कर्म स्वयमेव प्रसिध्यति सुकरैः गुणा
नामैर्यस्मात्कर्मकर्तेति तं विदुः तद्यथैतदेवोदाहरणम् पच्यते ओदनः स्वयमेव पच्येते पच्यन्ते
इत्यादि भिदिर् विदारणे इत्यत्र कर्मवद्भावे इति तेनेति विशेषणार्थः दियते काष्ठं स्वयमेव। अथ द्विकर्म
कोदाहरणम्। दुहियाचिरुधिप्रच्छिभिक्षिचिञ्ब्रूञ्शासिजिमथ द्विकर्मकाः स्युः नीह्रीकृष्वहणिञ्ग्रहाष्ठ
प्रधानकर्मभाक् नीञ् प्रापणे नगरं नीयते नागरिकैर्वनेचरः नीयेते नीयन्ते इत्यादि दुयाचृ यञ्चा
यां दुकारस्कारौ कार्यार्थौ भोजनं याच्यते यजमानो याचकेन प्रच्छ ज्ञीप्सायां उकारस्थानार्थः
ग्रहां किति ङिति चेति संप्रसारणम् पृच्छ्यते पन्थानं पथिकेन पान्थः पृच्छ्येते पृच्छ्यन्ते इत्यादि शि
ष्येण चार्थं तत्त्वं पृच्छ्यते इत्यादि पुनः कर्तरि प्रणीयते परोक्षेणाप श्रुत्वप उक्त एष अथ स आगम

सा.
उ.
३२

वम एआतेइरे सेआथेध्वे एवहेमहे पकारः पित्कार्यार्थः णकारो वृद्ध्यर्थः धातोः परोक्षेऽतीते काले।
णबादयः स्युः। द्वित्वम्। णबादियोगे धातोर्द्विर्वचनं भवति। अ भो णादौ। पूर्वस्याकारस्य भूशब्दस्य च अ
कारादेशो भवति णादौ सतीत्यर्थः झसानां जबगडदा इति भस्य बः। भुवो वुक्। भुवो वकारागमः स्या
त् णबादौ स्वरे परे बभूव बभूवतुः बभूवुः। कादेर्णादेः। कृसृभृवृस्तुद्रुस्रुश्रु इत्येतस्मात्परस्य णा
देर्णस्य वसादेरिडागमो न स्यात् अन्यस्माद्भवतीति नियमादिडागमः बभूविथ बभूवथुः बभूव बभूव
बभूविव बभूविम बलिर्बलवान्बभूव। डुपचष् पाके। अ उपधायाः। धातोरुपधाया अकारस्य वृद्धिः
स्यात् ञिति णिति च परे। पूर्वस्य हसादिः शेषः। पूर्वस्यादिः शिष्यते वर्णोऽन्ये लुप्यन्ते पपाच। णादिः कि
त्। णादिरपि किद्भवति। लोपः पचां किस्येचास्य। पचादीनां मनादेशादीनां किति णादौ सति पूर्वलो
पः स्यात् अकारस्यैकहसस्य एकारः पेचतुः पेचुः वेट् थपः अनिटां धातूनां थपो वा इट् स्यात्। सेट्
कस्य थपः। किस्येवा वक्तव्यम्। किस्यादेत्वलोपौ पेचिथ पपक्थ पेचथुः पेच णबुत्तमो वा णिद्व
क्तव्यः ततो विकल्पेन वृद्धिः पपाच पपच पेचिव पेचिम आत्मनेपदेऽपि एत्वलोपादि पूर्ववत्।
पेचे पेचाते पेचिरे पेचिषे पेचाथे पेचिध्वे पेचे पेचिवहे पेचिमहे डुकृञ् करणे। रः। पूर्वसं
बंधिन ऋकारस्याकारः स्यात् कुहोश्चुः चकृ अ इति स्थिते। धातोर्नामिनः। धातोरन्त्यभूतस्य नामि
वृद्धिः स्यात् ञिति णिति च परे चकार चक्रतुः चक्रुः चकर्थ चक्रथुः चक्र चकार चकर चकृ ३२

व चकृम रामोराज्यंचकार आत्मनेपदे चक्रे चक्रे चक्राते चक्रिरे चकृषे चकृषे चक्राथे ॥
नामिनोवर्णाद्धोढः। नाम्यंताद्धातोरुत्तरस्यथकारस्यढःस्यात् निमादीनांचवर्णसंबंधिनोनस्या
त् चकृढ्वेचक्रे चकृवहे चकृमहे अतभुवि अकारउच्चारणार्थः एवंवणादेरिद्विर्वचनंस
वर्णोदीर्घः सह आस आसतुः आसुः आसिथ आसथुः आस आस आसिम। कासादिप्रत्यया
दाम्भूपरः। कासादेर्धातोःप्रत्ययांताच्चआम्णबाधोपरे आम्प्रत्ययःस्यात् सचकृञस्तभूइत्येवंप
रःप्रत्ययोवक्तव्यः कासृशब्दकुत्सायांऋकारइत्कार्यार्थः कासांचक्रे कासांचक्राते कासां
चक्रिरे कासांचकृषे कासांचक्राथे कासांचकृढ्वे कासांचक्रे कासांचकृवहे कासांचकृम
हे कासामासे कासांबभूवेइति आसउपवेशने आसांचक्रे अयगतौ अयांचक्रे दयदानगतिर
क्षणह दयांचक्रे चकासृदीप्तौ चकासां चकार चकासां चक्रतुः चकासांचक्रुः चकासांचक
र्थेत्यादि चकासामासतुरित्यादि चकासामास चकासामासतुरित्यादि चकासांबभूवेत्यादि
जागृनिद्राक्षये जागरांचकार जागरांचक्रतुः जागरांचक्रुः जागरामास जागरांबभूवेत्यादि।
पयवृद्धौ पयांचक्रे पयामासे पयांबभूवेत्यादि विद्ज्ञाने अकारउच्चारणार्थः। आमिविदेर्नगुणः
आमिपरेविदेः गुणोनस्यात् आमः स्वरादिपाठाद्व्ययत्वम् विदांचकार विदामास विदांबभूवेत्या
दि ईक्षदर्शनाङ्कनयोः ईक्षांचक्रे ईक्षामासे ईक्षांबभूवेत्यादि ईक्षदर्शनाङ्कनयोः ईक्षांचक्रे ई।

सा॰
उ॰
४०

क्षामासे ईक्षांबभूवेत्यादि ईक्ष दर्शनांकनयोः ईक्षांचक्रे ईक्षामासे ईक्षांबभूवेत्यादि ऊह वित
र्के ऊहांचक्रे ऊहामासे ऊहांबभूवेत्यादि ईह चेष्टायां ईहांचक्रे ईहामासे ईहांबभूवेत्यादि एवमेका
च्यः । अथ प्रत्ययांतेभ्य आम् निरूप्यते । डुकृञ् करणे कृ इति स्थिते । रधन ईर् । पूर्वसंबंधिनः ऋकारस्य
इरादेशः स्यात् सन्द्विर्वचनस्य । इच्छायामात्मनः सः । धातोरात्मन इच्छायामर्थे सप्रत्ययः स्यात् गम
इति स्थिते । सादेर्द्विश्च । सादेः संबंधिनो द्विश्च भवति किर् स इति स्थिते । पूर्वस्य हसादिः शेषः । पूर्व
स्यादिर्हसो वशिष्यते अन्ये लुप्यंते कस्वः कहोः चुः किलात्सः षः चिकीर्ष इति स्थिते सधातव इति धा
तुसंज्ञायां चिकीर्ष आम् इति स्थिते कासादिप्रत्ययांताच्च हूपर इति आम् चिकीर्षांचकार चिकी
र्षांचक्रतुः चिकीर्षांचक्रुरित्यादि चिकीर्षांचक्रुरित्यादि चिकीर्षामास चिकीर्षांबभूवेति भुज ।
पालनाभ्यवहारयोः अकार उच्चारणार्थः भुज स इति स्थिते सादेर्द्विश्चेति द्वित्वं पूर्वस्य हसादिशे
ष इति जस्य लोपः चोः कुः इति कः किलात्सः षः कषसंयोगे क्षः आम् बुभुक्षांचकारेत्यादि पुत्र इ
ति स्थिते । आचार उपमानात् । उपमानादाचारेर्थे यप्रत्ययः स्यात् शिष्यं पुत्रमिवाचरति पुत्रीयांबभू
व पच् । यस्ये । इच्ध्व च इति यः सर्वस्याकारस्य इकारो भवति ये परे चोः [illegible] किलात्सः षः पिपक्षां
चकार पिपक्षामास पिपक्षांबभूव द्विरुक्तानामिति वचनादेव द्वित्वस्य भूजोऽलकीन्यस्यासिद्धि ।
रित्यादिः णिप्रत्ययांतात् पालयांचकार पालयांबभूव पालयामास वर्णावर्णेन चुरादित्वात् ४०

ङिः वर्णिग्रामगुणाः प्रथय् वर्णयांबभूव वर्णयांचकार । भीऽजभृञ्ह्रीणां द्विः सन्ध्यानामाम्यावञ्च
व्यः ञिभी भये बिभयांचकार बिभयामास बिभयांबभूवेत्यादि बिभाय बिभ्यतुः बिभ्युः ।
बिभयिथ बिभेथ बिभ्यथुः बिभ्य बिभाय बिभय बिभिव बिभिम हु दानादानयोः जुहु
वांचकार जुहवामास जुहवांबभूवेत्यादि जुहाव जुहुवतुः जुहुवुः जुहविथ जुहोथ जु
हुवथुः जुहुव जुहाव जुहुविव जुहुविम डुभृञ् धारणपोषणयोः द्वित्वं इत्यकारः भृञोऽल्
कीति इकारः ऋणान्तेनवाचपाश्चेति वः गुणाद्रूपर् बिभरांचकार बिभरामास बिभरांबभूवेत्या
दि बभार बभ्रतुः बभ्रुः बभर्थ बभ्रथुः बभ्र बभार बभर बभृव बभृम ह्री लज्जायां
जिह्रियांचकार जिह्रियामास जिह्रियांबभूवेत्यादि संयोगपूर्वस्यानुधातोरियिति नीय् जिह्राय ।
जिह्रियतुः जिह्रियुः जिह्रयिथ जिह्रेथ जिह्रियथुः जिह्रिय जिह्राय जिह्रयिव जिह्रि
यिम । जि जये सण्परोक्षयोर्जेर्गिः । जेर्धातोः सन्प्रत्यययोः सण्परोक्षयोः गिरादेशः स्यात् जिगाय जि
ग्यतुः जिग्युः जिगयथ जिगेथ जिग्यथुः जिग्युः जिगाय जिग्यिव जिग्यिम वेविव्यापक्र
वयोरल्पकालेपिणगादिवक्तव्यः लघपरिभाषणे सुप्तोहं किल विललाप नाहं कलिङ्गं जगा
म गत्तृगतौ प्रागवत् णबादि ऊहोः चुरितिजः । गमां क्वौ । गम हन जन खन घस पञ्चानामुपधा
याअकारस्य लोपः स्यात् स्वरे किति ङिति च परे जग्मतुः जग्मुः जगमिथ जगन्थ जग्मथुः ज

सा. उ. ३९

39

ग्मुः जगाम जगम जगमिव जगमिम जगामागमेर्ण्यार्द्विणाश्राम् हनहिंसागत्योः अकारउच्चार
णार्थः । हनोघ्नः । हंतेर्धातोर्हस्यघः स्यात् जकारेङ्लिति च परे जगान कंसं किल वासुदेवः जघ्नतुः
जघ्नुः जघनिथ जघन्थ जघ्नथुः जघ्न जघान जघन जघ्निव जघ्निम जनेप्रादुर्भावे ईकारइ१
दित्कार्यार्थः कार्याणि आत्मनेपदप्रभृतीनि प्राग्वद्द्वित्वं पूर्वस्य हस्वादिशेषः उपधायालोपः स्तो
श्चुभिः श्चुरिति चुत्वेन ञः जज्ञे जगज्जनार्दनात् जज्ञाते जज्ञिरे जज्ञिषे जज्ञाथे जज्ञिध्वे जज्ञे ज१
ज्ञिवहे जज्ञिमहे खनखनने अकारउच्चारणार्थः कूपं चखान पूर्ववत् चख्नतुः चख्नुः चकन्थ
चनिथ चख्नथुः चख्नः चख्न चखान चखन चख्निव चख्निम घस्लृअदने लृकारलृत्कार्यार्थः
जघास ग्रासं चस्मरः उपधालोपे कृते खसेचपा जसानामिति कः । घसादेः षः । घसषा१
सिवसादीनां सस्य षः स्यात् जक्षतुः जक्षुः जघसिथ जघस्थ जक्षथुः जक्ष जघास जघस १
जक्षिम जक्षिव जक्षिम । आतोणपऔ । आकारान्ताद्धातोः णप औ स्यात् टेर्लोपः ददौ दानेन दाता
तापपोषेयं मृदा पुनः तस्थौ प्रीत तस्थौ प्रीतस्तत्र दारस्थाने धनं हित्वा वनं ययौ । आतोनपि । अपित्यमा
नोम्प्रत्ययोयस्यांवनप् तस्मिन्किति ङिति स्वरे परे आकारलोपः स्यात् ददतुः ददुः ददिथ ददाथ
ददथुः दद ददौ ददिव ददिम ण्यतिनिष्ठुरो आदेः स्नः स्नः निमित्ताभावे नैमित्तिकस्याप्यभाव इति
ददाथः द्वित्वं कृतः । समानपः । शासनपेखपाश्रवशिष्यंते नशासाः द्वित्वे कृते यत्सर्वं रूपं तस्य शा ३९

रेणपाविशिष्यति तशसा: अनेनमंत्रेणशेषसलोपनीयः यइतिस्थिते ऊसानांजवपाङ्इतियस्यतः
तस्थौ तस्थतुः तस्थुः तस्थिथ तस्थाथ तस्थथुः तस्थ तस्थौ तस्थिव तस्थिम याप्रापणे य
यौ ययतुः ययुरित्यादि ष्णाशौचे पूर्वस्यहसादिःशेषः सस्नौ सस्नतुः सस्नुरित्यादि। ष्टुञ् स्तुतौ।
तुष्टाव तुष्टुवतुः तुष्टुव तुष्टुम यजदेवतापूजासंगतिकरणदानेषु अकारस्वरितउभयपदार्थः य
जइतिस्थिते। णादौपूर्वस्य। णबादौपरे यजादीनांग्रहादीनांचपूर्वस्यसंप्रसारणंभवति यस्यइकारः
सइयाजजनादेनम्। यजादयवराणामूतस्संप्रसारणंकिति। यज वच् स्वप् वेञ् ह्वेञ् व्येञ् वह्।
वस् वद् श्वि एतेषांयकारवकाररेफाणांस्थानेइकारउकारऋकाराःस्युःकितिपरे तेचसंप्रसारण
संज्ञाभवति सवर्णस्यसंप्रसारणे दीर्घस्यचदीर्घः ईजतुः ईजुः इयष्ठ ईजथुः ईज इयाज
इयज ईजिव ईजिम ईजे ईजाते ईजिरे ईजिषे ईजाथे ईजिध्वे ईजे ईजिवहे ईजिमहे व
चपरिभाषणे उवाचऊचतुः ऊचुः उवचिथ उवक्थऊचथुः ऊच उवाच ऊचिव ऊचिम। ब्रूञ्
व्यक्तायांवाचि इत्यस्यपरोक्षेआत्मनेपदेवच् आदेशःस्यात् ऊचे ऊचाते ऊचिरे।
ऊचिषे ऊचाथे ऊचिध्वे ऊचे ऊचिवहे ऊचिमहे ञिष्वप्शयने ञिइत्संज्ञः सुष्वाप सुषुपतुः
सुषुपुः सुष्वपिथ सुष्वप्थ सुषुपथुः सुषुप सुषुपिव सुष्वाप सुष्वप वहप्रापणे
उवाह ऊहतुः ऊहुः उवहिथ ऊहिथ सहिवहोरोदवर्णस्य सहिवहोरवर्णस्यओकारोभवति

सा. ढकारेपरे उवोढ ढिढेर्लोपोदीर्घश्च ढकारस्यढकारेपरेलोपोभवति पूर्वस्यचदीर्घः ऊहः
उ. उवाह उवह उवहिव उवहिम वसनिवासे उवास ऊषतुः ऊषुरित्यादि । अणशाम् । अपादीः
५० नांपूर्वस्यनुगागमःस्यात् णकारेपरे अशूङ्.व्याशोङ्.काआत्मनेपदार्थः आभोर्णाराविस्यात्वम्
विपूर्वः व्यानशे विष्वं विश्वम्भरः व्यानशपातेव्यानशिरेइति अञ्जव्यक्तिम्लक्षणकान्तिगतिषु ऊ
कारइड्विकल्पार्थः आनंजताहिणोवज्रलेनकाचित् आनंज आनंजतुः आनंजुः आंजिथ आनंज
थुः आनंज आनंजिव आनंजिम एवं आनंजे आनंजाते आनंजिरेइति अचसञ्जायां अकारस्या
गणार्थः आनर्च आनर्चतुः अनर्चुः आनर्च अनर्चेति विजपृथग्भावे निर्पूर्वः । विजःसणकादेः
कित्वेवावक्तव्यम् । निष्विकायविंराजा निष्विकतुः निष्विकुः निष्विवभायिथ निष्विकेथ
निष्विकयथुः निष्विक निष्विकाय निष्विकिव निष्विकिम वायहणात्निष्विचाय विचाय
विच्यतुः विच्युः ग्रहउपादाने ग्रहोकितीतिसंप्रसारणंभवति जग्राह जगृहतुः जगृहुरिति जग्र
हिथ जग्रहथुरितिस्थिते होढइतिढत्वंतथोर्धइति धत्वं झषिः झषितिढत्वं ढिढलोपइतिढ
लोपः दीर्घश्चजग्राढ व्येञ्संवरणे संविव्यायस्यागुनमतः संविव्यतुः संविव्युः संविव्ययिथ ।
संविव्ययेथेति वेञ्तन्तुसंताने । वेञोवयोनापि वेञोवयादेशःस्यात् अनपिविषये उवायऊय
तुः ऊयुः उवयिथ उवय ऊयथुः ऊय उवाय उवय ऊयिव ऊयिम व्ययतादने अकारउकाराणा ५०

र्थः विव्याध विविधतुः विविधुः प्रछतीत्यस्याथां पप्रछ पप्रछतुः पप्रछुः पप्रछिथ पप्र-
ष्ठ । संयोगान्तस्य न किन्ते । संयोगान्तस्य णादेः किन्न भवति पटपोनः श्रुणयोर्लोट् मध्य
मपुरुषैकवचनान्तनानि पात्यते । पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्ग-
नाः विगृह्य चक्रे नमुचिद्विषा वशी य इत्थमस्वास्थ्यमहर्निशं दिवः ॥ आशिषि । यात् यास्ता-
म् यासुः याः यास्तम् यास्त यासम् यास्व यास्म सीष्ट सीयास्ताम् सीरन् सीष्ठाम् सी-
यास्थाम् सीध्वम् सीय सीवहि सीमहि आशिषि विधावादयः स्युः एधांलिङ् संज्ञा पाणिनीया
नाम् भूयात् भूयास्तां भूयासुः भूयाः भूयास्तं भूयासुः भूयाः भूयास्तं भूयास्त भूयासं भूयास्व
भूयास्म सश्रीमान्भूयात् जीवप्राणधारणे जीव्यात् जीव्यास्तां जीव्यासुः जीव्याः जीव्यास्तं
जीव्यास्त जीव्यासम् जीव्यास्व जीव्यास्म यावदायुस्तं जीव्याद्भवान् । दादेः । दादेर्धातोराका-
रस्यैत्वं स्यात् यादादौ परे देयात् पेयात् धेयात् डुकृञ्करणे । यादादौ । यादादौ परस्मैपदे परे
ऋकारस्य रिङादेशः स्यात् ङकारो व्यञ्जनार्थः क्रियात् क्रियास्तां क्रियासुः क्रियाः क्रियास्तं
क्रियास्त क्रियासं क्रियास्व क्रियास्म केषाञ्चिन्मङ्गलं क्रियाद्धरिरिति आत्मनेपदेपि । ऋः । ऋका-
रस्य सिस्योरनिटो गुणो न भवति अन्यस्य तु धातोर्भवति विघ्नमे मङ्गलं कृषीष्ट कृषीयास्तां कृषी-
रन् कृषीष्ठाः कृषीयास्तां कृषीरन् कृषीष्ठाः कृषीयास्तां कृषीढुम् कृषीय कृषीय कृषी-

सा.
उ.
४२

५१

वहि कृषीमहि चिञ् चयने चेषीष्ट चेषीयास्तां चेषीरन् अद भक्षणे अद्यात् अद्यास्तां अद्या-
सुः दिवुक्रीडायां दीव्यात् दीव्यास्तां दीव्यासुः उदव्यथने रुद्यात् रुद्यास्तां रुद्यासुः करोटने क-
घ्यात् कघ्यास्तां कघ्यासुः। ष्टुञ् स्तवने स्तोषीष्ट स्तोषीयास्तां स्तोषीरन् तनु विस्तारे तन्यात् तन्या-
स्तां तन्यासुः। अथ लुटि। ता तारौ तारः तासि तास्थः तास्थ तास्मि तास्वः तास्मः। ता तारौ
तारः तासे तासाथे ताध्वे ताहे तास्वहे तास्महे स्योभाविन्यर्थे तासयोर्भवति एषां तादीनां पाणिनी-
यानां लुट् संज्ञा। तिमता सोस्य पाणिइट्। धातोः परेषां सितता सोस्य पामिडागमो भवति भविता भवि-
तारौ भवितारः भवितासि भवितास्थः भवितास्थ भवितास्मि भवितास्मः स्योभविताराज्यभारः क्र-
मात्स्य। नैकस्वरादनुदात्तात्। एकस्वराद्धातोः धात्वपाठेनुदात्तात् इत्येवं परितादिडागमो न भवति।
पक्ता पक्तारौ पक्तारः पक्तासे पक्तासाथे पक्ताध्वे पक्ताहे पक्तास्वहे पक्तास्महे। अथ भेद-
निर्दिभागः। एकवर्णानां मध्ये अकारान्ताथेदन्ता ऋदन्ताश्च सर्वएव सेटाः उदन्ता ऋकन्नुकृन्तृणवः सेटः
ऋदन्ताः वृङ् वृञ् ओसेटौ श्वि श्री शीङ् डीङ् उः अय सेटोन्ये निटः द्विवर्णानां मध्ये निटः शकिरेकः कान्तः प्रच्छ-
तिश्चान्तः॥ पचि वचि विचि विचि सिचि रिचि मुच यश्चान्ताः फकिव त्यजि रञ्जि भुजि भंजि भाजि स्वजि सञ्जि त्य-
जि स्रजि यजि मस्जि मज्जि विजयो जान्ताः दहि दिहि मिहि सहि रिहि लिहि नहि वहयो हान्ताः शिषि-
श्लिष्क्रषि लिषि विषि शिषि दिषि त्विषि सृपिपिषि हृषयः षान्ताः त्विषि पुषि क्रुषि कांक्षि श्लिषि विदि षिषि ४२

शिषिपिषिशुष्पुषिविषिश्लिषितुषिदुषिद्विषयः षान्ताः अदिक्षुदिस्विदिखिदिभिदिस्कन्दिविदिस्विदिछिदिनुदिपदिशदि
खिदिस्कन्दयो दान्ताः राधिसाधिक्रुधिक्षुधिबंधियुधिशुधिसिधिक्रुधिव्यधिसाधयो धान्ताः वमतिच
स्तनी मान्तौ आपितपितिपित्वपिवपिशपिक्षिपिछुपितृपिलिपिलुपिसृपयः पान्ताः यमिरमिलभ
भयो भान्ताः यमिनमिरमिगमो यो मान्ताः हनिमन्यती नान्तौ हलिस्तृपनिभृज्ज्स्फुरादितो विकल्पेन ना
निहोरधातुस्यस्मेति मेडुनिहुभागः इपचेषपाके हाता हीता पाता तेनाचेताकर्त्ता हर्ते त्यादि। त्यादे
भविष्यति स्यप्रधातोः स्यप्रत्ययो भवति भविष्यति काले तिबादिषु त्रयोदशस्तुपरेषु भविष्यति।
भविष्यत भविष्यंति भविष्यसि भविष्यथः भविष्यथ भविष्यामि भविष्यावः भविष्यामः यज
स्यतिरितिस्थिते भ्रस्जभ्राजराजादेःष इति षत्वं। षढोः कः सि। धातोः षकारढकारयोः कत्वं स्यात्
सेपरे यक्ष्यति यक्ष्यतः यक्ष्यंति यक्ष्यसि यक्ष्यथः यक्ष्यथ यक्ष्यामि यक्ष्यावः यक्ष्यामः यक्ष्य
ते यक्ष्येते यक्ष्यंते यक्ष्यसे यक्ष्येथे यक्ष्यध्वे यक्ष्ये यक्ष्यावहे यक्ष्यामहे। हन्ट्न स्यपः। हंतेः ऋका
रांतात् स्यपरे इडागमः परस्मैपदे परे इट् न तु आत्मनेपदे गंस्यते गमेश्च परस्मैपदे परे इट् स्यात् हनिष्य
ति हनिष्यतः हनिष्यंति करिष्यति करिष्यतः करिष्यंति गमिष्यति गमिष्यतः गमिष्यंति। सस्येता
र्धपि। सकारस्य तकारः स्यात् अनपि विषये सकारे परे वस निवासे वत्स्यति वत्स्यतः वत्स्यंति दह
भस्मीकरणे धकारः आगमार्थः दादेर्धः इति धः अदिजभाभामिति दस्य धः एवसेचयाजमानानामि।

सा. उ. ४२

42

नियमकः क्लिकिलमाववत्सः धक्ष्यति धक्ष्यतः धक्ष्यंति दुहप्रपूरणे प्रागवत्प्रकारो ज्ञाधि । उपधा-
याल्लघो । धातोरुपधाया नामिनो लघोर्गुणः स्यात् धोक्ष्यति धोक्ष्यतः धोक्ष्यंति भिदिर् विदारणे इर्
नुबंधः भेत्स्यति छिदिर् द्वैधीकरणे छेत्स्यति तुद व्यथने तोत्स्यति पधहृङो पधिष्यते पीङ्
पायने सर्वत्र पीङो गुणः सिस्यतां सीस्यतामिद पायिष्यते हृद् दानदनयोः ओहाङ् त्यागे हास्यते
डुदाञ् दाने दास्यति युज् गतौ लोक्ष्यति लोक्ष्यतः लोक्ष्यंति लोक्ष्यते लोक्ष्येते लोक्ष्यंते ग्राघ्णो
घ्राणे पोत्स्यते पूज्य प्रसवे सोक्ष्यते भुज पालनाभ्यवहारयोः भोक्ष्यति भोक्ष्यते । स्यप् क्रियातिक्रमे ।
क्रियायामतिक्रमे अतिपत्तौ कारणात् निष्पत्तौ सत्यां दिबादिपरतः स्यप्प्रत्ययः स्यात् दिबादेश्च
पञ्चदशसंज्ञा च यदा सुवृष्टिः स्यात् राज्यं भविष्यत्तदा सुभिक्षमभविष्यत् अभविष्यतां अभविष्यन् ।
अलक्ष्यत भवान् युक्तेन सह यद्यासिष्यत अहनिष्यद्भवान् यद्यमत्स्यत् पाल्गुणौ अपत्स्यद्-
वान् यद्यग्निः प्राज्वलिष्यत् ज्वल दीप्तौ । भूते सिः । धातोः भूतमात्रे सिप्रत्ययः स्यात् दिवादेश्च
तः इकारः सिरिति विशेषणार्थः पंचसंज्ञा लङ्ङिति पाणिनीयानाम् दिबादावट् अभूत् ॑ तद्
ति स्थिते । दादेः पे । धापालोपदे परे इ धास्थादाङ् भूपिबतिभ्यः परस्य सेर्लोपः स्यात् सचलोपोल्
वाच्यस्ते न गुणो ह्रस्ववृद्धयो न स्युः अभूत् वृष्टिः अभूतां । भुवः सिलोपे कृते सरोड्डकृववकाव्यः । अभूव-
न् अभूः अभूतं अभूत अभूवं अभूव अभूम डुदाञ् दाने अदात् अदातां । स्पाविटः । सेकारान्ता । ४२

हिस्य परस्मैपदे नतस्य भवति आतोनपीत्यालोपः अगुः अगाः अगातम् अगात अगाम् अगाव अ
गाम डुधाञ् धारणपोषणयोः अधात् अधातां अधुः ष्ठा गतिनिवृत्तौ अस्थात् अस्थातां अस्थुः इ
णगतौ णकार उच्चारणार्थः । इणः सिलोपो गादेशो वक्तव्यः । अगात् अगातां अगुः । माङः । माङि
प्रयुज्यमाने अटो लोपः स्यात् माचटिष्ट पायोगेन ह्यतने आशीः प्रेरणार्थे ना वक्तव्या भूतेसिः सि
चतासीत्स्यपामिरीटृषद्वं एभिः युः चट चीष्ठायामात्मनेपदी माचटिषातां माचटिषत माच
टिष्ठाः माचटिषाथां माचटिढ्वम् । धिच सेर्लोपः । माचटिषि माचटिष्वहि माचटिष्महि अरेमा
गा मा स्म धुस्तम् मागांगर्विनमान्तिरम् मास्मयोगेपीष्यते एवं मास्मभूत् वर्तमानार्थतायामपि
स्मयोगे भूतार्थता वक्तव्या । आह स्म हारीतः यज्जनिस्म युधिष्ठिरः । सिणिन्त्ये । पेपरस्मैपदे परे
सिः णिद्भवति णित्वाद्वृद्धिः डुकृञ् करणे अकार्षीत् इतिस्थिते । सेः ह्रा । सिनाहान्तयोः ट्रिपुसि
पोः ईडागमः स्यात् अकार्षीत् स्माधीनं योगी अकार्ष्टां अकार्षुः अकार्षीरिति एवं पर्यहार्षीत्
इट ईटि । इट उत्तरस्य सो लोपः स्यात् ईटि परे वद व्यक्तायां वाचि अवादीत् अवादिष्टाम् अवादि
षुः व्रज गतौ अकार उच्चारणार्थः प्राव्राजीत् प्राव्राजिष्टां प्राव्राजिषुः । स्यान्तलणस्य सजावृ
हसादेर्वलेर्वृद्धिः । हसादय पकारान्ता ग्रह उपादाने अग्रहीत् षह मर्षणे असहीत् टुवम उद्गिर
णे अवमीत् षम उपशमे अशमीत् ठफशाहेउकार उच्चारणार्थः अरयीत् व्यय ह्रये अव्ययीत् ह

णहिंसायां अक्षणीत् श्वसप्राणने अश्वसीत् जागृनिद्राक्षये अजागरीत् हसेहसने अहसीत्
अघिरघिलघिगत्यर्थौ आघीत् अराघीत् अलाघीत् डुकृञ्करणे । लोपोझसाज्झसे । झसात्पर-
स्यसेर्लोपःस्यात् झसे अकृत अकृषातां अकृषत अकृथाः अकृषाथां अकृढ्वम् अकृषि अकृष्व
हि अकृष्महि दाञ्दाने दाधास्थानामित् दाधास्थानांधातूनामित्भवति आत्मनेपदेपरे अदित
अधित अस्थितइत्यादि । इङोवागीसे । इङ्अध्ययनेइत्यस्यसेपरेवागीआदेशःस्यात् अधिपूर्वः अध्य
गीष्ट अध्यगीषातां अध्यैष्ट अध्यैषातां अध्यैषतइतिवा ऊर्णाहे सिप्रत्ययादिवाग्रवतवृद्धिः ईट् अ
विष्ट ईङ्निश्चिते । इट ईटि । इटःपरस्यसेर्लोपःस्यात् ईटिपरे दीर्घः अवावीत् अवाविष्टां डुपचष्पाके
झसात् । झसाद्ध्रस्वस्यसेर्लोपःस्यात् झसेपरे अपक्त अपक्षातां अपक्षत अपक्थाः अपक्षाथां अप-
ग्ध्वम् अपक्षि अपक्ष्वहि अपक्ष्महि झसेतिकिं अपाक्षीत् अपाक्तां अपाक्षुरित्यादि णित्वाद्वृद्धिः प्रच्छ
ज्ञीप्सायाम् अप्राक्षीत् अप्राष्टां अप्राक्षुः झसादितिकिम् एधवृद्धौ ऐधिष्ट ऐधिषत शीङ्स्वप्ने
अशयिष्टेत्यादि रुधिर्आवरणे । इरितोवा । इरितोधातोर्वा अङ्प्रत्ययःस्यात् भूतादिबादौपरतः
ङकारोगुणप्रतिषेधार्थः सरपवादः अरुधत् अरुधतां अरुधं अरुधाव अरुधाम आत्मनेपदेपि
अरुधत अरुधेतां अरुधत अरुधथाः अरुधेथां अरुधध्वम् अरुधे अरुधावहि अरुधामहि । अ-
निटोनामिवतः । अनिटोधातोः नामिवतः परस्मैपदेसिप्रत्ययेपरउपधायावृद्धिःस्यात् अरौत्सीत् ४२

अशैज्ञम् अशैत्सुः अशास्मीः अशैद्धं अशैद्ध अशैत्सं अशैत्स्व अशैत्स्म छिदिर् अच्छिदत् पक्षे
अच्छैत्सीत् अच्छैत्सातं अच्छैत्सुः। दिवुक्रीडाविजिगीषाव्यवहारे अदेवीत् षिवुसेवायां असेवी
त् नोक्तमनित्यं क्वचित् दृशिर् प्रेक्षणे इरितो वान्यस्य दृशोऽङ्परे गुणो वक्तव्यः अदर्शत्। ततोऽ
ऽदृक्षाम्। दृशादीनां अङ्परे गुणो भवति अद्राक्षीत् अद्राष्टां अद्राक्षुः पञ्चस्पर्शादयः स्पृश
संस्पर्शने अस्पाक्षीत् स्पृश स्पर्शने परामर्शने म्रक्षु अडोषकारः छित्कार्यार्थः ऋकार ऋ
दित्कार्यार्थः परामृक्षीत्। सिचोवानिटोः। ऊपधायाः गुणो न भवति सिचो वानिटोः परयोः अभिदत्।
गुणो न भवति वृतु वर्त्तने ऋकार ऊदित्कार्यार्थः अवर्तिष्ट अवर्तिषातामिति गल्लगतो। णिश्रिघादेः
लृकारः इत् यस्य स लित् तस्मात् ङ आदेश अदृक्षत् दिवादौ परे सेऽपवादः ङकारो गुणप्रतिषे
धार्थः अगमत् अरुमत् अशुषत् अक्रुधत् वचभाषणे। ङे वचेरुमागमो वक्तव्यः। मकारः स्थानो
नियमार्थः अवोचत् अवोचतां अवोचन् ऊह प्रपूरणे अकार उभयपदार्थः। हपाशांतात्सकः। हका
रषकारान्तान्नाम्युपधात् अनिटः धातोः दिवादौ परे सक्प्रत्ययः स्यात् नत्रहंशो अधुक्षत् लिह
आस्वादने अलिक्षत् विशप्रवेशने शाषादुन्यादिनाषः षढोः कसे प्रत्ययः प्राविक्षत् हाषविलेखने
अकृक्षत् अकृक्षताम् अकृक्षन् श्लिषआलिंगने अश्लिक्षत् भयचकितेलाणनवेष्णाप्रभादित्याप्यते अ
श्लिषते। अथ भावकर्मणोरेताविभक्तयो निरूप्यन्ते। तत्रादौ विकर्मणि सिइति नियमादात्मनेपदानि प्रथमे

सा॰ उ॰ ५५ ते भूपइतिस्थिते अनुपूर्वः आङ्डुणीदाविन्यात्वम् कवः जघानाजबवचाइति बाभूवोभुक अनुबभू
वे हचिंदेवदत्तेन अनुबभूवाते अनुबभूविरे अनुबभूविषे अनुबभूवाथे अनुबभूविढ्वे अनुबभूवे
55 अनुबभूविवहे अनुबभूविमहे डुपचष्पाके पेचे पेचाते पेचिरे नेने मेने ददे ससृजे सविलास
या साश्रोचे ससृजे सेलेसेलेहर्षधत्तये जज्ञे जज्ञाते जज्ञिरे मम्ले। स्यसीतासुनोधातूनांहनग्रहदृशां
भावकर्मणोःसिससीसिस्यपामिट्वाणित्ववद्वाच्यः वाग्रहणात्सिस्वंत्सकाद्वाइष्टवर्तेव्यः सेटामेवाणिव
विकल्पो विधीयते निटां चेड्विकल्पेन विधानं स्यसिंतासेषा कृञ्प्रभृतीनामिड्वाच्यः आशिषि सी
ष्टादयः णित्वावृद्धिः ह्रस्वमनुभाविषीष्ट भवता अनुभाविषीयास्तां अनुभाविषीरन् अनुभा-
विषीष्ठा अनुभाविषीयास्थां अनुभाविषीढ्वम् अनुभाविषीय अनुभाविषीवहि अनुभाविषीम-
हि णित्वाभावे अनुभविषीष्टेति सीड् उक्षमे पायिषीष्ट देवदत्तेन पायिषीष्ट कारिषीष्ट कृषीष्ट
स्वस्तनी अनुभाविता अनुभाविताराविन्यादि णित्वाभावेनुभविताइत्यादि स्यापि अनुभाविष्यते
णित्वाभावेन्वभविष्यत इत्यादि। भूतेद्यतन्यप्रकर्तरि। धातोः तनिपरे कर्तृवर्जितेर्थे भावे कर्मणि च-
इण्प्रत्ययः स्यात् सर्वापवादः णकारो वृद्ध्यर्थः। लोपश्च। इणसंयोगे च तनो लोपो भवति चकारेणाभो
जीत्यादेरुगुणो भवति अन्वभावि भवता द्विवचनादौ सिप्रत्ययः अन्वभाविषातां अन्वभावि
षत अन्वभाविष्ठा अन्वभाविषाथां अन्वभाविढ्वम् अन्वभाविषि अन्वभाविष्वहि अन्वभाविष्म। ५५

पक्षे अलम्भावि अनुभाविषातामिति अकारि अकारिषातां अकारिषत अकारिष्ठाः अकारिषा-
थां अकारिढ्वं इत्यादि पक्षे अकारिषातां अकारिषत इड्भावे अकृषातां अकृषत अकृथाः इ-
त्यादि अकृत इति स्थिते निराङ्पूर्वः निराकारि निराकारिषातां अहारि अहारिषातां अपायि
अपासातां अपासत अभोजि अभोजिषातामिति धृङ् धारणे अधारि अधृषातां निस्पूर्वः निरधा-
रि निरधारिषातामित्यादि पद गतौ प्रत्यपादि प्रत्यपत्सातां प्रत्यपत्सत भण शब्दे अ-
भाणि अभणिषातां वच भाषणे अवाचि अवक्षातां । सेटस्त्वमोर्णित्वं वा वक्तव्यम् । ग्रह उपादाने
अग्राहि अग्राहिषातां । इटो ग्रहेर्मितिदीर्घः । ग्रहादीनामिट ईकारो भवति अग्राहि अग्रहीषातां अग्रही-
षत णीञ् प्रापणे निस्पूर्वः निरणायि निरणायिषातां । आतो युक् । अकारान्तानां धातोः युगाग-
मः स्यात् ञिति णिति च परे अदायि अदायिषातां ष्णा शौचे अस्नायि अस्नायिषातां डुधाञ् निस्पूर्वः
न्यधायि न्यधायिषातां पद गतौ । पदादेः । कर्तरि चिण् वा वक्तव्यः उदपादि उदपत्सातां उदपत्सत बु-
ध अवगमने अकार उच्चारणार्थः अबोधि अबोधिषातां पक्षे अभुत्सातां जनै प्रादुर्भावे अज-
नि अजनिषातां । जनिवध्योर्न वृद्धिः । अथ नामप्रत्ययान्तेभ्यः लिङादयो यथा अतिशायेहसाटेर्यङ्-
द्विश्च अतिशायेर्थे हसादेर्वा धातोर्यङ्प्रत्ययः स्यात् सति तस्मिन् धातोर्द्विर्वचनम् । यङि । यङि परे सर्व-
स्य नामिनो गुणो भवति जपानां जवचमाइनिवः बोभूय इति स्थिते । सधातु । यजादिप्रत्यया

सा.
उ.
८५
85

नः शब्दोधातुसंज्ञः स्यात् ततस्तिबादयः ङानुबंधत्वादात्मनेपदम् अस्कार्दीरिअदेरिति यकारलोपः
अतिशयेनभवतीति बोभूयते बोभूयेते विधौ बोभूयेत बोभूयातां बोभूयेरन् इति आशिषि ।
बोभूयातां बोभूयेतां बोभूयतामिति अनद्यतने अबोभूयत अबोभूयेतां अबोभूयंतेत्यादि भु
जपालनाभ्यवहारयोः अतिशयेनभुनक्तीति बोभुज्यते बोभुज्येते बोभुज्यंते भूषलंकारे अकार
उच्चारणार्थः बोभूष्यते मुहवैचित्र्ये मोमुह्यते जोक्षूयते वेविद्यते । आतोयङि सति । सर्वस्य कार
स्य आकारः स्यात् पापच्यते पठव्यक्तायांवाचि पापठ्यते । स्वरादेरटादीनां यङ् च वक्तव्यः । स्वरा
देः परः स्वरादेर्धातोः द्वितीयोवयवोद्विः स्यात् अटगतौ अतिशयेनाटतीति अटाट्यते असभुवि ।
अतिशयेनास्तीति अमास्यते अशभोजने अशाश्यते ऋगतौ गुणोनिसंयोगाद्योः अरार्यते गत्ल
गतौ । जमजपान्तवृ । जमांतस्य जपादीनांच पूर्वस्य नुमागमः स्यात् । यङि सति । जंगम्यते जमगः ।
भ्रमु चलने बंभ्रम्यते हनहिंसागत्योः जहन्यते । आदेशानादेशो निषिध्यते हंतेर्हिंसायांघ्नवक्त
व्यः जेघ्नीयते जपजल्पव्यक्तायांवाचि जंजप्यते जंजल्प्यते दहभस्मीकरणे दंदह्यते यदवि
परीतमैथुने यंयभ्यते दर्शादर्शने । नलोपः । धातोरुपधाभूतेनकारस्यलोपः स्यात् किति ङिति च
हसेपरे दंदश्यते भञ्जोआमर्दने भजपते चरगतिभक्षणयोः फलनिष्पत्तौ अस्यन्मजोरन्नीत्या
दि । चरफलोरुच्चास्य । चम्फलोर्यङि परे पूर्वस्य नुगागमोभवति धातोरकारस्योकारोभवति ॥ ८५

ह्योर्विहसरुनिदीर्घः अतिशायेनचरतीति चंचूर्यते पंफुल्यते त्वतीगात्रविक्षेपे ईकारईदि१
कार्यार्थः। रीश्टङ्पदस्य। ऋउपदस्यधातोः यङिसतिपूर्वस्यरीगागमः स्यात् नरीनृत्यतेननृतः
नृतवर्तने वरीवृत्यते वानीहृविन्नम्। परीनीक्। पदस्यस्वधंस वञ्चश्रंसकसपतपदस्कन्दां।
यङिसति पूर्वस्यनीगागमः स्यात् पद्गतौ पनीपद्यते स्रंसध्वंसभ्रंशः अधःपतनेन स्कन्दिर्गतिशो
षणयोः सनीस्रस्यते दनीध्वस्यते चनीस्कद्यते इत्यादि। ऋतोरिः। ऋकारान्तस्यधातोर्यादेशः
स्यात् यङिसति पश्चाद्द्विर्वचनम् क्रिक्रियतेइतिस्थिते पूर्वस्यहस्वादिशेषः अहोञ्चुः येदी
र्घइतिदीर्घः अतिशायेनकरोतिचेक्रीयते हञ्हरणे जेहीयते वृञ्वरणे वेवीयते गेशब्दे
संध्यक्षराणामा हादेरिः द्वित्वंयङिपूर्वस्यगुणोयेदीर्घः अहोञ्चुः जेगीयते मृङ्प्राणत्यागेमे
म्रीयते डुदाञ्दाने दादेरितीकारः देदीयते पेपीयते। अथयङ्लुगन्तप्रक्रिया। वान्यत्र लुगन्त
र्वर्तितेन्यत्र ङकप्रत्ययसंयोगं विनायतोलुग्वास्यात्। अनपिहसात्। हसात्परस्ययङोलुक्स्या
त् अनपिविषयेलुकिसति पितिपरेत्। स्मिवाईयागमोवक्तव्यः। निमिकिमुच्यतेनिपसिपमि
ष्वहत्वेनपि नोपधायागुणः हिरुक्तस्यधातोः हसेपरेनपिविषये उपधायागुणोनभवति अति
शायेनभनक्तीति बोभजीति बोभक्ति बोभक्तः बोभजति। यङ्लुगन्तेपरस्मैपदंकारिवइव्यंडु
डुपचंषपाके अतिशायेनपचतीति पापक्ति पापचीति पापक्तः पापचति पापचीषि पापक्षि

मा॰ ३ः ५९ पापक्थ पापचीमि पापच्मि पापच्वः पापच्मः विधौ पापच्यात् पापच्यातां पापच्युः पापच्याः
पापच्यातं पापच्यात पापच्यां पापच्याव पापच्याम आशिषि पापक्तु पापचीतु पापक्ताद्वा पा
पक्तां पापचतु पापग्धि पापक्ताद्वा पापक्तं पापक्त पापचानि पापचाव पापचाम अनद्यत
46 ने अपापचीत् अपापक् दिस्योर्हसात् अपापक्तां अपापचन् अपापचीः अपापक् अपापक्तं
अपापक्त अपापचं अपापच्व अपापच्म वद व्यक्तायां वाचि अतिशयेन वदतीति वावदीति वा
वत्ति वावत्तः वावदति वावदीषि वावत्सि वावत्थः वावदीमि वावद्मि वावद्वः वावद्मः वि
धि वावद्यात् वावद्यातां वावद्युः वावद्याः वावद्यातं वावद्यात वावद्यां वावद्याव वावा
द्याम आशिषि वावदीतु वावत्तु वावत्ताद्वा वावत्तां वावदतु वावद्धि वावत्तात् वावत्तं वा
वत्त वावदानि वावदाव वावदाम अनद्यतने अवावदीत् अवावत् अवावत्तां अवावदुः
अवावदीः अवावत् अवावत्तं अवावत्त अवावदं अवावद्व अवावद्म चट वेष्टायां अतिश
येन चटतीति संजाचटीति संजाचट्टि संजाचट्टः संजाचटति संजाचटीषि संजाचट्सि
संजाचट्ठः संजाचट्ठ संजाचटीमि संजाचट्मि संजाचट्वः संजाचट्मः संजाचट्यात्
संजाचट्यां संजाचट्याव संजाचट्याम आशिषि संजाचटीतु संजाचट्टु संजाचट्टाद्वा
संजाचट्टां संजाचटतु संजाचड्ढि संजाचट्टाद्वा संजाचट्टं संजाचट्ट संजाचटानि संजाच ५९

टामि संजागटाव संजागटाम अनद्यतने असंजागटीः असंजागट् असंजागट्टं असंजागट्टः असंजा
गटीः असंजागट् असंजागट्टं असंजागट्ट असंजागटं असंजागटव असंजागटम भूसत्तायां अ
नित्यायेनभवतिरिति सम्बोभोति सम्बोभवतीति सम्बोभूतः सम्बोभवति सम्बोभोषि सम्बोभवी
षि सम्बोभोति सम्बोभवीति सम्बोभूतः सम्बोभवति सम्बोभोषि सम्बोभवीषि सम्बोभूथः स
म्बोभूथ सम्बोभूमि सम्बोभवीमि सम्बोभूवः सम्बोभूमः विधौ सम्बोभूयात् सम्बोभूयातां स
म्बोभूयाः सम्बोभूयातां सम्बोभूयात सम्बोभूयां सम्बोभूयाव सम्बोभूयाम। आशिषि, सम्बो
भोतु सम्बोभवीतु सम्बोभूतात् सम्बोभूतां सम्बोभुवतु सम्बोभूहि सम्बोभूतात् सम्बोभू
तं सम्बोभूत सम्बोभवानि सम्बोभवाव सम्बोभवाम अनद्यतने असम्बोभूत् असम्बोभवी
त् असम्बोभूतां असम्बोभवुः असम्बोभोः असम्बोभवीः असम्बोभूतं असम्बोभूत असम्बोभवं
असम्बोभूव असम्बोभूम डुकृञ्करणे। ऋकारान्तानामृदुपधानां यङ्लुकि सति सर्वस्य रिग्रीगा
गमा भवंति चर्करीति चरिकरीति चरीकरीति चर्कर्ति चरिकर्ति चरीकर्ति चर्कृतः चरिकृतः
चरीकृतः चर्क्रति चरिक्रति चरीक्रति चर्करीषि चरिकरीषि चरीकरीषि चर्कर्षि चरिकर्षि च
रीकर्षि चर्कृथः चरिकृथः चरीकृथः चर्कृथ चरिकृथ चरीकृथ चर्करीमि चरिकरीमि चरीक
रीमि चर्कर्मि चरिकर्मि चरीकर्मि चर्कृवः चरिकृवः चरीकृवः चर्कृमः चरीकृमः चरिकृमः

मं॰ उ॰ ४७

47

विधि चर्कृयात् चरिकृयात् चरीकृयात् चर्कृयातां चरिकृयातां चरीकृयातां चर्कृयुः चरिकृयुः
चरीकृयुः चर्कृयाः चरिकृयाः चरीकृयाः चर्कृयातं चरिकृयातं चरीकृयातं चर्कृयात चरिकृयात चरीकृया
त चर्कृयां चरिकृयां चरीकृयां चर्कृयाव चरिकृयाव चरीकृयाव चर्कृयाम चरिकृयाम चरी।
कृयाम आशिषि चर्क्रीत् चरिकीत् चरीकीत् चर्कर्तु चरिकर्तु चरीकर्तु चर्कृताद्वा चरि।
कृतात् चरीकृतात् चर्कृतां चरिकृतां चरीकृतां चर्क्रतु चरिक्रतु चरीक्रतु चर्कृहि चरिकृहि
चरीकृहि चर्कृताद्वा चरिकृतात् चरीकृतात् चर्कृतं चरिकृतं चरीकृतं चर्कृत चरिकृत चरी
कृत चर्कराणि चरिकराणि चरीकराणि चर्कराव चरिकराव चरीकराव चर्कराम चरिकराम च
रीकराम् अनद्यतने अचर्करीत् अचरिकरीत् अचरीकरीत् अचर्कः अचरिकः अचरीकः अचर्कृतां अ
चरिकृतां अचरीकृतां अचर्करुः अचरिकरुः अचरीकरुः अचर्कः अचरिकः अचरीकः अचर्करीः।
अचरीकरीः अचर्कृतं अचरिकृतं अचरीकृतं अचर्कृत अचरिकृत अचरीकृत अचर्करं अचरिकरं
अचरीकरं अचर्कृव अचरीकृव अचरिकृव अचर्कृम अचरिकृम अचरीकृम वेञ् संवरणे वर्वर्त्ति
वरिवर्त्ति वरीवर्त्ति वर्वरीति वरिवरीति वरीवरीति वर्वृतः वरिवृतः वरीवृतः वर्व्रति वरिव्रति।
वरीव्रति इत्यादि एवं हृञ्भृञो हृञवर्जनेष्वेवं। कर्त्तर्यङ्। कर्तृरूपमानाद्याचारेऽर्थे यङ् प्रत्ययो भ
वति पाणिनायनेमतेः। यजि सलोपो वक्तव्यः। अप्सरायते अप्सरूपः एवं जायते ओजायते पङ्क्तः ओज ४७

५१

अश्वस्तोर्नित्यंपयसललिभाषया पयस्यते पयस्यतेतक्रं। आचारेउपमानात्। उपमानात्प्रत्ययो
भवति आचारेर्थे अकारस्यवईकारोभवति पुत्रीयतिशिष्यमुपाध्यायः पुत्रीयतः पुत्रीयंति प्रासा।
दीयति क्रमांस्तृङ्ः इच्छायामात्मनःसः। धातोरिच्छायामर्थेसप्रत्ययोभवति साचेत् समर्थविनी
द्विरुक्त॰ सप्रत्यययोगेधातोर्द्विवचनंभवति भूसत्तायां भवितुमिच्छतीतिबुभूषति बुभूषतः बुभूषंति
बुसे। ग्रहश्वत्रस्वपूनस्माउवर्णान्ताद्वर्णान्तात् ग्रहगुहोश्चसेपरेइडागमोनभवति सम्प्रसारणं। नाति
दि। सेइट्वर्जितेसप्रत्ययेपरेगुणोनभवति। सेदीर्घः। सेपरे सर्वस्यदीर्घोभवति चिञ्चये चिचीषति
चिनोतेःसनादेः। किर्त्वंगावन्तान्याम् चिकीषति जिजये जिगीषति कमिश्चाले चुचूषति शुश्रू
षेत् युयूषत् अकयूषतइत्यादि रुदानाहनयोः जुहूषति हयाहेरुहूषति। यस्मै। इस्य अभ्ययः
अकारः सर्वेइकारोभवति सेपरे। गुणाः प्रकृत्यर्थोन्यत्रसमात् प्रकृत्यर्थोगुणः सप्रत्ययादन्यत्र
भवति डुपचंषपाके काहेनापिपक्षति ग्रहउपादाने जिघृक्षति गृहसंवरणे जेघृक्षति प्रज्ञानी।
क्षायां पिपृक्षति हनहिंसागत्योः। हंतेस्तोणित। हंतेसकारोणिद्भवति। णिवाह्नोद्दिः जिघांसति
स्तनइट्। इकारस्यइड्भवति क्विनिपरे असार्वचिकोर्थविधिः डुकृञ्करणे चिकीर्षति हृञ्हरणे
परिजिहीर्षति तूलवेनसंतरणयोः तितीर्षति। यतः। यकारस्याकारस्यचलोपोभवति अनपिविष
ये यङ्गतकृश्रयत इतियकारस्यलोपः चिकीर्ष्यते देवदत्तेन डुपचंषपाके पापच्यते पापच्यिना।

सा॰ उ॰ ४८ डुदाञ् दाने। दूस्से। दादीनां धातूनां ह्रस्वस्य से परे इस् आदेशो भवति पूर्वस्य लोपः सलोऽनपीति सका-
रस्यउकारः दित्सति डुधाञ् धारणपोषणयोः धित्सति माङ् माने प्रमित्सति प्रमित्सते वा डुल-
भष्प्राप्तौ डुभट्टस्तक्कः। स्कोराद्योश्च। संयोगाद्योः सकारककारयोर्लोपो भवति लिप्सते रभ
रभसे रिप्सते पत्लृ पतने। पतेर्वेट्। पतो ह्यन्तो से परे इडागमो वा भवति पित्सति पिपतिषति
आप्लृ व्याप्तौ। आप्नोतेरीः। आप्नोतेर्धातोः से परे स्वरस्य ई भवति पूर्वस्य लोपः ईप्सति अश भोजने।
अशोरनायो वा। अश्नातेः धातोरिच्छायां वा अनाय प्रत्ययो भवति अशनायति अशिशिषति गुपू
रक्षापालनयोः। गुपधः। गुपादिभ्यः स्वार्थे स प्रत्ययो भवति डिच्च जुगुप्स कितरोगापनयने सं-
शये च चिकित्सति विचिकित्सति तिज निशाने क्षमायां च तितिक्षति मान विचारे मानादीनां
पूर्वस्य पे परे दीर्घो भवति मीमांसते बधान् बध निन्दायां बीभत्सते आदिजबानामिति भकारः
दान् शान् तेजने दीदांसते शीशांसते। आयः। गुपादिभ्यः आय प्रत्ययो भवति स्वार्थे उपधायाग
णः गोपायते धूप संतापे धूपायते पण व्यवहारे स्तुतौ च पणायते धूप संतापे धूपायते पण-
व्यवहारे स्तुतौ च पणायते स्तुतावेव अन्यत्र पणते पनच पनायते। कमेः। कमेः धातोर्णिप्रत्य-
यो भवति अनपि वा कमु कान्तौ कामयति। नाम्नोयईचास्य। नाम्न इच्छायामर्थे यप्र-
त्ययो भवति तस्मिन् परे अकारस्य ईकारः पुत्रमिच्छति पुत्रीयति धनमिच्छति धनीयति। काम्य ४८

मयीसृंतिशिष्याः। पुत्रकाम्यति। उदकस्योदनादेशोवक्तव्यः उदन्यति मैथुनेस्यप्रत्ययः वृषे।
णमैथुनमिति वृषस्यतिगौः। भोजनेच्छायांनामांतादस्यसौ दध्यस्यति दधिष्यति। करणेचयः
काण्ड्वादिभ्यः करणेर्थेयप्रत्ययोभवति येदीर्घः काण्डूंकरोति काण्डूयतिनावेन त्रिदिवकरणे ना।
म्नोञ्जिप्रत्ययोभवतिकरणेर्थेसचाडित् डित्वाट्टिलोपः अतउपधायाइतिवृद्धिप्राप्तौ। मितांह्रस्वः।
धातुपाठेमितइति घटितानांह्रस्वोभवति घटादयः पंचपंचाशन्मितस्तेषामुपधायाः अमितानांच
ह्रस्वोभवति अपकर्तीति गुणादेशो घटंकरोति घटयति महांतंकरोति महयति अटंकरोति अट
यति पृथ्वादेरः पृथ्वादेर्धातोऋकारस्यरोभवति ञितिपरेपृथ्वंकरोति प्रथयति दृढंकरोति द्रढ
यति पृथ्वंमृदुंदृढंचैवकृशंचभृशमेवच परिवृढंदृढंचैवषडेतान्नविधौस्मरेत्। धातोःप्रेरणे।
प्रयोजकव्यापारेर्थेञिप्रत्ययोभवति कुर्वंतंकारयतियः सप्रयोजकः पचंतंप्रेरयतिपाचयति
पठंतंप्रेरयति पाठयति पामसज्ञउविशेषा अत्रपूर्वः अत्रपामयति षड्विधप्रणागत्यवमादनेषु
सदेःशात्। सदेर्धातोः शादादेशोभवति ञोपरे उपधायावृद्धिः शातयति। वातोर्ग्रुपध्वका। ऋगतोर
त्यस्याधातोराकारांतस्यचञोपरेपुगागमोभवति अर्पयति डुदाञ्दाने दापयति ष्णागतिनिर्हृतौ
स्नापयति याप्रापणे यापयति। हतेर्घत्। हंतेर्धातोर्घदादेशोभवति इणवर्जिते ञिणितिचपरे।
इणवर्जितइत्यपिवोध्यं घदादेशोउपधायादीर्घः घातयति। इडागे। जौपुक्वक्तव्यः इड अध्या

सा॰
उ॰
४९
49

यते इति कावश्चपसर्गात्तो न व्यभिचारतः । इजाम् । इजादीनामकाराः स्मृत्यान्त्वगणाः अध्यापयति
जापयति क्रीलज्जायां क्रेपयति लट्विलयने विलापयति । पादेहक् । पादेर्गणात् पुगागमो भव
ति पायति प्रीतनूकरणे प्राययति । मीञ्धूञोर्नुक् । प्रीञ्धूञोर्नुगागमो भवति ञौ प्रीञ्त
र्पणे धूञ्कम्पने धूनयति । ज्ञानातेर्वाञौ ह्रस्वः । ज्ञानातेर्धातोर्ञौ परे वा ह्रस्वो भवति ज्ञाश्रवबो
धने ज्ञापयति ज्ञपयति । वेदृदीर्घला चत्वाद्वदष्टइमे । इपेर्धातोस्तस्मम्यपरे वा इड्भवति पवेर्त्वपरस्य
इत् तस्य चदीर्घो भवति चकौ वाड्डिकत्वालेपश्च इरिति ञिलोपः ज्ञीप्सति जिज्ञापयिषति । चुरा
देर्ञिः । चुरादेर्गणात्स्वार्थे ञिप्रत्ययो भवति चुरस्तेये चोरयति पालनरक्षणे पालयति चिती संज्ञा
ने चेतयति चितिस्मृत्यां इति ञौ नुमिति नुमागमः चिंतयति अर्चपूजायां अर्चयति अकारान्तबेध
त्वादात्मनेपदमपि चोरयते । ञेरङ्ह्रस्वः । ञ्यन्ताद्धातोर्भूतेर्थे अङ्प्रत्ययो भवति दिवादिपवतः सेव
पवादः सतितस्मिन् धातोर्द्विवचनं ङकारो गुणप्रतिषेधार्थः ॥ ञेः । किति ङिति च परे ञेर्लोपो
भवति । लघोर्दीर्घः । लघोर्धातोरङि सति पूर्वस्य दीर्घो भवति अचूचुरत् अचूचुरतां अचूचुरन्
अचूचुरः अचूचुरतं अचूचुरत अचूचुरं अचूचुराव अचूचुराम अचीचितत् डुकृञ्करणे अड्डहत्
इत्यादि । अङि लघोर्न्हस्व उपधायाः । अङि सति पूर्वसम्बन्धिनो ऽकारस्य इकारो भवति लघो परे उप
धाया ह्रस्वस्यैवापवादः डुपचष्पाके अपीपचत् पठव्यक्तायां वाचि अपीपठत् पालरक्षणे अपीपल ४९

ते पराणतो अतिपूर्वः अत्यपीपटत् घट चेष्टायां अजीघटत्। नश्वसः। ऋकारवतो धातोरङ्उ
त्वं कार्यं न भवति टौकृधौकृगतौ अडुटौकत् अडुढौकत् डुयाचृ याच्ञायां अययाचत् बहुग्रामे
णो वहेः ककारः किर्कार्यार्थः यज्ञायवराणामिति वकारस्योकारः होछयति छाते नत्योर्धू
निरकारस्य धकारः छुभिछुरिति धस्य छत्वं छिछलोपो दीर्घश्चेति छकारस्य लोपः सधातविति
धातत्वामिवादयः जेरङ्·द्विश्च स्वरादेः परस्तिछस्याद्वित्वं जेरीतितिलोपः। अङ्·। पूर्वस्यछ
स्यजः अड्डेः इति ऋकारस्योकारलोपः द्विगादावट् उगे स्वरादेरितिद्वितीयेडागमः गोअगो गोज
उत् इतिसिद्धं णागतिनिवृत्तौ हादेरीति ईकारेकृते पश्चाद्द्विर्वचनं प्रत्यतिह्वियत् पापाने अपी
पत् कृपस्सामर्थ्ये। कृपेरोलः। कृपेर्धातोरकारस्यलोभवति ऋकारस्य लकारः वल्पयति इ
त्यत्राविरभावः भूतार्थेऽत्यचीकल्पपत् अचीक्लृपपतां अचीक्लृपपन् इत्यादि अथादेशाविधीनि
रूप्यन्ते। हपूणादेः पच्चादिः। हपादेः धातोः पच्चादिरादेशोभवति अथादौ विषये हशिकृपेः घ्राणा
पश्यति अविकरणस्यादिवादयोगयोर्ज्यते भवतिवद्रूपनेयं पापानेहृत्यस्य पिबादेशः पिबति घ्रा
गंधोपादाने अस्यजिघ्रादेशः सधमतिलोहमयस्कारः ष्णागतिनिवृत्तौ अस्यतिष्ठादेशः तिष्ठति
दाणदाणे अस्ययच्छादेशः प्रयच्छति ह्नाभ्यासे अस्यमनादेशः मनतिग्रन्थं ऋगतौ अस्यऋच्छादे
शः ऋच्छति सृगतौ अस्यधावादेशः शाहृप्णातेन अस्यशीयादेशः शीयतेवस्त्रविशरणगत्यवसा

सा॰
उ॰
५०
50

दतेश्च अस्य षीदादेशः सीदति गमां छः गमादीनां छकारो भवति अबादौ विषये गच्छति गतौ
गच्छति यमनियमेन नियूर्वः नियच्छति इषु इच्छायां इच्छति। ज्ञाजनोर्जा। जनी प्रादुर्भावे ज्ञा
अवबोधने अनयोर्जादेशो भवति अबादौ विषये दिवादेर्यः जायते नाश्यादेः जानाति आत्म
नेपदेपि ईहसे जानीते। श्रुश्रवणे द्रुत्यस्य श्रादेशः। स्वादेर्नुः शृणोति शृणुते। स्वादेक्नः
पूञ् पवने इत्यादेर्धातोर्विकरणे ह्रस्वो भवति पुनाति धूञ् कंपने धुनोति स्वादित्वान्नुः लूञ्
छेदने लुनाति ज्ञावयोर्ह्रानोर्जिनाति। निविशादेः। निविशादेर्धातोरात्मनेपदं भवति विश प्रवे
शने निपूर्वः निविशते। विपराभ्यां जेः। विजयते पराजयते। प्रत्यवतिष्ठते संपदाने संगच्छते संह
च्छते संशृणुते संविन्ते संयच्छते आलभते। आङो दोनास्यविहरणे। अंङः वाहादेर्नंगव प्रसारण
व्यतिरिक्तेर्थे आत्मनेपदं भवति आददे मुखं व्यसारणे तु व्याददाति मुखं ॥ क्रीडोनुसंपरिभ्यश्च ॥
अनुक्रीडते संक्रीडते परिक्रीडते समवप्रोपविभ्यः स्थः। संतिष्ठते अवतिष्ठते उपतिष्ठते प्रति
ष्ठते वितिष्ठते। उद्विभ्यां तपः। उत्तपते वितपते। आङो यमहनः। आयच्छते आघ्नाते आहते
उपपूर्वान्निष्ठतेर्मंत्रकरणे। आत्मनेपदं भवति ग्रामामन्त्यार्कमुपतिष्ठते अन्यत्र गङ्गामुपतिष्ठति शि-
ष्यः। उदश्चरस्त्यागे। उत्पूर्वाश्चरतेरात्मनेपदं भवति त्यागेर्थे मलमुच्चरते अन्यत्र मंत्रमुच्चरति। स
मस्तृतीयायुक्तात्। तृतीयांतपदयुक्तात्संपूर्वाच्चरतेर्धातोरात्मनेपदं भवति अश्वेन संचरते अन्य ५०

नसंचरति देवदत्तः। व्यवपरिभ्यः क्रियः। विक्रीणीते अवक्रीणीते परिक्रीणीते। शपउपालंभे।
शपेः शपथकरणेऽर्थे आत्मनेपदं विकल्पेन शपते शपथं करोतीत्यर्थः अन्यत्र शत्रुं शपति॥ ज्ञाश्रुस्मृ
दृशां सन्नन्तानामेतेषां सं प्रत्ययान्तानामात्मनेपदं भवति। जिज्ञासते शुश्रूषते स्मृदृशाध्याने। यो
हृत्। पवर्गादृत्तस्य उकारस्योर्भवति किति परे सुस्मूर्षते। आनस्यैर्वोज्ञानोनेः। सनन्ताच्च श्रु
जिज्ञासति पुत्रं। हृहरते कर्मव्यतिहारेन्यसंहारात्। विवदन्ते वादिनः हिंसायेत व्यतिघ्नन्ति व्यति
गच्छन्ति व्यतिपतन्ति। अन्योन्येतरेतरपरस्परयोगेस्यात्मनेपदं भवति अन्योन्यं व्यतिलुण्टेते इतरेतरं।
विवदन्ते परस्परं हसन्ते अत्राव्यतिभवति क्रमः सोमसर्गस्यादौ वेत्ता उपसर्गसहितस्य क्रमपादवि
क्षेपहत्यस्य धातोः परस्मैपदे दीर्घता भवति अविषये संक्रामति उपक्रामति। व्याङ्परिभ्यः।
रमः विआङ्परिउपपूर्वेभ्यः परस्य रमेः क्रीडायामित्यस्य धातोः परस्मैपदं भवति विरमति आरमति
परिरमति उपरमति आत्मनोपदेनोपिपरस्मैपदं ज्ञातव्यम्। वृद्भ्यः स्यसनोर्वा। वृद्वर्तते वृधृवृद्धौ
शृधुकुत्सायां स्यन्दूप्रस्रवणे कृपूसामर्थ्ये उतेभ्यः परयोः स्यसनयोर्योगे परस्मैपदमित्त्वं च वा भवति
वर्तिष्यते वर्त्स्यति विवर्धिष्यते विवर्त्स्यति शर्धिष्यते शर्त्स्यति स्यन्दिष्यते स्यन्त्स्यति कल्पिष्यते
कल्प्स्यति सम्प्रत्यये विवर्तिषते विवर्तिषते विवृत्सति विवर्धिषते विवृत्सति इत्यादिज्ञेयं मु
चादेर्मुम्। मुचादेर्धातोर्मुमागमो भवति अवादौ विषये मकारः स्थाननियमार्थः मुच्लृमोचने।

सा॰ धु॰ ५१

51

मुंचति विह्लुलाभे विन्दति लृहिव्यथने लुन्दति सिविसेचने सिञ्चति कृतीछेदने कृन्तति पि
पेषणे पिंषति भिदिर्विदारणे भिन्दति। पतेमुचादयः। इदितो नुम्। इदितो धातोर्नुमागमो भव
ति अनादौविषये टुणदिसमृद्धौ इकारइत्कार्यार्थः आदेःसणः णुदित्वात् नन्दति वदि अभि
वादनस्तुत्योः वन्दति शकिशङ्कायाम् शङ्कते। शमादीर्घः। शमादीनां दीर्घो भवति अनादौवि
षये इयेश्यानन्तरे सदीर्घो भवति शमदमउपशमे दिवादेर्यः शाम्यति दाम्यति श्रमुवैचित्ये श्रा
म्यति तमुग्लानौ ताम्यति क्लमुग्लानौ क्लाम्यतिइत्यवैकल्पेच चकाराच्छिन्नविरागेवा दोषय॰
ति दूषयतिवा मदीहर्षे माद्यति क्षमूषसहने क्षाम्यति भ्रमनमासिवेरेव भ्रामति भ्राम्येत।
भ्राम्यतु अभ्राम्यत इत्यादि। योः। यकारे परे धातोरोकारस्यलोपो भवति दोअवखण्डने द्यति शोत॰
नूकरणे श्यति षोअन्तकर्मणि आदेःसः स्यः स्यति पृपालनपूरणयोः पोरुः पूर्यति सम्प्रत्ययःस्तृ॰
प्रीणन्याये प्रस्तृणोति सपोर्त्तादौ परस्मैपदं ममार अन्यत्रम्रियते। रुदादेस्सद्धणींजसादेः। चतु॰
र्णामिति वादिगणानामधेयहकारवसादेस्सप्रत्ययस्येड्भवति रुदादेःपरस्मादादित्वादपोलत्त।
रुदिर् अश्रुविमोचने लघूपधत्वाद्गुणः रोदिति रुदितः रुदन्ति रोदिषि रुदिथः रुदिथ। रो
दिमि रुदिवः रुदिमः विधौ रुद्यात् आमिषि रोदितु हकारादेश्चगत्यपि रुदिहि अरुञ्यतने। रुदा
देर्दिस्योरडीटौ। रुदादेर्दिस्योरडीडितो नागमो भवतः अरोदत् अरोदीत् अरुदितां अरुदन्॥ ५१

अरोदः अरोदीः अरुदितं अरुदित अरोदं अरुदिव अरुदिम। रोदितिः स्वपितिश्चैव श्वसितिः प्रा
णितिस्तथा जक्षितिश्चैव विज्ञेयो रुदादिः पञ्चको गणः। श्वस प्राणने श्वसिति प्राणचेष्टायां प्रा
णिति ञिष्वप् शये स्वपिति जक्ष भक्षहसनयोः जक्षिति जक्षितः जक्षति। जक्षादेरन्तो दन्
अत्। जक्षादेर्धातोरन्तस्य स्यात् अन्तस्य अत् भवति चकासृ दीप्तौ चकास्ति चकास्तः च
कासति इत्यादि जागृ निद्राक्षये जागर्ति जागृतः जाग्रति दरिद्रा दुर्गतौ। दरिद्रातेरियालोपश्च।
दरिद्रातेर्धातोः स्वरस्य इकारादेशो भवति ङितिहसे परे आकारस्य च लोपो भवति ङिति स्वरे परे द
रिद्राति दरिद्रितः दरिद्रति दरिद्रासि दरिद्रिथः दरिद्रिथ दरिद्रामि दरिद्रिवः दरिद्रिमः द
रिद्रियात् दरिद्रातु अचङित्वाभावात् इकारः दरिद्रितात् दरिद्रितां दरिद्रतु अदरिद्रात् अद
रिद्रितां अदरिद्रुः शासु अनुशिष्टौ। शास्तेरिः। शास्तेरुपधायाः आकारस्य इकारो भवति किति हसे
परे। वसादेः षः। वसिशासिवसादीनां सकारस्य षकारादेशो भवति ङितिहसे परे शास्ति शिष्टः
शासति शास्सि शिष्ठः शिष्ठ शास्मि शिष्वः शिष्मः विधौ शिष्यात् शिष्यातां शिष्युः शि
ष्याः शिष्यातं शिष्यात शिष्यां शिष्याव शिष्याम आशिषि च शास्तु शिष्टात् शिष्टां शासतु
जहोधिः शाधि हंतेर्जहि शाधि शास्तेः शाधि आदेशो निपात्यते शाधि शिष्टात् शिष्टं शिष्ट शास
नि शासाव शासाम अनद्यतने अशात् अशिष्टां अशासुः अशाः। शिपि सस्य नः सि पि वा।

अघसात् अघसिहि अघसाव अघसं अघसिव अघसाम ईड स्तुतौ । ईडीशोः से ध्वे इट्स्वाभ्यः । ईडि
ईड्ते ईडाते ईडते ईडिषे ईडाथे ईडिध्वे ईडे ईड्वहे ईड्महे ईश ऐश्वर्ये ईष्टे ईशाते ईशते ईशिषे ईशाथे
ईशिध्वे ईशे ईश्वहे ईश्महे ईश्महे इत्यादि यु मिश्रणे । उतौ । उकारस्यौकारादेशो भवति पिति नका
देसकारे मकारे च परे च परे स्वव्यञ्जने विषये तुरुस्तुभ्यः ईर्वा पिति तिस्वाविषये यौति युवीति यु
तः युवंति रु शब्दे रौति रवीति रुतः रुवंति णु स्तुतौ नौति नवीति नुतः नुवंति ष्टुञ् स्तुतौ स्तौति
स्तवीति स्तुतः स्तुवंति स्तौषि स्तवीषि स्तुथः स्तुथ स्तौमि स्तवीमि स्तुवः स्तुमः इत्यादि हन हिं
सागत्योः । लोपस्त्वनुदात्ततनाम् । अनुदात्तानां तनादीनां च झसे तलोपो भवति किति ङसे परे उपा
त्यहविरजासेपिक्वबादौ अपोल्लक् हंति हतः गमहनजनखनघसां लोप इत्यकारलोपः हनो घ्न इति घकारः
घ्नंति हंसि हथः हथ हंमि हन्वः हन्मः इत्यादि हिसि हिंसायां । रुधादेश्च मनसः । नमप्रत्ययांतस्य
नकारस्य लोपो भवति हिनस्ति हिंस्तः हिंसंति सस्लोनपीति सकारस्य दकारः हिनस्ति हिंस्थः
हिंस्थ हिनस्मि हिंस्वः हिंस्मः इत्यादि भञ्जो आमर्दने चोः कुरिति जकारस्य गकारः एवं ते चपाज
मानाभिति ककारः भनक्ति नमसोऽस्य इति नमइत्येतेतस्य नकारस्याकारलोपः पश्चाद्व्या
परांते जसेड इत्यनुस्वाराभंक्तः भंजति इत्यादि । अपिरंजदंशसंजाम् । रञ्ज रागे दंश दशने ष
ञ्ज संगे षञ्ज परिष्वंगे इत्येतेषां नकारस्य लोपो भवति अपि विषये रजति दशति सजति सजति ५२

विदो नवानां णलादिर्वा । विद् ज्ञानेऽस्मात् तिबादीनां नवानां णलादिर्नवको वा भवति णलाद्य
विद् ज्ञाने वेद विदतुः विदुः वेत्थ विदथुः विद वेद विद्व विद्म आदादित्वाच्छपो लुक् वेत्ति
वित्तः विदन्ति वेत्सि वित्थः वित्थ वेद्मि विद्वः विद्मः । विदो नेर्वा रुट् । व्यातिसमुपसर्गपूर्व
स्य विदेर्धातोरंत इत्येतस्य रुडागमो भवति वा शाहाद्यात्मनेपदस्यैव संविद्रते संविदाते संविद्रते
संविदते विद्यात् विद्यातां विद्युः विद्याः विद्यातं विद्यात विद्यां विद्याव विद्याम वेत्तु वित्ता
द् वित्तां विदन्तु विद्धि विद्यात् वित्तं वित्त वेदानि वेदाव वेदाम हिंसोर्ह सात् अवेत् अवे
द् अवित्तां अविदुः अवेः अवित् अविद अविद्म इत्यादि असभुवि अपो लुक् अस्ति नमसो नित्यलोपश्च
स्तः सन्ति । श्नसोरल्लोपः । अस्तेः सकारस्य लोपो भवति सेपरे असि स्थः स्थ अस्मि स्वः स्मः विधि संप्र
भावनयोः स्यात् स्यातां स्युः स्याः स्यातं स्यात स्यां स्याव स्याम आशिषि अस्तु स्तात् स्तां सन्तु
जझेधि ह्याधिः हूतेजहिशाहो होरेधि शाहूः शाधि अस्तेः पूर्वशाहो निपात्यते हिविषये पंथस्तं स्त अ
सानि असाव असाम । अस्तेरीट् । अस्तेः परयोर्दिस्योरीडागमो भवति आसीत् आस्तां आसन् आ
सीः आस्तं आस्त आसं आस्व आस्म लिह आस्वादने हो ढः तथोर्धः ष्टुभिष्टुः उपधायालोपो
ऽणः ढिढोलोपोदीर्घश्च लेढि लीढः लिहन्ति लेक्षि लीढः लीढ लेह्मि लिह्वः लिह्मः
लिह्यात् लिह्यातां लिह्युः लिह्याः लिह्यातं लिह्यात लिह्यां लिह्याव लिह्याम लेढु लीढां

सा॰
उ॰
५२

ढा लीढं लिहेत । लिलाहेर्हौ ढ्टुः । लिहादेर्धातोर्हौ परे ढुर्भवति लिहिलि ढत्विटनयस्तता
अयणीयेतिपरांतन्नमाश्रित्य जस्मादिर्हे ष्टु ढि ढो लोपो दीर्घश्च लीढि लीढाद्धा लीढं ली
ढु लेहानि लेहाव लेहाम अत्तद्यतने हिकारादावट् गुणः हिस्याहेसान्न वावसाने इति डत्वे कृ
ते अलेट् अलेट् अलीढां अलिहन् अलेट् अलेट् अलीढं अलीढ अलेहं अलिह्व अलिह्म
स्कोरादयोश्च । संयोगाद्योः सकारककारयोर्लोपो भवति धातोर्झसेपरे नाम्नश्च अन्ते पदान्ते च
अन्त्यस्य सो जः । अन्त्यत्रेति संयोगादेः सकारस्य जकारो भवति तत्रोदाहरणम् उलस्जी ब्रीडा
यां लज्जते भ्रस्जपाके संप्रसारणं भृज्जति मस्जी मज्जने मज्जति चक्षिङ् व्याप्तौ चष्टे इति ।
स्थिते स्कोरिति कलोपः ष्टुभिष्टुरिति तकारस्य टकारः व्याङ्पूर्वः आचष्टे आचक्षाते आचक्ष
ते अतेत्स्य स्यात् घटोधः सेआचक्षे आचक्षाथे ष्टुभिष्टुरिति धकारस्य ढकारः स्कोरिति क।
कारलोपः षोडइति षकारस्य डकारः आचड्ढे आचक्षे आचक्ष्वहे आचक्ष्महे आचष्टीन आ।
क्षीः आचक्षां आचक्षातां आचक्षतां अनद्यतने अआचष्ट अआचक्षातां अआचक्षत इत्या
दि चकासृ दीप्तौ चकास्ति चकास्तः सकासति विधौ चकास्यात् चकास्यातां चकास्युः आ
शिषि चकास्तु चकास्ताद्धा चकास्तां सकासतु । दिपि सस्य तः । सिपि वा दिपि परे सकारस्य ५२
स्य तकारो भवति सिपि परे सकारस्य वा तकारो भवति अचकात् अचकास्तां अचकासु।

अचकासं अचकास्त अचकास्म व्याप्रकथने आप्लृ आप्नोति आप्नोयात् आप्नोतु आप्नो-
तुहा आप्नोतु आप्नोतां स्यादिरूपस्तुल्यम् आप्नोति मस्जॄ शुद्धौ । मस्जेर्वृद्धिः पिनित्व । मस्जेर्धातोः
पितिपरे वृद्धिर्भवति लघूपाधरात्वादेश्च माज्जि मज्जतः मज्जन्ति माज्जि मज्जः मज्ज माज्मि मज्ज्वः
मज्ज्मः विधौ मज्ज्यात् माज्जु मज्जाहा मज्जां मज्जत हिस्योर्हसात् घोट्टः वावसाने अमार्ट् अ-
मार्ड् अमज्जां अमज्जन् णिजिर् शौचपोषणभावयोः इवन्नबन्धा जुहोत्यादिस्त्याद्विवे । निजांत्रयाणां
निजादीनां त्रयाणां पूर्वस्य गुणो भवति लघिकति णिजेरूपधायागुणः पितिस्वरेनिष्पत्ने अवादौवि-
षये आरेलः स्वहः आदिरुमाटपो लङ्कु चोः कुः ख्विशेषचणा रासानानिर्मूर्वः नमादिश्चात्परेस्य तथा
तोऽस्मिनमामितिणत्वं निर्णेनेक्ति निर्णेनिक्तः निर्णेनिजति ख्विशेषचणा क्लिलात्वसः कृत्तस्यनि-
र्णेनेक्षि निर्णेनिक्थः निर्णेनिक्थ निर्णेनेज्मि निर्णेनिज्वः निर्णेनिज्मः विधौ निर्णेनिज्या-
त् निर्णेनेक्तु निर्णेनिक्ताहा निर्णेनिक्तां निर्णेनिजतु निर्णेनिग्धि निर्णेनिक्तात्ता निर्णेनि-
क्तं निर्णेनिक्त निर्णेनिजानि निर्णेनिजाव निर्णेनिजाम अनद्यतने वावसाने निरणेनेक्-
निरणेनेग् निरणेनिक्तां निरणेनिजुः आत्मनेपदेऽपि अवपूर्वः अवनेनिक्ते अवनेनिजाते वि-
धौ अवनेनिजीत अवनेनिजीतां अवनेनिक्ष्व अवनेनिजायां अवनेनिग्ध्वं अवनेनिजै अवनेनिजाव-
है अवनेनिजामहै अनद्यतने अवानेनिक्त अवानेनिजातां अवानेनिजत अवानेनिक्थाः अवाने-

सा॰ उ॰ ५२

निजायां अवानेनिग्धां अवानेनिजि अवानेनिज्वहि अवानेनिज्महि विजिर् पृथग्भा
वे निजांगणः वेवेक्ति वेविक्तः वेविजति वेवेक्षि वेविक्थः वेविक्थ वेवेज्मि वेविज्वः वेविज्मः
विधौ वेविज्यात् वेविज्यातां वेविज्युः वेविज्याः वेविज्यातं वेविज्यात वेविज्यां वेविज्याव वेवि॰
ज्याम आशिषि वेवेक्त वेविक्ताद् वेविक्तां वेविजतु वेविग्धि वेविक्ताद् वेविक्तं वेविक्त वेविजा
नि वेविजाव वेविजाम अनद्यतने अवेवेक् अवेवेग् अवेविक्तां अवेविजुः अवेवेक् अवेवेग् अवे
विक्तं अवेविक्त अवेविजं अवेविज्व अवेविज्म विष्लृ व्याप्तौ वेवेष्टि वेविष्टः वेविषति
वेवेक्षि वेविष्ठः वेविष्ठ वेवेष्मि वेविष्वः वेविष्मः विधौ वेविष्यात् वेविष्यातां वेविष्युः वेविष्याः
वेविष्यातं वेविष्यात वेविष्यां वेविष्याव वेविष्याम आशिषि वेवेष्टु वेविष्टाद् वेविष्टां वेवि॰
षतु वेविड्ढि वेविष्टं वेविष्ट वेविषाणि वेविषाव वेविषाम अनद्यतने अवेवेट् अवेविष्टां अ॰
वेविषुः अवेवेट् अवेविष्टं अवेविष्ट अवेविषं अवेविष्व अवेविष्म आत्मनेपदेपि वेविष्टे वेवि॰
षाते वेविषते विधौ वेविषीत वेविषीयातां वेविषीरन् आशिषि वेविष्टां वेविषातां वेविषतां अ
नद्यतने अवेविष्ट अवेविषातां अवेविषत पृ पालनपूरणयोः ऋारे हिंस्र । ऋतोरिः सर्वस्य । ऋतो॰
र्धात्वोः सर्वस्य ऋकारस्य इकारो भवति गुणः आङ्पूर्वः राधपो हिः आपिपर्ति आपिपृतः आपि
प्रति आपिपृयात् आपिपृयातां आपिपृयुः आपिपर्तु आपिपृतात् आपिपृतां आपिप्रतु अन ५२

ष्यतने व्यापिपः व्यापिप्सतां व्यापिपद्धः व्यापिपः व्यापिपत्वः व्यापिप्सतं व्यापिप्सत व्यापिपं व्या
पिप्सव व्यापिप्सम इगन्तो ग्रस्यधातोन्त्यस्योरिमुर्वैस्येतीकारे कृतेपश्चाद् स्ववर्णो स्वरेपरे सर्वस्य यादेशोभव
ति गणश्च ईप्सति ईप्सतः ईप्सन्ति ईप्ससि ईप्सथः ईप्सथ ईप्सामि ईप्सावः ईप्सामः विधौ ईप्सेयात् ईप्सेया
तां ईप्सेयुः ईप्सेत् ईप्सेताम् ईप्सेतां ईप्सेत ईप्सेहि ईप्सेताम् ईप्सतं ईप्सत ईप्सानि ईप्साव ईप्साम अत्र
यतने स्वरादित्वात् वृद्धिर्तीयोदागमः पैप्सः पैप्सतां पैप्सन् दुंभवजेयिङ्गेनिवसनाङ्गसिगणः पैप्सः पैप्सतं पै
प्सत पैप्सं पैप्सव पैप्सम इगन्तो अस्यादिङ्गादयोल्वक् पति रतः यंति पाभि ईप्सः ईप्स पामि रवः रुमः
ईप्सात् पत ईप्साद्वा ईप्सतो यन्त्र । अस्हो । ईप्सतेर्धातोर्हे परे अरूरुत्स्वादेशो भवति अरुप पहि ईप्सात्वा ईप्सते ईप्सत
अप्याणि अप्याव अप्याम अङ्गरुयतने पैप्सन् पैप्सतां आप्सन् पैः पत पैप्सत आपं पैव पैम भावकर्मणोश्च कर्मणि
यक् आत्मनेपदं यैसीर्बः ईप्स्यते ईप्स्येते ईप्स्यन्ते ईप्स्यसे ईप्स्येथे ईप्स्यध्वे ईप्स्ये ईप्स्यावहे विधौ ईप्स्येत आशिषि ईप्स्य
तां ईप्स्येतां ईप्स्यत ईप्स्येयां ईप्स्येध्वं ईप्स्ये ईप्स्यावहै ईप्स्यामहै अनद्यतने पैप्स्यत पैप्स्येतां पैप्स्यंत पैप्स्यथाः पैप्स्येथां
पैप्स्यध्वं पैप्स्ये पैप्स्यावहि पैप्स्यामहि परोक्षेपि ईप्साय ईप्सत ईप्सकः ईप्सिथ ईप्सथुः ईप्स ईप्साय ईप्सिव ईप्सिम
इषइच्छायां ईप्सेष ईप्सतः ईप्सुः ईप्सिथ ईप्सेथ ईप्सथुः ईप्स ईप्सेष ईपिव ईपिम ईप्सवद्रूपनेयं अनंतत्वा
त्वाच्च धातूनां नानार्थत्वाच्च सर्वेषां अभिधातमपाकवत्वाद्रलमाख्यानवर्णनैः ॥ ईप्साख्यानप्रक्रिया
समाप्ता ॥ ॥ अथकृदंतप्रक्रियानिरूप्यते ॥ ॥ कृत्वात्तेरि ॥ अतऊर्ध्वंवक्ष्यमाणप्रत्ययः कृत्संज्ञकः ।

सा॰
उ॰
५४

54

स च कर्त्ता भवति डुपचँष् पाके । तृन्तृचौ । धातोस्तृन्तृचौ प्रत्ययौ भवतः चोः कुरिति कत्वं पक्तृ इति स्थि
ते नामसंज्ञायां स्यादिविभक्तिः पक्ता हृञ् हरणे हर्त्ता कर्त्ता इत्यादि । कृतः । धातोः परस्य कृत्प्रत्ययस्य
वसादेरिडागमो भवति भविता पठिता । कृदितो वा । कृदितो धातोः परस्य वसादेः कृत्प्रत्ययस्येड् वा भवति
गोपिता गोप्ता । आयप्रत्ययो वा गोपायिता । येनैकेनाधिकमपलत्वं तेन तर्कपलत्वात् । तेन रधसहल॰
भक्षघरिषादीनां वेट् पषिता पष्टा इत्यादि षह मर्षणे । सहिवहोरोदवर्णस्य । सहिवहोर्धात्वोरवर्णस्यौका
रो भवति कृत्प्रत्यये परे सोढा सहिता वोढा वहिता । युवोरनाकौ । युवु इत्येतयोरनअक इत्येतावादे
शौ भवतः यथासंख्येन पचति पाचयतीति पाचकः पठति पाठयतीति पाठकः णित्वात् अत उपधाया
इति वृद्धिः कारकः भावकः यु मिश्रणे यावकः स्रु गतौ स्रावकः वाचकः यावकः लुनातीति ला
लकः । नाम्युपधात्कः । नाम्युपधाद्धातोः कप्रत्ययो भवति ककारो गुणप्रतिषेधार्थः क्षिप प्रेरणे क्षिपः
भिदः छिदः । ज्ञानातेश्च कः । ज्ञानातेर्धातोः कप्रत्ययो भवति ज्ञा अवबोधने जानातीति ज्ञः आतोऽनपीत्या
कारलोपः प्रीञ् तर्पणे प्रीणातीति प्रियः कॄ विक्षेपे किरः गॄ उद्गिरणे गिरः । अनट्ट् । पचिनन्दिग्रहा
देरच्ल्युणिनि पचादेर्नन्द्यादेर्ग्रहादेश्चाच्ल्युणिनि इत्येते प्रत्यया भवन्ति यथासंख्येन पचः वदः देवः सेवः वि
ब्रुसेवायां नन्दयतीति नन्दनः रमु क्रीडायां रमयतीति रमणः वामकमसंहर्षणे वामनः अर्द हिंसायां ज
नानर्दयतीति जनार्दनः । ग्रहादेर्णिनिः । ग्रहादेरित्यस्य धातोर्णिनिप्रत्ययो भवति णकारो वृद्ध्यर्थः । ग्राहः णि॰ ५४

कारोवृद्ध्यर्थः नकारस्सकारउच्चारणार्थः दृशिग्रहणस्य स्वरूपं गृह्णातीति ग्राही विशेषेण रौतीति
विरावी । हृषादेष्णः । हृषादेर्धातोः ष्णप्रत्ययो भवति षकारः शिल्पार्थः शिल्पिवत्तश्च शिल्पि-
परेवत्तश्चयत्कार्यमुक्तंतद्भवति पचपः धयः उद्धमः अभिवः गोघ्नः ण्वचोरेऽम् विन्दलाभे गो
विन्दः । ज्वालादेर्णः । ज्वालादेर्धातोर्णप्रत्ययो भवति शीलेर्थे ज्वलतीति ज्वालः तपसंतापे
तपति तापयतीति तापः । पथिगतौ गच्छतीति पन्थाः । अणुकार्ये । कर्मणि प्रयुज्यमाणे अण् प्रत्य
यो भवति कुम्भं करोतीति कुम्भकारः ग्रन्थकारः । आतोडः । आकारान्ताद्धातोर्डप्रत्ययो भवति क-
र्मणि सति गोदः धनदः । नाम्नि च नाममात्रे प्रयुज्यमाने पि ड प्रत्ययो भवति गृहस्थः कुगतो । अ-
चः स्तूडे । अचः स्तूग्राद्धोडे परे अत्वं भवतीति स्तूडः । उरसः सल्लोपो ऽग्रग । उरगः उरङ्गः विह
यस्यास्य विहादेशो भवति चकारान्नग विकल्पेनानुवर्तते विहगः विहङ्गः । अटो । नाम्नि कार्ये
च सति अकारात् टकारप्रत्ययो भवतः टकार ईबर्थः अशिर्हरः स्था भारहरः कवचहरः कृमा-
वहरः पत्रग्रहः चरगतिभक्षणयोः कुरुचरः कुरुचरी अप्रत्ययः सर्वधातुस्साधारणः ट.प्रत्ययह-
चरादेरेव शोककरी कन्या यशस्करी विद्या पुरन्दरः वाचंयमः सर्वसहः द्विषंतपः हृद् विरात्रो भग
न्धरः इत्यादयो निपात्याः । कृविवि । धातोर्नाम्नि कार्ये सति इ ति वि इ त्येते प्रत्यया भवन्ति सत्त्वक
विवीहिः अस्तृष्णामो देवानाप्नोति देवापिः । विवितिपदस्य । विवितिप्रत्यये परे सर्वस्य समागमो ।

सा॰
उ॰
५५
55

भवति क्षेमङ्करः प्रियंवदः आत्मम्भरिः कुक्षिम्भरिः उदरम्भरिः। एजः खश्। एजृ कंपने इत्या
दीनां खश्प्रत्ययो भवति खकारः पूर्वपदस्य मुमागमार्थः शकारः सार्वधातुकार्थः चुरादेर्णिः
जनान् एजयतीति जनमेजयः पाणिंधमः स्तनंधयः। ख्युन्करणे। करणेर्थे ख्युन्प्रत्ययो
भवति अनग्नो नग्नः क्रियतेनेनेति नग्नंकरणं द्यूतं स्थूलंकरणं दधि। भजो ण्विः। भजादीनां
कर्तरि ण्विप्रत्ययो भवति भज सेवायां अर्धं भजतीत्यर्धभाक् नत्वं प्रष्ठतीति नत्वप्राट् वहश्राप्र
णो भारं वहतीति भारवाट् पामादेर्लवे। वाहो वौ पामादेः। ह्रस्वस्य वकारस्यौकारो भवति
पामादेः स्वरे परे भारौहः। वेः। वेर्लोपो भवति सहृ मर्षणे सहेच्छः। साढिः। सहेर्धातोः सकारस्य
षकारो भवति जसि परे नाम्नश्च सेपदान्ते च साढिविषये तुरांसाट् शत्रूणां वेगं सहते इति तुरासाट्
मो नो धातोः। धातोर्मकारस्य नकारादेशो भवति नाम्नश्च स्वसेपदान्ते च प्रकर्षेण शाम्यतीति प्रशा
न्। अभूततद्भावे कृभ्वस्तियोगे च्विः अभूतस्य भावो भूतत्वं तस्मिन्नर्थे कृभ्वस्ति धातु
प्रोक्ततेन योगे सति च्विप्रत्ययो भवति। च्वौ दीर्घ ई अस्य। च्वौ परे पूर्वस्य दीर्घ ई भवति अकारस्य
कारः वेरिति विलोपः चकार उच्चारणार्थः अमिथुनं मिथुनं क्रियते इति मिथुनीकरणं अमुक्तस्य
मुक्तत्वेन भवनमिति मुक्तीभावः। भावे घञ्। असहायः सहायोस्तीति सहायीस्यात् अहेतुः हेतुः
कृत इति हेतूकृते। च्वौ सलोपश्च। च्वौ परे सकारस्य लोपो भवति चकारात् पूर्वस्य दीर्घ ईकारः मनसो ५५

मनस्तेन भवनमित्यमनोभावः । ड्वाच्क्विहायः । चकारोऽनुबन्धः अड्डः खिनेड्डः खिनं करोतीतीति ड्डः
खोकरोति अहृखिनेड्डःखिनं करोतीति ड्डःखोकरोति । मनिङ्कनिपवनिपः । आकारान्ताङ्घातोर्मनिङ्क ।
निपवनिपइत्येते प्रत्यय भवन्ति कर्त्तरि नकारस्येकारस्तत्रोच्चारणार्थः सुष्टुददातीति सुदामा नामसंज्ञा
यां राजन्शब्दवत्प्रक्रियाभवति अश्वइवतिष्ठतीति अश्वत्थामा । स्थामी । स्थामापागादीनोभव
तिकितिपरे नवापिईश्च ईश्च सुष्टुपिवतीति सुपीवा राजन् शब्दवत्प्रक्रिया भूरिदावा । अकारान्तस्या
पिमनिपादयः प्रत्ययाभवंति आश्रवणे श्रुवः शृआदेशः गुणः सुष्टुशृणोतीति सुशर्म पारंपश्य
तीति पारदृश्वा । क्विप्सर्वधातुभ्यः । सर्वधातुभ्यः क्विप्प्रत्ययोभवति पकारस्तुग्विधानार्थः वेरिति
विलोपः । ह्रस्वस्य पिति कृति तुक् । ह्रस्वस्य पिति कृति परे तुगागमो भवति क्विपः सर्वापहारी लो
कर्म करोतीति कर्मकृत् अग्निं चिनोतीति अग्निचित् देवं स्तौतीति देवस्तुत् सोमं पिवतीति सोमपाः दी
र्घत्वान्नतुक् सर्वं पश्यतीति सर्वदृक् दिशाम्मितिकात्वं । एहाहोदीर्घत्वं नाच वक्तव्या । श्रिञ्सेवायां
सुष्टुश्रयतीति सुश्रीः णहबंधने क्विप्प्रत्यये परे नहरूपोपसर्गस्य दीर्घत्वं नाच वक्तव्या नहोधः उपान
त् चकारात् हृषवर्षणे प्रकर्षेणवर्षतीति प्रावृट् कटं चिकीर्षतीति कटचिकीः यतस्त्यकारलोपः
कटचिकीर्षः इत्यादि ध्यैचिंतायां । ध्यायतेः क्विपि संप्रसारणं वक्तव्यं । संप्रसारणाम्मा इत्येकारस्याका
रः सुष्टुध्यायतीति सुधीः दीर्घस्य दीर्घ ईकारः । दृशेष्टक्सकौ चोपमाने कार्ये । दृशादेर्धातोः टक्सक्वार्

ता॰ उ॰ ५६

56

त्यैतौ प्रत्ययौ भवतः वकारात्किफ्कार्यार्थ उपमाने सति। आ सर्वादेः। एतेषु प्रत्ययेषु सर्वादेः सर्वस्य टेरा
त्वं भवति स इव दृश्यते इति तादृशः तादृक्षः तादृक् त्यदादिषु तादृशौ किमिदमः कीश्। किंशब्दस्य
इदम् शब्दस्य कीश् ईश् इत्येतावादेशौ भवतः पाकारः सर्वादेशार्थः क इव दृश्यते इति कीदृशः कीदृक्षः
कीदृक् अयमिव दृश्यते इति ईदृशः ईदृक्षः ईदृक्। भवतादिषु दृशेष्टक्सकादयः प्रत्यया भवन्ति भ
वदादीनां टेकारादेशश्च वक्तव्यः भवानिव दृश्यते इति भवादृशः भवादृक्षः भवादृक् त्वमिव दृश्यते इ
ति त्वादृशः त्वादृक्षः त्वादृक् अहमिव दृश्यते इति मादृशः मादृक्षः मादृक्। चशाद्यास्समानस्य सः
समानस्य सादेशो भवति कृत्स्नस्य समान इव दृश्यते इति सदृशः सदृक्षः सदृक् वयमिव दृश्यते इ
त्यत्र टाकारश्च वक्तव्यः अस्मादृशः अस्मादृक्षः अस्मादृक्। णिनिरतीते। धातोरतीते काले च णिनि
प्रत्ययो भवति अग्निष्टोमेन यजितवान् इष्टवान् इत्थंशीलमस्यास्ति वा अग्निष्टोमयाजी उष्णभोजी इनांसे
मौनकारलोपः। क्विप्सुनिपृड़ा। धातोरतीतेकाले क्विपुनिपृडादयस्त्यैते प्रत्यया भवन्ति ब्रह्महा भ्रूणहा
वृत्रहा यज्वा सत्वसिजम् सामगाः सर्वगः। क्तक्तवतू। धातोरतीते क्त क्तवतू एतौ प्रत्ययौ भवतः भाव
कार्ययोः क्तः कर्तरि क्तवतुः ककारो गुणप्रतिषेधार्थः कटः कृतः अत्र कार्ये क्तः कर्तरि क्तवतुः उका
रो नुम्विधानार्थः कृतवत् इति स्थिते अत्तो नुम् अत्वसोस्सौ हसेपः सेर्लोपः कृतवान् कृतः
कृतवती आपानेरिव दत्तेन भावेन प्रक्तकान्तः। गत्यर्थादकर्मकाच्च। कर्तरि क्तः गत्यर्थादकर्मका

५६

द्धातोश्च कर्तरि क्तप्रत्ययो भवति अटितः स्थितः ग्रामदम उपग्रामे ग्रामांदीर्घः। ग्रामादौ दीर्घत्वाव
वक्तव्या मदेर्नदीर्घत्वमिति वक्तव्यं मत्तः ग्लानः दान्तः। अतो वा सेट्। शीङ्क्तप्रत्ययो वा किद्भवति श्र
यितः श्यितः ग्रामदम उपग्रामे ग्रामांदीर्घः प्रग्रथितः प्रश्वसितः मृदितः मोदितः रुदितः रोदितः
मुषितः मोषितः मुषितः योषितः इटो ग्रहामिति दीर्घः गृहीतः चुरिप्रेरणे चुरितः चोरितः
नुदीप्रेरणे नुदितः नोदितः शृङ्खिडः उवर्णान्ता इवर्णान्ताश्च श्रिस्वश्च धातोः परस्य कितः प्रत्ययस्य इड्न
भवति ततः भूतः उकारान्तत्वान्नेट् स्नुतः स्तुतः ऋकारान्तरान्तत्वान्नेट् श्रिञ् सेवायां श्रितः इत्यादि
शीङीटितः शायितः ईदितश्च धातोः परस्य क्तप्रत्ययस्य इड् न भवति जितान्तवृत्तमानेपि जिदन्त
येषां ते जीतः तेषां धातूनां क्तप्रत्ययो भवति वर्तमानेपि अपि शब्दाद्भूते कर्मणि च दलस्य नोद
श्च दकाराद्परस्य कितः तथापूर्वस्य नत्वं भवति दकारस्य च नकारः ञिमिदा स्नेहने ञिकारस्तक्प्र
त्ययार्थः आकारेण निष्ठापनार्थः मिदः तक्तः इति स्थिते ककारो गुणप्रतिषेधार्थः तकारस्य नकारः मि
न्नमन्नं तैलेन वर्तते ञिक्ष्विदा गात्रप्रस्रवणे पूर्ववन्नकारः आदेः लः ल्नः आयामेन क्ष्विन्नः ञिक्ष्वि
दाक्षात्पूर्णे दकारतकारयोर्नकारः ऋणोणोनन्ते प्रभिन्नः परिक्षिप्तः अदभक्षणे अदो जग्धि
अदस्त्यस्य धातोर्जग्धादेशो भवति तकारादौ किति परे क्तप्रत्ययः तयोर्धः इति तकारस्य धकारः
ऊभेज बाह्यति च कारस्य गकारः जग्धमन्नं अन्नमिति कर्मणि जग्धवान् हन्त हिंसायां। र ः। रेफा

सा॰ उ॰ ८७ 57 तस्य नत्वं भवति ऋतइद्धातो विद्ग्से इति दीर्घः एात्वं विकीर्णं इत्यादि जृष् जृषु वयोहानौ जीर्णो
जीर्णं शरीरं ॥ ल्वाद्योरितः ॥ ल्वादेर्धातोरोदितस्तकारस्य नकारादेशो भवति लूञ् छेदने नकार
स्य नकारः लूनः लित्वे प्रस्थादित्वाद्दीर्घः दीर्णः लीङ् श्लेषणे सेध्यल्वादीनां ल्वादित्वात्तस्य
नकारः ग्लान ग्लानः ओप्यायी वृद्धौ प्याय इत्यस्य धातोः पी आदेशो भवति परि ल्वात्तस्य नः पहाक्वाम
गेत्स्यामीतीकारः पीनः हीनः ॥ दोदति ॥ दा इत्यस्य ददादेशो भवति नकारादौ क्तिति परे दत्तः दत्तवा
न् ॥ स्वरादेशो वा ॥ स्वरादुत्तरस्य दा इत्यस्य तो वा भवति नकारादौ परे डुदाञ् दाने प्रत्तः प्रदत्तः ॥
यज देवपूजासंगतिकरणदानेषु यजादिवचादीनां यूतः संप्रसारणं किति इत्यस्य राजादेश्च इति जस्य
षः झभिष्टुरिति तस्य टः इष्टं इष्टवान् टुवप बीजसंताने संप्र उप्तं बीजं वह प्रापणे संप्रत
कारः होढ इति हस्य ढः जभांतत्वात्तयोर्ध इति तस्य धः झभिष्टुरिति धकारस्य ढकारः ढि ढो
लोपः दीर्घश्च ऊढः ऊढवान् इत्यादि ॥ वेञ् संवरणे संप्रदीर्घस्य च दीर्घः संवृतः संवीतं ह्वेञ्
स्पर्धायां शब्दे च आह्वः हूतः संप्रसारणं दीर्घस्य य कारयोर्यकारवकारयोर्दीर्घो दीर्घकारोस्य हूतः वदव्य
क्तायां वाचि संप्रसारणे इतीट् उदितः उक्तः वस निवासे संप्रसारणं चसादेशः इति षत्वं उषितः जिष्वप
शयने सुप्तः वसत्वधोभिद्रुरुक्तः दधत्भ्रस्त्याया दधितः चैङ् रक्षणे ॥ ध्याप्योर्निपात्यते ॥ संप्रसारणा
दीनामात्तस्य नकारो निपात्यः णत्वं वक्ष्यमाणं इ॰ णः क्षीणः क्षीणः ध्याणः ध्यानः विन्नः विन्नः उक्तो ८७

क्लीबत्वे उक्तः उन्नः नुत्तः नुन्नः वा गतिगंधनयोः निर्वाणः निर्वातः उपशान्तोवेव निर्वाणो दीपः अन्यत्र
त्र निर्वातः इत्यादयो यथाप्रयोगं द्रष्टव्याः। संपर्केभ्यः करोतेर्भूषणे स्सट्। संपरिउप एभ्यः परस्य करोः
तेर्धातोर्भूषणार्थे स्सट् प्रत्ययो भवति दिस्यादेशे संस्कृतः परिष्कृतः उपस्कृतः भावे घञ् संस्कारः प
रिष्कारः उपस्कारः अलङ्कारः जनी प्रादुर्भावे जनेर्जादेशः जातः। पचोवः। पचादेर्धातोस्तकार
स्य वकारो भवति अनिट्त्वादेव चोःकुः पक्वः पक्ववान्। शुषेः कः। शुषेर्धातोः परस्य तककारो भवति
शुष्कः ष्टै स्वे संघ्यतणामा। स्त्यायतेर्मः। स्त्यामः स्फायी वृद्धौ। स्फायः स्फी। स्फा इत्यस्य धातोः स्फी
इत्यादेशो भवति स्फीतः डुकृञ् करणे। क्वसुकानौ जश्वत्। धातोरतीते काले क्वसुकानौ प्रत्ययौ भव
तः तौ च णिबादिवद्भवतः क्रमात्परस्मैपदिन आत्मनेपदिनश्च प्रयोज्यौ उभयपदिनस्तूभावपि यथा
णप् परस्मैपदे तथा क्वसुः यथात्मनेपदे तथा कानः णबादित्वाद्द्विर्वचनं ककारो गुणप्रतिषेधार्थः
उ इत्यकारः उगितश्च अनिट्त्वेदृतो नुम् न्सम्महतां इत्यादीनां दीर्घः हसेपः सेर्लोपः संयोगान्तस्य
लोपः चकृवान् चकार इत्यर्थः उभयपदित्वादात्मनेपदे कान प्रत्ययः ऋरं णत्वं चक्राणः चक्रे इत्य
र्थः ष्ठा गतिनिवृत्तौ तस्थिवान्। शतृशानौ तिप्वत्क्रियायाम्। क्रियापदे गम्यमाने धातोः शतृशानौ प्र
त्ययौ भवतः तौ च तिबेवद्भवतः क्रमात्परस्मैपदात्मनेपदयोर्भवतः पच शतृ इति स्थिते अपकर्तरि अ
दे इत्यकारलोपः नामत्वात्स्यादि उगितो नुम् हसेपः सेर्लोपः पचन् अस्ते पचंस्तिष्ठति गेशब्दे गायन्नास्ते तिः

सा. उ. ५८
58

मुगाने तः। अकारस्यान्ते परे मुगागमो भवति उकार उच्चारणार्थः ककारः स्थाननियमार्थः अकृतेरि।
पचमानः पिबति यजमानः स्तौति तन्वदेहप् मन्यते इति मल्लानः। आसेरानई। आसेर्धातोरान संबंधिन
आकारस्य ईत्वं भवति आसत इत्यासीनः। वादीपोश्शतुः। अवर्णान्तस्य धातोर्वा नुगागमो भवति ईकारे ईपि
च परे तुद व्यथने धातुप्रत्ययः शिन्वाच्छतुर्वत् तुदादेः आदेश्च्यकारलोपः तुदत इति स्थिते नपुंस-
के प्रथमाद्वितीययोर्द्विवचने ईसावितेकारे कृते वा नुप्रत्ययः शिदित्यात्स्वरात्परः अनुस्वारः तुदन्ती तुदती
तुदन्ति स्त्रीलिंगात्वादीप् तुदती तुदन्ती स्त्रीजलेवर्तते। शप्श्यनोर्नित्यम्। शप्श्यन्प्रत्ययसमन्वि-
तोकारान्तस्य धातोः प्रत्ययस्य नित्यं नुगागमो भवति ईकारे ईपि च परे भूसत्तायां अकृतेरि भवन्ती डुपचष्
पाके पचन्ती दिवु क्रीडायां दिवादेर्यः दीव्यन्ती श्लिष आलिङ्गने दिवादेर्यः नम् श्लिष्यन्तीत्यादि। द्वि-
रुक्तानां जक्षादीनां च धातूनां नुम्प्रतिषेधो वक्तव्यः दादत् इति स्थिते अकृतेरि ऋादेर्द्विश्चकरणः अन्तोनपी-
त्याकारलोपः ददत् ददतौ एवं दधत् दधतौ दधतः। नपुंसके शौ वा। नपुंसके जस्शसोः परे द्विरु-
क्तानां वा नुर्भवति ददति ददन्ति दधति दधन्ति जक्षति जक्षन्ति कुलानि जाग्रत् दरिद्रत् चकासत्
अनुशासत्। विदेर्वा वसुः। विदेर्धातोः धातुविषये वा वसुप्रत्ययो भवति अन्तोनुम् न्सम्महतोर्धोर्दीर्घः।
धोश्च हसेपः सेर्लोपः संयोगान्तस्य लोपः विद्वान् पक्षे विदन्। अत्रभवत्तत्रभवन्तौ पूजार्थे निपात्येते।
उकारानुबन्धसहितेन निपातनं अत्रभवन्तो भट्टाचार्याः पूजार्थमित्यर्थः अत्रभवद्भिर्भगवत्पादैर्भाषितम् तत्र ५८

भवद्भिर्भणितं। शीले तृन्। धातोस्तृण्प्रत्ययो भवति शीलेस्वभावार्थे नकारः प्रत्ययभेदज्ञापनार्थः
करणशीलः कर्ता हरणशीलो हर्ता अनिड्भावेद् गुणः। इस्नस्नुक्नुः। धातोः शीलेर्थे इस्नस्नुक्नु
इत्येते प्रत्यया भवंति अलंकरणशीलो लङ्कु: रिस्नुः इस्नप्रत्ययः गुणः निराकरणशीलो निराकरि।
स्नुः सहसहने सहनशीलः सहिस्नुरित्यादिप्रयोगानुसारेण ज्ञातव्यं स्नुप्रत्ययो जिभूग्लाभावे निपा
त्यः जिस्नुः भूस्नुः स्थास्नुः इत्यादि क्नुप्रत्ययः ककारो गुणप्रतिषेधार्थः गृधु अभिकांक्षायां ग
र्धनशीलो गृध्नुः विस्नुर्व्याप्तौ विस्नुः क्षिप प्रेरणे क्षिप्नुः षाकोकणः धातोश्शीलेर्थे षाकन उक
ण इत्येते प्रत्यया भवंति वृञ् संवरणे वरणशीलो वराकः षकार ईबर्थः वराकी जपजल्पव्यक्ता
यांवाचि जल्पाकः भिक्षयाचनायां भिक्षाकः लुटि लुण्टने इदित इति लुम् लुण्टाकः ऊहगतौ
ऊहाकः उप्रत्ययः भिक्षुः बिन्दुरिच्छुश्चाह्नौ। सान्ताशंसयोश्च। सन्प्रत्ययान्तस्य आङ्पूर्वस्य शंसोभिधा
तोश्च उप्रत्ययो भवति वक्तुमिच्छुर्विवक्षुः ग्रहीतुमिच्छुर्जिघृक्षुः आशंसुः पिपासुः कमु कांतौ उका
ण्प्रत्ययः णित्वाद्वृद्धिः कामुकः भूसत्तायां भावुकः स्थायुकः आलोचुक इत्यादि। नमादेरः। नमा
देर्धातोरप्रत्ययो भवति नमप्रह्वीभावे नम्रः हिसि हिंसायां हिंस्रः। घसादेः क्मरः। घसादेर्गणात्क्म
रप्रत्ययो भवति घस्मरः अद भक्षणे अद्मरः सृगतौ क्रियान्नगुणः सृमरः। भासादेर्घुरः। भासादेः
र्धातोर्घुरप्रत्ययो भवति भासृदीप्तौ भासुरः भञ्जोआमर्दने प्रत्ययस्य घित्वाच्चजोः कगाविति जका।

सा॰
उ॰
५५

59

रस्यगकारः भङ्गुरः भेदुरः । छिदिभिदिविदां कुरः । छिदिर् द्वैधीकरणे भिदिर् विदारणे विद ज्ञाने ।
एषां धातूनां कुरप्रत्ययो भवति छिदुरः भिदुरः विदुरः छिद्यादयो गणः । यङः स्थेकः । यङन्ताद्धातो
रूकप्रत्ययो भवति तत्सन्नियोगे च यङो लुग्भवति शीलेऽर्थे यज देवपूजादौ अतिशयेन इत्यादेर्यङो
द्विश्चेति द्विर्वचनम् यायज्य यङ् इति स्थिते अस्माद्धातोः थकप्रत्ययः यङो लुक् अतिशयेन यजनशी
लो यायजूकः इज्याशील इत्यर्थः जमजपां तु क नो लोपः दन्शाद्दशने दन्दशूकः जप जल्प व्यक्तायां
वाचि जञ्जपूकः वद व्यक्तायां वाचि वावदूकः जागृ निद्राक्षये । जागर्तेरूको वक्तव्यः । अयङन्ता
दपि जागर्तेरूको वक्तव्यः गुणः जागरूकः । आदृतोः किर्द्विश्च भूते । आकारान्तादृकारान्ताच्च धातोः
शीले भूते काले किः प्रत्ययो भवति धातोर्द्विर्वचनं ककारः कित्कार्यार्थः अत्र णकारादित्वात्क्रियाहर
पूर्वा उदाहरति रामः सोमं पपिर्यज्ञे ददिर्गाश्चक्रिरद्भुतम् याजकान्वव्रिराजाङ्ग्रिः पोपरीके महा
द्विजान् सदैणादयः । सर्वस्मिन्काले उणादयः प्रत्यया भवंति । उण्प्रत्ययः करोतीति कारुः णित्वाद्वृद्धिः
वा गतिगन्धनयोः वातीति वायुः आतो युक् पापाने पिबतीति पायुः डुमिञ् प्रक्षेपणे मिनोतीति मा
युः स्वाद आस्वादने स्वदत इति स्वादुः कुच आक्रोशे उणादित्वात्प्रत्ययः लघूपधत्वाद्गुणः ख
शाषराजादेः षः छुभिड्डः कुषातीति क्रोष्टा कामयत इति कामी जायते जन्यते वा जन्तुः ।
अवतेर्णो मक्प्रत्ययः उकारश्चानुबन्धार्थः किमित्याह प्रवकारस्योकारः ऊ ओ अवतीति ओं अतसा ५५

ननत्यगमने मनिण्प्रत्ययः णित्वाद्वृद्धिः अनतीत्यात्मा बृहिवृद्धौ बृहत्ता बृहणत्वाद्ब्रह्मणः अ
त्र मन्प्रत्ययः । मन्नुपधाया ऋद्धुः ॥ मनिप्रत्यये परे उपधाभूतस्य ऋकारस्य रकारो भवति ब्रह्मेति
सिद्धम् । धृधारणे । मप्रत्ययः गुणः धारणाद्धर्मः धूञ् कंपने । धूञादेर्निरिति निप्रत्ययः । धूयते इति
धूलिः अणिगतौ इदित्वान्नुम् नश्चापदान्ते झलि इत्यनुस्वारः अन्ततीत्यञ्जलिः । भविष्यत्येणिनिप्र
त्ययः । आगन्तुमिच्छतीत्यागामी भविष्यतीति भावी । प्रमादेरुपकरणे त्रः । पा हुं धिषि हिंसायां ।
अस्त्रं असु क्षेपणे अस्त्रं पात्रं नेत्रं छित्वये लोचनमिति लत्रं पारीं मित्रं अनुभवणे श्रूयतेनेति श्रोत्रं इत्या ने॰
दि । दो अवखण्डने दात्रं ईश ऐश्वर्ये । ईशादेर्वरः । ईष्टे इतीश्वरः वप्रत्ययः स्थावरः । राजादेरन् । राजा
देर्धातोरन्प्रत्ययो भवति राजते इति राजा यु मिश्रणे यौतीति युवा । यौधातोर्ल्वः । युध संप्रहारे यो
द्धा । वचादेरस् । वचादेर्धातोरसप्रत्ययो भवति उच्यते इति वचः मह पूजायां मह्यते इति महः । से
कार्ये केलिमप्रत्ययो भवति ककारो गुणप्रतिषेधार्थः भेत्तव्यकं भिदेलिमकाष्ठं लस्तव्येन
पचपाके पचेलिमश्रावकाः उष दाहे । कादीनामिः । कौतीति कविः काव्यकर्ता उष दाहे मेती
ति रविः पुनातीति पवि पापानि हरतीति हरिः शोचति क्लिश्यमानं जनमिति शुचिः । क्रमतेमो॰
रिप्रत्यय । उपधाया इकारो वक्तव्या क्रमति क्रमते वा क्रिमिः तम्यतीति तिमि । अवहाग्निभ्यो निः
योनिः वह्निः अग्निः । इदिचादिपाकिनादिभ्यो रक् इन्द्रः चन्द्रः पाक्रः नाद्रः । उदयोपरिमिताः १

सा. ३. ९०
60

प्रयोगमनुसृत्य प्रयोक्तव्याः उक्तो हि संज्ञासधातुः तृणादिप्रत्ययाश्च ततः परे । कार्याविष्यास्तवे
धयेतुश्चावृत्कृणादिषु । इत्युणादिप्रक्रिया तेनतदर्थायां भविष्यति धातोर्भविष्यति काले तुम्प्रत्य
यो भवति तदर्थायां क्रियायां वाच्यमानायां भोक्तुं व्रजति पवितुमीष्टे स्नातुमीहते इत्यादि का
लवेलासमयेषु च तुं वक्तव्यः भोक्तुं कालः भोक्तुं कालः भोक्तुं वेला भोक्तुं समयः । भावे घञ्
धातोर्भावेऽर्थे घञ्प्रत्ययो भवति । घञोकारौ घिति । धातोश्चकारजकारयोर्यथाक्रमं ककारगका
रौ भवतः घिति प्रत्यये परे धातोर्नामिनश्चेति वृद्धिः भवनं भावः पचनं पाकः अत उपधाया इति वृ
द्धिः त्यज हानौ त्यजनं त्यागः भज सेवायां विभूर्वः भजनं विभागः इण् गतौ अयनमायः यज देव
पूजादौ यजनं यागः मानं मायः आतो यक् । संज्ञायामकर्तरि च । कर्तृवर्जिते कारके भावे च
घञ्प्रत्ययो भवति संज्ञाविषये ञित्वाद्वृद्धिः प्रतिकार्यमाक्रियते इति प्रत्याहारः दीयते इति दा
यः विक्रियतेऽनेनेति विकारः उष्यते इति वासः । स्वरादेः । स्वरान्ताद्धातोरप्रत्ययो भवति भावादौ
भावे कर्तृकारके च चयनं चयः अत्र भावे संचीयत इति संचयः लवः नवः उत्वपत्रमन्वयः ल
विक्षेपे लूयते कामादिभिरिति लवः तालिष्यते इति नवः । मदाम् । मदादीनाम प्रत्ययो भवति भावादौ म
दी हर्षे मदनं मदः प्रमीयते अनेनेति प्रमदः करणेऽप्ययः पणः पनः पाश्चरम उपशमे शमनं श
मः दमनं दमः यम उपरमे यमनं यमः दीव्यते प्रकाश्यते विस्मयमनेनेति देवः भिज बंधने आदेसः ९०

स्तः विमर्दः प्रादेश्च तथातो स्तनुमान् विशेषसिनीति वभात्मनेन ष्ठस्थषमोक्षरहनिविषयः। मू
र्तौ घनः। मूर्तौ काठिन्ये परिच्छेदेऽर्थे चाभिधेये हन्तेरप्रत्ययो भवति घनादेशश्च दधिघनः काठिन्यं दधी
त्यर्थः सैन्धवघनः परिच्छिन्नमेतावत्सैन्धवमित्यर्थः हिंसिहिंसायां इत्यस्मात्त्रम वर्णविपर्ययश्च सिं
हे वर्णविपर्ययः इति प्रागुक्तत्वात् अप्रत्यये हिंसायां वर्णविपर्ययो भवति भावादौ हिनस्तीति सिंह
ट्वितोऽथुः। ट्वितो धातोरथुप्रत्ययो भवति भावादौ टुवेपृ कम्पने वेपनं वेपथुः टुवे श्वेपणे श्वेप
णं श्वेपथुः टुनदि समृद्धौ नन्दथुः श्वयथुरित्यादि द्रष्टव्य। ड्वितस्त्रिमक् तत्कृते। ड्वितो धातोस्त्रिमक् प्रत्य
यो भवति तेन धात्वर्थेन कृते वाच्ये सति क्रिययेति करणेन निर्वृत्तो निष्पन्नः कृत्रिमो घटः संभा
वेण निर्वृत्तं संभृत्रिमं यद्वा पाकेन निर्वृत्तः पक्त्रिम ओदनः नङ्की धातोर्नङ् की इत्यतो प्रत्ययो भवतः।
भावादौ यती प्रयत्ने यतनं यत्नः प्रच्छ ज्ञीप्सायां। प्रच्छस्त्रे। प्रच्छादेर्धातोर्नेटि परे छकारस्य शका
रो भवति भावादौ प्रश्नः विच्छ गतौ विश्नः यजदेवपूजादौ नङ् प्रत्ययः स्नेश्च भिश्नुरिति नकारस्य ञ
कारः जजज्ञोः यजनं यज्ञः ञिष्वप् शयने स्वपनं स्वप्नः टकार ईहत्वकरहस्वकृतत्वात् इवनीतिङ्गोणी
कर्मविक्षेपे क्रियते कर्णः रिक्तात् कलीरलाधीयते राजधानीत्यादि डुधाञ् धारणपोषणयोः अ
नेन पीत्याकारलोपः विधानं विधिः संधानं संधिः आधीयत इत्याधिः अस्मिन्निधीयते स्मिन्नित्याधा
रेभ्यो निधिः। भावे घञ्। धातोर्भावेऽर्थे घञ्प्रत्ययो भवति फचौ इनाको घञंतनपुंसके करणं हरणं

सा॰
उ॰
६१

हवनं दानं हूषणं ॥ उदः स्थादेः सलोपः ॥ उदुपसर्गात्परस्य स्थादेः सकारस्य लोपो भवति ष्ठा गतिनिवृत्तौ
आदेः ष्ठः स्थः कवोरनाको सकारलोपः उत्थानं उत्तम्भनं ॥ साधनाधारयोश्च ॥ साधने आधारे चार्थेऽन
ट्प्रत्ययो भवति पचतेऽनेनेति पचनोऽग्निः अत्र साधनेऽनट् पचन्त्यस्यामिति पचनी स्थाली टित्वादीप् अ
त्राधारेऽनट् चकारादन्यत्रापि संप्रदीयतेऽस्मै इति संप्रदानमित्यादि ॥ ईषद्दुस्सुषु खल् ॥ ईषदादिषु प्रयु
ज्यमानेषु खल्युटावेतौ प्रत्ययौ भवतः भावादौ लकारः प्रत्ययभेदज्ञापनार्थः खकारो मुमागमार्थः ईष
दाढ्यंभवः ईषदाढ्यङ्करः इत्यादौ खिति परे मुमागमः ईषद्भूयतेऽनेनेतीषद्भवः दुःखेन भूयतेऽनेने
ति दुर्भवः सुखेन भूयतेऽनेनेति सुभवः ईषत्स्वल्पप्रयासेन क्रियते इतीषत्करः एवं दुःखेन क्रियते इ
ति दुष्करः सुखेन क्रियते इति सुकरः लभ लाभे दुःखेन लभ्यतेऽनेनेति दुर्लभः सुलभः भूकृञोर्वा
वा खल् नान्यत्र यथा संप्रहारे लघूपधस्याङ्गुणः अनादेशः दुःखेन युध्यते इति दुर्योधनः ॥ तव्यानीयौ
धातोस्तव्यानीयौ प्रत्ययौ भवतः भावादौ भविष्यति काले विधौ च भूष्णादीनां तव्यप्रत्ययः कृत इतीडाग
मः भवितव्यं अनीय भवनीयं डुकृञ् करणे एकस्वरान्तत्वान्नेट् गुणः कर्तव्यं करणीयं दातव्यं दानी
यं पातव्यं पानीयं स्थातव्यं स्थानीयं आमनीयमित्यादि अधिकरणे प्रत्ययः ॥ इटो ग्रहाम् ॥ ग्रहादीनां
मिट ईकारो भवति गृहीतव्यं वृञ् संभक्तौ वरीतव्यं वरणीयं ॥ स्वराद्यः ॥ स्वरान्ताद्धातोर्यप्रत्ययो भ
वति भावादौ चिञ् चयने गुणः चेयं णीञ् प्रापणे आदेः ष्णः स्नः नेयं चतव्यं नेतव्यं चयनीयं पचनी ६१

यमित्यादि । क्षय्यजय्यौ वशक्यार्थे निपात्येते गुणः स्वरवद्यकारः पञ्चप् क्षेतुं शक्यं क्षय्यं जेतुं
शक्यं जय्यं अन्यत्रैव जयं मनः क्षय्यजय्यौ चेति चकारात् क्रय्यमिति निपात्यते क्रयावयोह्यानो नजी
र्यतीत्यजर्य्यं संगतमित्यर्थः । ऋशाकात् । पवर्गाद्धातोः शाकादेश्च यप्रत्ययो भवति जप जल्प व्यक्ता
यां वाचि जप्यं जल्प्यं लभ लाभे लभ्यं नश प्रभावे नम्यं शाल्कृशकौशाक्यं सहमर्षणे सह्य
मित्यादि । ईचातः । आकारान्ताद्धातोर्यप्रत्ययो भवति आकारस्य चेकारः गुणः दा दाने देयं पा
पाने पेयं गै गाने संध्यक्षराणामित्यात्वे ईचातः गेयं । ऋहलान्ताद्घ्यण् । ऋवर्णान्ताद्धलन्ताच्च धा
तोर्घ्यण् स्यात् करणार्हे कार्यं णित्वाद्वृद्धिः वचनार्हे वाच्यं हस हसने हसनार्हे हास्यं चि
त्यात्ककारोपि पाच्यं पाक्यमित्यादौ विकल्पेन ककारः । यपते भावादौ तव्यादयो विहितास्ते हवि
धौ चार्थे वक्तव्याः दृशिर् प्रेक्षणे अर्हे विधौ तव्यप्रत्ययः उपधाया लघोर्गुणः । तोरोऽज्झसे दृशां ।
त्यरत्यस्य रकारः छशषराजादेः षः घढधत्वं ष्टुभिष्टुरिति ष्टुत्वं दर्शनार्हो द्रष्टव्यः अनीयप्रत्ययः दर्श
नीयः यप्रत्ययः दृश्यः श्रु श्रवणे श्रोतुमर्हः श्रोतव्यः इङ् अध्ययने अधिपूर्वः तव्यप्रत्ययः गु
णः अध्येतव्यः वेदितायां । सप्रत्ययान्ताद्यपि तव्यादयो भवति संध्यक्षराणामा इच्छायामात्मने
सः द्वित्वं ध्याध्यासइति स्थिते कुलक्षरत्वं पूर्वस्य कुत्वः पूर्वस्य हसादिशेषः यस्मेइति पूर्वस्येकारः ज
पानं जवचपाः सधातुरिति धातुसंज्ञायां तव्यप्रत्ययः निपूर्वः कृत इतीडागमः नितरां ध्यातुमिच्छा

का. वृ. ९२

69

निदिध्यासितव्यः शास्त्रावबोधने पूर्ववद्द्वित्वादिः विशेषेणाज्ञातुमिष्टो विजिज्ञासितव्यः। ओतावश्यके।
वर्णान्तादावश्यकेर्थे ध्यण्प्रत्ययो भवति णित्वाद्वृद्धिः। ओदौतोर्यः स्वरवत्। ओकारादौकाराश्च प्रत्यये यका
रः स्वरवद्भवति तेनावादेशौ भवतः समासे अवश्यमादीनां मलोपमिच्छन्ति शिष्टाः तथाहि लुंपेदः
वश्यमः कृत्ये तुं काममनसोरपि समो वा हिततनयोर्मांसस्य पचियुड्घञोः तव्यादीनां कृत्यसंज्ञापा
णिनीयानां अवश्यं भाव्यमवश्यभावं अवश्यलाव्यं भोक्तुंकामो भोक्तुकामः श्रोतुंकामो यस्य मनः श्रोतु
कामः श्रोतुंमनो यस्य स श्रोतुमनाः संहितं सहितं संततं सततं मांसस्य पचनं मांस्पचनं मांसस्य पाकः युडो
ङित्वादीप् मांसस्य पचनी मांस्पचनी स्थाली। ऋदुपधात्क्यप्। ऋदुपधाद्धातोः क्यप्प्रत्ययो भवति भाव क्यप्+
कार्ययोः वृत्तवर्तनेवक्यप् छिद्यात्त्रगणः वृत्यं कृती छेदने कृत्यम्। कृत्वात्क्यप्। कृत्वान्ताद्धातोः प्रत्ययो
पिद्वा ह्रस्वस्य पिति कृति तीति त्वक् वृत्तवर्णो ह्रस्वः स्तुत्यः आदेस्तः स्तः तकारस्य उकारो ककारो ऋ
त्यं इत्यत्र तौ ऋत्यमित्यादि। शासुवृदृगुहां क्यप्। शासेः शिष्यं स्तुत्यं गुह्यं। वदेः क्यब्भावादौ। उद्यो यम्।
ब्रह्मोद्यं। अहेश्च। अर्ज्जं नष्टस्यास्तेना। स्त्रियां यज्ञाभावे यजादेर्धातोः स्त्रियां भावे क्यप्प्रत्ययो भवति कि
त्वात्संप्रसारणं इज्या संपूर्वः समज्या पाण्या व्रज्या भज्ञ अभिषवे आदेः स्तः स्वः त्वकृत्या आस उपवेशने
आस्या इत्यादि। कृञो वेदुत्व्यः। कृत्या। ऋतोरिट्। ऋतोधातोर्न्तकारस्य विटादेशो भवति यादौ परे इ
कारोऽवधानार्थः क्रिया इति केचित् हनहिंसागत्योः क्यपि लोपस्त्वनुदात्तानामिति शाहेन ज सा भा ९२

वेपिनकारस्य लोपः स्यात् पश्चात्वक्ता ब्रह्महत्या। क्ति। धातोः क्तिप्रत्ययो भवति स्त्रियां भावे अत्र भवनम
नुभूतिः गमनं गतिः पचि विस्तारे पचनं पक्तिः आवलिरित्यर्थः डुपचष् पाके पचनं पक्तिः वह प्रापणे व
हतीति क्रियते संप्रश्नोक्तः तयोर्ध इति तकारस्य धकारः ऊढिरिति धकारस्य ढः ढि ढो लोपो दीर्घ इति पूर्व
स्य दीर्घः वनसंभक्तौ विदत्ताने संपूर्वः खनेवपाजमानां सविनि शमो दीर्घः शान्तिः ग्लै म्लै हर्षक्षये ग्ला
द्योटित इति तकारस्य नकारः संध्य त्वरणामाग्लानिः ग्लानिः। ईषपूरी ईर्यवत् क्तिप्रत्ययो नेट् गणश्च ईषा
धातोर्वा प्रत्ययो भवति नेट्गणश्च न संपूर्वः संप्रीतिः प्रीञ् तर्पणे प्रीतिः। कर्तरि क्तिन्। धातोः कर्तरि
क्तिन्प्रत्ययो भवति प्रकर्षेण करोति प्रकृतिः प्रधानपुरुष इत्यर्थः। इक्तिपौ धातुनिर्देशे। धातुस्वरूपे वा
च्येसति इक्तिपौ प्रत्ययौ भवतः तिप्प्रत्यये कर्तरि पचिः पचतिः गमिः गमोऽछ इति छत्वं गच्छतिः।
यजिः यजतिः पिबिः पिबतिः। षिद्भिदादिभ्योऽङ्। षितो धातोर्भिदादेश्च स्त्रियामङ् प्रत्ययो भवति भावादौ
डुपचष् पाके आबन्तः स्त्रियामित्याप् पचनं पचा मृजूष् मृजेर्मार्जनं मृजा भिदिर् विदारणे भेदनं भि
दा छिदिर् द्वैधीकरणे छेदनं छिदा जृष् वयोहानौ। जरेत्यत्रात्र वृद्धिर्न प्रत्ययो वक्तव्यः। जरादीनाम
ङ्गुणो वक्तव्यः जरा गुध परिवेष्टने गोधा। श्रद्धा मेधा स्पृधा ईहा इत्यादयो निपात्यन्ते। गुरोर्हलः स्यात् गुरुमतो हलः।
सान्ताद्धातोः कर्तरि स्त्रियामप्रत्ययो भवति ईह चेष्टायां ईहा ऊह वितर्के ऊहा ईड स्तुतौ ईडा कुण्ठनयोः ईहा इ
च्छायां इच्छा। ण्यासश्रन्थो युच्। पचणा ग्रन्थना उपासना वेदना घटना। नप्रत्ययान्ताच्च। नप्रत्यये

सा॰
प्र॰
उ॰
सू

63

ताद्धातोरप्रत्ययोभवतिभवति स्त्रियांकर्त्तरि घञन्तस्याकारलोपः स्वरहीनंपरेणसंयोज्यं श्रावनःस्त्रि
यां कर्त्तुमिच्छाचिकीर्षा भोक्तुमिच्छाबुभुक्षा हर्त्तुमिच्छाजिहीर्षा चकारात्सप्रत्ययार्थागतप्रत्ययांता
दपिभवति आत्मनःपुत्रेच्छाभावे पुत्रीयत्रकाम्येत्यादि पूर्वकालेक्त्वाधातोः समानकर्तृके प्रयुज्य
मानेसतिपूर्वकालेक्त्वाप्रत्ययोभवति समानएकःकर्त्तायस्मिन्ससमानकर्तृकः स्नात्वाभुंक्तेभुक्त्वाव्रज
ति। क्त्वासेड्द्विर्हादद्सहितः। क्त्वाप्रत्ययःकिद्वाभवति किद्भावपक्षेलघूपधत्वेनगुणः द्युतित्वा
वर्त्तित्वा कित्वपक्षेनगुणः विदित्वा रुदित्वा मुषित्वा गृहीत्वाइत्यादि। अलंखल्वोःप्रतिषेधेक्त्वा।
प्रतिषेधार्थयोरलंखल्वोरेतयोःपूर्वपदयोःसतोःपूर्वकालंविनापिक्त्वाप्रत्ययोभवति अलंभुक्त्वा वचपरि
भाषतोक्त्वाप्रत्ययः यजादीयवरादीनामितिसंप्रसारणंचोक्तः उक्त्वा वदव्यक्तायांवाचि उदित्वा। उदि
तःक्त्वावेट्। उदितोधातोःपरस्यक्त्वाप्रत्ययस्येड्वाभवति रुशुरक्षायां क्त्वाप्रत्ययः उदित्वादिद् लघूपध
त्वेनगुणः पषित्वा इडभावेक्त्वाप्रत्ययस्यकित्वान्नगुणः शुभिषुः रक्ष्वा। समासेसतिपूर्वकालेक्यप्प्र
त्ययोभवति नत्वकर्तृकेधातोप्रयुज्यमानेसएवकर्त्तायस्मिन्सतत्कर्तृकः संभूत्यकरोति कृत्वस्यापि
तिकिंनित्वकृ किद्वान्नगुणः प्रणम्यगच्छति नञ्प्रख्यीभावेप्राहेश्चनत्वात्तोदनमामितिणत्वं। अनञ्
पूर्वइत्येके। नञ्पूर्वात्क्त्वाप्रत्ययोनभवति क्त्वाप्रत्ययस्तुभवतीत्येकेवदंति तद्यथा अजित्वाशात्रवा
न्सर्वान्हत्वाविमलेयमः देदनि अदत्त्वाविप्रमर्थिभ्यः कथंजीवतिभूभुजः कथंपिबेदंगणः कथंपिबेदसि ९९

प्रत्ययस्य गुणो भवति । लघुपूर्वस्य जेर्न लोपः । अन्यत्रावधार्य विचार्येत्यादि जेर्लोपः परिणमय्येति ।
स्थिते गुणः ह्रस्वयकारः पश्चात् परिणामय्य भुंक्ते तत्कालेपि क्त्वा दृश्यते तत्काले वर्तमानकाले
पि क्त्वाप्रत्ययो भवतीति दृश्यते चक्षुषी संमील्य हसति अत्र नेत्रसंमीलनं हसनं च समानकालीनं सं
लमीलने तथास्यं व्यादाय स्वपिति अत्र मुखव्यादानस्वपनयोरेककालेपि समासे क्त्वा । अलघु ।
पूर्वस्य जेर्लोपो भवति विचार्य करोति अवधार्य करोति क्त्वापि स्थापयीत्वाकारेण भवति उपास्थाय प्रमा
य । पिबेत्वर्थः । प्रमाय । प्रमीय लोपस्त्व नञ्समासानां ज्मन्तस्य वा लोपः प्रणम्य प्रणत्य ऋस्वस्य पिति किर्वी
ति कृत्वा आगम्य आगत्य । पौनःपुन्ये णं द्विश्च । समानकर्तृके धातौ प्रयुज्यमाने पूर्वकाले पौनः
पुन्यार्थे णं प्रत्ययो भवति तस्य पदस्य द्विर्वचनं पायं पायं णं प्रत्ययः णित्वादातो युक् तस्य णमन्तस्य पद
स्य द्वित्वं पायं पायं गच्छति पुनः पुनः पीत्वेत्यर्थः मान्तत्वादव्ययं भुजपालनाभ्यवहारयोः णं प्रत्ययः
लघूपधस्य गुणः भोजमिति जाते द्वित्वं भोजं भोजं व्रजति पुनः पुनर्भुक्त्वा व्रजतीत्यर्थः । इत्थमादिषु स्वार्थे
णं कृः । इत्थमादिषु प्रयुज्यमानेषु स्वार्थे इत्थमादिष्वर्थे कृ करोतेः णं प्रत्ययो भवति णित्वाद्वृद्धिः इत्थंकार
मित्यमित्यर्थः कथंकारं कथमित्यर्थः । भुवो भावे क्यप् । भावे शब्दप्रवृत्तिनिमित्ते वाच्ये समासे सति भुवो
त्वा क्यप्प्रत्ययो भवति किंत्वान्न गुणः ब्रह्मणो भावं ब्रह्मभूयं गतः ब्रह्मत्वमित्यर्थः एवं देवभूयं गतः ।
लहे रीमट् । लहदर्शनाकुलनयोरित्यधातोरी प्रत्ययो भवति तस्य च मट् आगमः टित्वादाद्यो लहयतीति

सा॰
प्र॰
उ॰
१२४

लक्ष्मीः ईत्वेनाभावान्नसिलोपः । स्त्यायतेः स्त्रीत्वेड्रट् । स्त्ययतेर्धातोः स्त्र्यभिधेड्रट्प्रत्ययोभवति टित्वा॰
ट्टिलोपः स्त्यैष्ट्यैशब्दसंघातयोः रसपरत्वात्संयोगांतलोपमिसंज्ञंति टिड्ढादीप् हसेपः सेर्लोपः स्त्या॰
यतीतिस्त्री । वर्णात्कारः । अकारादिलकारांतेभ्यवर्णेभ्यवर्णानयानिर्दिश्यमानेभ्यवर्णोत्कारप्रत्ययोभ॰
वति ककारः । पदत्वेननिर्दिष्टाद्वर्णान्नभवति यथा अः विष्णुः इः कामः प्रजापतिः उमा कार्श्यं धूम्र
इमाः । रादिफोवा । रइत्येतस्मादिफप्रत्ययोवाभवति अरईरे रेफः पक्षेरकारः अश्वोदाहरणं दर्शयति र॰
कारादीनिनामानिश्रुण्वतोममपार्वति मनःप्रसन्नतामेतिरामनामादिशंकया । लोकाच्छेषस्यसिद्धिः ।
यथामातरपितरावित्यादेसिद्धिः प्रयोगानुसारेणज्ञातव्या ॥ स्वरूपांतोनुभूत्यादिः शाब्दीभूयवरसार्थ॰
कः समस्कारीश्रुभांचक्रेप्रक्रियाचोज्वलोचिताम् अवताद्वोहयग्रीवः कमलाकरईश्वरः स्वरान्तरनरा॰
कारमधुपायीतपंकजः ॥ ॥ इतिश्रीपरमहंसपरिव्राजकाचार्यश्रीमदनुभूतिस्वरूपाचार्यविरचितासा॰
रस्वतीप्रक्रियासमाप्ता ॥ ॥ शुभमस्तुसर्वजगतनाम् ॥ लिखितंत्वरेकुलेन ॥ शुभमस्तुलेकट
पाटकश्रोतॄणाम् ॥ ॥ ॥ ॥ ॥ ॥ शुभम्



१२५